नं० ४८९२

नाम- सौभाग्यरत्नाकरः

कर्ता - विद्यानन्दनाथः सच्चिदानंदनाथशिष्यः

पत्र संख्या - २६४ पत्राणि सं. X

विषयः - तन्त्रम्

सौभाग्यरत्नाकरतंत्र
श्लो ३६३५

श्रीगणेशाय नमः ॥ ॐ अथ ॥ प्रारंभे सरणौ भंगे यन्मदस्यंदविंदवः ॥ कारणानि प्रपंच
स्य तं वंदे वारणाननं ॥१॥ सच्चिदानंदनाथांघ्रिसरोरुहयुगं भजे ॥ यत्कटाक्षक्षणो हे
पाच्छिवोहं पंचकृत्सखः ॥२॥ प्रकाशरूपा प्रथमं प्रयातो मृतवर्षिणी ॥ प्रतिप्रयाणे चा
मृतः पदव्यां चित्कलां भजे ॥३॥ आलोक्य सर्वतंत्राणि याम्यदीन्यशेषतः ॥ श्रीत्वगुरु
मुखात्तेषां रहस्यार्थंश्च तत्वतः ॥४॥ सच्चिदानंदनाथांघ्रिसरोजद्वयषट्पदः ॥
श्रीविद्यानंदनाथोहं वीतरागो विविक्तधीः ॥५॥ विचरन्मेदिनीमेतां विद्वद्भिर्विमला
त्मभिः ॥ प्रयागे प्रार्थितः प्रीत्यै तेषां लोकहिताय च ॥६॥ पंचस्रोतः प्रयोगाद्यं तन्मंत्रम
णिसंकुलं ॥ समस्तयोगिनीचक्रप्रवाललतिकोज्वलं ॥७॥ निसामंडलपूर्णेंदुज्यो
त्स्नाजालविजृंभितं ॥ नवचक्रमहाद्वीपं न्यासजालं तरंगकं ॥८॥ श्रीनाथपादुकापो
तं चतुर्वर्गफलामृतं ॥ प्रकाशयामि सौभाग्यरत्नाकरमतिस्फुटं ॥९॥ श्रीविद्यायाः सभे

दायानित्यनैमित्तिकार्चनं॥काम्यार्चनं च दीक्षांगभूतं प्रात्यादिसाधनं॥१०॥दीक्षाभेदः
गुरुश्चर्यातत्कर्मनियमादिकं॥काम्यहोमविधिश्चैव सौम्यक्रूरविभेदतः॥११॥सम
स्तव्यस्तविद्याया जपात्काम्यफलोदयः॥सदाचारादिकं चैव लिख्यते रत्नवारिधौ॥१२॥
॥तत्र श्रीमान्साधको रजनीतूर्ययामे विबुध्यावश्यकं कृत्वा हस्तौ पादौ प्रक्षाल्य धौते
वाससी परिधायाचम्य स्वासने समुपविश्य पूजामूर्तेर्निर्माल्यमपनीय पूर्वदिन
पूजावशिष्टपुष्पादिना वक्ष्यमाणसमस्तप्रकटेत्यादिसमष्टिविद्यया त्रिरभ्यर्च्य ब्र
ह्मरंध्रस्थश्वेतसहस्रदलकमलकर्णिकायां सिंहासने समुपविष्टं वामांगगतया देव्या
रक्तवस्त्राभरणमाल्यानुलेपभूषितं चंद्रकांतनिभं त्रिनेत्रं ज्ञानमुद्रापुस्तकवराभयकरं
शांतं सुप्रसन्नं शिवरूपिणं श्रीगुरुं ध्यात्वा तच्चरणारविंदयुगलविगलदमृतधाराभिः
स्वदेहं परिप्लुतं विभाव्य प्रणवत्रितारसूत्रार्थ वक्ष्यमाणश्रीगुरुपादुकाविद्यां ते श्रीम्

मुक्तानंदनाथश्रीपादुकां पूजयामि इति मानसैरुपचारैः संपूज्य॥ स्तोत्रं पठेत्॥ तद्यथा॥
स्तुवीत पंचभिः श्लोकैस्त्वं जितेऽसर्वसिद्धये॥ प्रातः प्रबोधसमये जपात्सुदिवसो भवेत्॥१॥
नमस्ते नाथ भगवन् शिवाय गुरुरूपिणे॥ विद्यावतारसंसिद्ध्यै स्वीकृतानेकविग्रह॥२॥
नवाय नवरूपाय परमार्थप्रकाशिने॥ सर्वाज्ञानतमोभेदभानवे चिद्घनाय ते॥३॥
2 स्वतंत्राय दयाक्लृप्तविग्रहाय शिवात्मने॥ परतंत्राय भक्तानां भव्यानां भव्यरूपिणे॥४॥
विवेकिनां विवेकाय विमर्शाय विमर्शिनां॥ प्रकाशानां प्रकाशाय ज्ञानिनां ज्ञानरूपिणे
॥५॥ पुरस्तात्पार्श्वयोः पृष्ठे नमस्कुर्यामुपर्यधः॥ सदा मच्चित्तरूपेण विधेहि भवदा
सनं॥६॥ त्वत्प्रसादादहं देव कृतकृत्योस्मि सर्वदा॥ मायामृत्युमहापाशाद्विमुक्तोस्मि
शिवोस्म्यहं॥७॥ इति प्रणम्य॥ प्रातरारभ्य सायांतं सायादि प्रातरंततः॥ यत्करोमि जगन्नाथ
तदस्तु तव पूजनं॥८॥ इति समर्प्य॥ हृन्मंत्रेण स्वहृदि लयं भावयेत्॥ इति गुरुध्यानंवि
धाय॥ ॥२॥

स्वमूलाधारे चतुरस्रवेष्टितं वादिसांतवर्णचतुष्टययुक्तं चतुर्दलपंकजं पीतवर्णं
ध्यात्वा तत्कर्णिकायां सोमसूर्याग्निमयमकथादित्रिरेखं कुलशृंगाटं त्रिकोणं वि
भाव्य तन्मध्ये कोटिसूर्यप्रतीकाशं चंद्रकोटिसुशीतलं जपाकुसुमप्रभं सत्त्वरज
तमोगुणाक्रांतं कामाख्यं बिंदुं विभाव्य तदूर्ध्वं कुंडलिनीं शक्तिं चिद्रूपामष्टत्रिंश
त्कलायुक्तां पंचाशद्वर्णविग्रहां श्रीविद्यास्वरूपिणीं तडित्कोटिप्रभां दीप्तां बिसतंतु
तनीयसीं प्रसुप्तभुजंगीमिव सार्धत्रिवलयेन स्थितां स्वच्छादंडहतां हूंलोत्थाप्य
गुरूपदिष्टविधिना सुषुम्णामार्गेण मूलाधारस्वाधिष्ठानमणिपूरकानाहतवि
शुद्धाज्ञाख्यषट्चक्रभेदनक्रमेण ब्रह्मरंध्रस्थितसहस्रदलकमले प्रापय्य ततः
स्रवदमृतधारयो रक्तवर्णया वर्णमय्या कुंडलिनीं तां संतर्प्य पुनः सुधास्रोतस्वरू
पिणीमकुलामृतप्लवेन सुषुम्णांतर्गततत्तदाधारतत्तद्धातुतत्तद्वर्णतत्तदधि

3 देवतात्मकावयंतीमास्ताविभुध्यादिक्रमेणमूलाधारंनीत्वातथैवस्वस्थापयेदित्यारो
हावरोहक्रमेणपरांशक्तिंकुंडलिनींध्यात्वा ।। विद्याकूटत्रयंध्यायेत् ।। तत्रमूला
धारेवह्निमंडलंदशकलात्मकंविभाव्यतत्रमूलविद्यायाःप्रथमंकूटंवाग्भवाख्यं
स्फुरत्तडिल्लताभासुरमनाहतपर्यंतंप्राप्तनादशिखंविभाव्यअनाहतेसू
र्यमंडलंद्वादशकलात्मकंध्यात्वा तन्मध्येमूलविद्यायाःकामराजाख्यंद्वितीय
कूटमुद्यद्दिनकरसंकाशंमासात्पर्यंतंप्राप्तनादशिखं=पधऊर्ध्वंप्रसृततरस्मि
कंध्यात्वा=आज्ञाचक्रेसोममंडलंषोडशकलात्मकंध्यात्वातन्मध्येमूलविद्यायाः
शाक्त्याख्यंतृतीयकूटंपूर्णचंद्रनिभंब्रह्मरंध्रपर्यंतंप्राप्तनादशिखंअधऊर्ध्वं
प्रसृततरश्मिकंध्यात्वा ततोमूलाधारादिब्रह्मरंध्रांतंमूलविद्यामुद्यद्दिनकर ॥ ३॥

सहस्रभासुरां तेजोदंडमयीं ऽपरवं ॐ ध्यात्वा तत्तेजसा व्याप्तं स्वदेहं परिचिंत्य तत्तेजसा प
रिणतां श्रीपरदेवतां हृदयकमले ध्यात्वा मानसैरुपचारैः पूजयित्वा मूलविद्यया प्राणा
याम त्रयं मूलविद्यायाः वक्ष्यमाणऋष्यादिकरषडंगन्यासांश्च कृत्वा मूलविद्यां यथा
शक्तिं जपित्वा जपितं जपं समर्प्य ॥ प्रातर्नमामि जगतां जनन्याश्चरणांबुजं ॥ श्रीमत्त्रि
पुरसुंदर्या नमिताया हरादिभिः ॥१॥ प्रातः त्रिपुरसुंदर्या नमामि चरणांबुजं ॥ हरि
हरो विरिंचिश्च सृष्ट्यादीन्कुरुते यया ॥२॥ प्रातस्त्रिपुरसुंदर्या नमामि पदपंकजं ॥
यत्पाद्यमंबु शिरसि भाति गंगा महेशितुः ॥३॥ प्रातः पाशांकुशशरचापहस्तां नमा
म्यहं ॥ उदयदादित्यसंकाशां श्रीमत्त्रिपुरसुंदरीं ॥४॥ प्रातर्नमामि पादाब्जं ययेदं भास
ते जगत् ॥ तस्यास्त्रिपुरसुंदर्या यत्प्रसादान्निवर्तते ॥५॥ यः श्लोकपंचकमिदं प्रातर्नित्यं
पठेन्नरः ॥ तस्मै दद्यादात्मपदं श्रीमत्त्रिपुरसुंदरी ॥६॥ इति स्तुत्वा प्रणम्य तस्यै निज

कं संनिवेदयेत्॥ तद्यथा॥ इति समर्प्य स्वकर्मानुष्ठानार्थं देव्यास्तां प्रार्थयेत्॥ तद्यथा॥
त्रैलोक्यचैतन्यमयीश्वरेशि श्रीसुंदरि त्वच्चरणाज्ञयैव॥ प्रातः समुत्थाय तव प्रिया
र्थं संसारयात्रामनुवर्तयिष्ये॥१॥ संसारयात्रामनुवर्तमानं त्वदाज्ञया श्रीत्रिपुरे परेशि॥
स्पर्धातिरस्कारकलिप्रमादभयानि मामाभिभवंतु मातः॥२॥ जानामि धर्मं न च मे प्र
वृत्तिर्जानाम्यधर्मं न च मे निवृत्तिः॥ त्वया हृषीकेशि हृदि स्थितेन यथा नियुक्तोस्मि
तथा करोमि॥३॥ इति देव्यास्तां प्रार्थ्य॰ स्वगुरूपदिष्टमार्गेणानाहतानुसंधानपूर्वकं नि
रस्तसमस्तोपाधिनाकेनापि चिद्विलासेन प्रवर्त्तमानोस्मीति विभाव्य स्वकर्मानुष्ठाना
य गुरूपदेशेन स्नातः सहजसिद्धमजपाजपं तत्तद्देवताभ्यः समर्पयेत्॥ तद्यथा॥
अद्येत्यादि पूर्वेद्युरहोरात्राच्चरितमुच्छ्वासनिश्वासात्मकं षट्शताधिकमेकविंशतिसह
स्रसंख्याकमजपाजपं मूलाधारस्वाधिष्ठानमणिपूरकानाहतविशुध्याज्ञाख्या ॥४॥

ब्रह्मरंध्रेषु चतुर्दलषट्दलदशादलद्वादशादलषोडशादलद्विदलसहस्र
दलेषु स्वर्णविद्रुमनीलपिंगलधूम्रविद्युत्कर्पूरवर्णेषु स्थितेभ्यो गणपतिब्रह्म
विष्णुरुद्रजीवात्मपरमात्मश्रीगुरुपादुकाभ्यो यथाभागशः समर्पयिष्यामीति हस्ता
ञ्जलिः संकल्प्य समर्पयेत्॥ तद्यथा॥ ॐ ऐं ह्रीं श्रीं मूलाधारस्थाय गणपतये अ
जपाजपानां षट्शतानि समर्पयामि नमः॥४॥ मणिपूरकचक्रस्थाय विष्णवे अ
स्वाधिष्ठानचक्रस्थाय ब्रह्मणे अजपाजपानां षट्सहस्राणि समर्पयामि नमः॥४॥
मणिपूरकचक्रस्थाय विष्णवे अजपाजपानां षट्सहस्राणि समर्पयामि नमः॥४॥ अना
हतचक्रस्थाय रुद्राय अजपाजपानां षट्सहस्राणि समर्पयामि नमः॥४॥ विशुद्ध
चक्रस्थाय जीवात्मने अजपाजपानां सहस्रं समर्पयामि नमः॥ आज्ञाचक्रस्थाय प
रमात्मने अजपाजपानां सहस्रं समर्पयामि नमः॥ इति समर्पयेत्॥ एतावत्कर्तुम

सहस्रदलकमलकर्णिकामध्यस्थायै श्रीगुरुपादुकायै अजपाजपानां सह
स्रं समर्पयामि नमः॥ इति समर्पयेत्॥ एतावत्कृतु मरीचिश्च वेतु॥४ मया पूर्वे
द्युरहोरात्रोच्चरितमुच्छ्वासनिश्वासात्मकं षट्शताधिकमेकविंशतिसह
स्रसंख्याकमजपाजपं ब्रह्मरंध्रस्थसहस्रदलेकमलकर्णिकामध्यवर्तिन्यै
श्रीगुरुपादुकायै समर्पयामि नमः॥ इति गुरव एव समर्पयेत्॥ एवमजपाजपं स
5 मर्प्य॥ ॐ॥ अद्य सूर्योदयमारभ्याहोरात्रे तोच्छ्वासनिश्वासात्मकं षट्शताधि
कमेकविंशतिसहस्रसंख्याकमजपाजपमहं करिष्ये॥ इति कृतांजलिपुटः
संकल्प्य॥ अजपामंत्रेण प्राणायामत्रयं कृत्वा॥ शिरसि ४ हंसाय ऋषये नमः॥
मुखे ४ अव्यक्ता गायत्री छंदसे नमः॥ हृदि ४ परमहंसाय देवतायै नमः॥ मूलाधारे ४
हं बीजाय नमः॥ पादयोः ४ सः शक्तये नमः॥ नाभौ ४ सोहं कीलकाय नमः॥ ॥५॥

हृदये ४ ॐकाराय तत्त्वाय नमः ॥ मूर्द्ध्नि ४ नभसे स्थानाय नमः ॥ सर्वांगे ४ हैमाय वर्णा
य नमः ॥ कण्ठे ४ उदात्ताय स्वराय नमः ॥ इति विन्यस्य ॥ मम मोक्षार्थे जपे विनियोगः ॥
इति कृतांजलिर्वदेत् ॥ ततः अंगुष्ठयोः ॐ ह्रां सूर्यात्मने स्वाहा ~~शिरसायै व~~ हृदया
य नमः ॥ तर्जन्योः ४ ह्रीं सोमात्मने स्वाहा सिरं स्वाहा ॥ मध्यमयोः ४ ह्रूं निरंजनात्मने
स्वाहा ~~हृदयाय न~~मः ॥ शिखायै वषट् ॥ अनामिकयोः ४ ह्रैं निराभासात्मने स्वाहा कवचा
य हुं ॥ कनिष्ठिकयोः ४ ह्रौं अनंत तनुः सूक्ष्म प्रचोदयात्मने स्वाहा नेत्रत्रयाय वौषट् ॥
करतलकरपृष्ठयोः ४ ह्रः अव्यक्त बोधात्मने स्वाहा अस्त्राय फट् ॥ इति करयोर्विन्य
स्य हृदयादि षडंगेष्वप्येतानेव मंत्रान्विन्यस्य ॥ ध्यानं कुर्यात् ॥ तद्यथा ॥ ध्यां मूर्द्धानं यस्य
विप्रा वदंति खं वै नाभिं चंद्र सूर्यौ च नेत्रे ॥ दिग्भिः श्रोत्रे यस्य पादौ क्षितिं च ध्यातव्योऽसौ स
र्वभूतांतरात्मा ॥ १ ॥ आत्मानमग्नीषोमाख्य पक्षयुक्तं शिवात्मकं ॥ हकारेण बहिर्यांतं

विशंतं च सकारतः ॥३॥ हंसः सोहमिति स्मृत्वा सोहं व्यंजनहीनतः ॥ पश्चात् संहस
चात्मानमंडरूपं विभावयेत् ॥३॥ इति विराट्स्वरूपं स्वात्मानं ध्यात्वा· तदनु संधायी प्राणवा
योर्निर्गमप्रवेशात्मकं अजपामंत्रं ॥ हंसः पदं पंचविंशतिवारं जपित्वा समर्प्य गुरुं नी
थाय ॥४॥ ॐ समुद्रमेखले देवि पर्वतस्तनमंडले ॥ विष्णुपत्नि नमस्तुभ्यं पादस्पर्शं क्षम
6 स्व मे ॥१॥ धारणं पोषणं त्वत्तो भूतानां देवि सर्वदा ॥ तेन सत्येन मां पाहि पापान्मोचय धारिणि
प्रातः स्मरम स्मृत्वा तु पादे विमर्दितो यजेत् ॥ निष्फला तस्य पूजा स्याच्छौचहीना यथा क्रिया ॥
इति भूमिं प्रार्थ्य ॥ श्वासानुसारेण तस्यां पादं निधायोत्थाय पदे अस्त्रमुच्चैरनुग्रहाद्बहि
र्निर्गत्य ग्रामाद्बहिर्नैरृत्यां याम्यां वा दिशि शरक्षेपमात्रां भूवमतीत्य दूरे गत्वा मलमूत्रोत्स
र्गं शौचाचमनादिकं यथाविधिं विधाय निषिद्धदिनेषु विहितकाष्ठेन ॥ क्लीं कामदेवाय
दं। सर्वजनप्रियाय नमः इति मंत्रेणाँभान्विशोध्य जिह्वामुल्लिख्य दंतकाष्ठं प्रक्षाल्य पुरतः ॥६॥

शुद्धदेशे शोपरित्यज्य वक्ष्यमाणं चेतुर्लक्ष्मीं विद्याभिर्मुखं प्रक्षाल्याचम्य तिलकुशकुसुम
गंधाक्षतास्त्राभिमंत्रित शोकुनाभुचिस्थानादुद्धृतमृद्गोमयधौतवस्त्राण्याशयनधारोग
त्वाश्च स्त्राभिमंत्रितवारिणानीरं प्रक्षाल्य तत्रास्त्राभिमंत्रितं कुशादिकं निधायोद्धृतजले
न तीर्थाद्बहिः कटिशौचं सुगंधामलकाद्युद्वर्तनामलापकर्षणं स्नानं मृद्गोमयादिभिः
स्वशाखोक्तविधिना वैदिकस्नानं च विधाय नाभिमात्रे जले स्थित्वा॥४ ॐ अद्येत्यादि
श्रीपरदेवताप्रीत्यर्थं तांत्रिकविधिना वै[illegible] स्नानमहं करिष्ये इति संकल्प्य· मूलवि
द्यया प्राणायामत्रयं कृत्वा मूलविद्याया ऋष्यादि करषडंगन्यासांश्च विधाय स्वपुरतो ह
स्तमात्रं चतुरस्रं तीर्थं परिकल्प्य·४ ॐ ब्रह्माण्डोदरतीर्थानि करैः स्पृष्टानि ते रवे॥ तेन
सत्येन देवेश तीर्थं देहि दिवाकर॥१॥ इति सूर्यात्तीर्थं प्रार्थ्य॥ क्रोमित्यंकुशमुद्रया सूर्य
मंडलं भित्त्वा४ गंगे च यमुने चैव गोदावरि सरस्वति॥ नर्मदासिंधुकावेरि जलेस्मिन् संनि

धंकुरु ॥१॥ इति सूर्यमंडलात्तीर्थमावाह्य तज्जलेपुरःकल्पित तीर्थमंडले मूलविद्यया सं
योज्य पुनः पुनः सूर्यमंडलाद्देव ॥ ॐ ऐं ह्रीं श्रीं ह्रां ह्रीं ह्रूं ह्रैं ह्रौं ह्रः सर्वानंदमयि तीर्थशक्ते
एहि एहि स्वाहा ॥ इति तीर्थशक्तिमावाह्य तस्मिन्तीर्थमंडलमध्ये तां ध्यायेत् ॥ तद्यथा ॥ स
र्वानंदमयीमशेषदुरितध्वंसां मृगांकप्रभांभोज्यक्षौचोर्ध्वकरद्वयेन दधतीं पाशेसृणिं चक्रमात् ॥
दोर्भ्यां चामृतपूर्णहेमकलशं मुक्ताक्षमालावरे गंगासिंधुसरिद्वयादिसहितां श्रीतीर्थशक्तिं
भजे ॥१॥ दक्षाधूर्ध्वयोरारोद्ये मध्यस्याभ्यां कलशं दक्षाद्यधःस्थयोर न्ये इत्यायुधध्यानं ॥
इति ध्यात्वा तद्विद्यया गंधादि पंचोपचारैर्जलमये स्तां संपूज्य ॥४ ॐ नमो भगवति अंबे
अंबालिके अंबिके महामालिनि एत्येहि भगवति अशेषतीर्थालवाले ह्रीं श्रीं शिवजटा
धिरूढे गंगे गंगांबिके स्वाहा ॥ इति मंत्रेण सप्तधाभिमंत्र्य ह्रींकारेण जलमालोड्य वमिति
धेनुमुद्रयामृतीकृत्य मूलविद्यायाः प्रथमकूटमुच्चार्य आत्मतत्त्वात्मनेनमः मिः ॥ द्वितीय ॥७॥

कूटं विद्यातत्त्वात्मने नमः। तृतीयकूटं शिवतत्त्वात्मने नमः। इति तत्त्वत्रयं जले विन्यस्य तत्र
श्रीचक्रं विभाव्य हृदयकमलोद्देवीमावाह्य षडंगन्यासेन सकलीकृत्य तासां वर्णानां
स्तर्पयित्वा मूलविद्यया योनिमुद्रया तज्जलमष्टधाभिमंत्र्य तस्मिंजले देवतामेव स्म
रणपूर्वकं त्रिर्निमज्ज्योन्मज्य कुंभमुद्रया मूलविद्यया स्वशिरसि त्रिरभिषिंच्याचम्य मूलवि
द्यया देवीं त्रिःसंतर्प्य देवीं विसृज्य वक्ष्यमाणप्रकारेण तत्त्वैराचम्य तीरमागत्य धौते वाससी प
रिधायाचम्य तीर्थमृत्तिकादिनोर्ध्वपुंड्रं विधाय सकुंकुमेन चंदनेन त्रिभेदात्॥ तथा चोक्तं (त्रि
पुरार्णवे॥ संध्या चतु) पुंड्रं विधाय वैदिकसंध्यां निर्वर्त्य तांत्रिकसंध्यां कुर्यात्॥ सा चतुर्विधा॥
प्रातर्मध्याह्नसायाह्नमध्यरात्रिभेदात्॥ तथा चोक्तं त्रिपुरार्णवे॥ संध्यां कुर्यात्॥ चतुर्वि
धा सेया बाला कौमार यौवना॥ प्रौढा च वनिष्कूला चेति संध्या देवि प्रकीर्तिता॥१॥ प्रातःकाले
महादेवी विद्या वागीश्वरी मता॥ कामेश्वरी च मध्याह्ने सायाह्ने त्रिपुरभैरवी॥ मध्य

रात्रे महादेवि स्नेया त्रिपुरसुंदरि ॥१॥ इति ॥ तत्र विधिवदाचम्य मूलविद्यया शिखां बध्वा
तथैव प्राणायामत्रयं कृत्वा मूलविद्यया ऋष्यादिकरषडंगन्यासान् विधाय स्वपुतो धेनु
मुद्रया जलममृतीकृत्य मूलविद्ययाष्टवारमभिमंत्र्य तेन जलेन कुशैरकारादिक्षका
रां तैः सबिंदुभिर्मातृकाक्षरैः प्रत्यक्षरं स्वशिरः प्रोक्ष्य मूलविद्यया च त्रिः संप्रोक्ष्य सूर्य
मुउले देवीं यथोक्तरूपां ध्यात्वा दक्षिणहस्तेन जलमादाय · लं वं रं यं हं इति पांच भौति
8 कैर्मंत्रैः सप्तवारमभिमंत्र्य मूलविद्यया च त्रिरभिमंत्र्य तज्जलबिंदुभिर्वामांगुष्ठाना
मिकाभ्यां मूलविद्यया स्वशिरस्त्रिः प्रोक्ष्यावशिष्टजलं वामहस्ते निधाय तेजोरूपं त
ज्जलमिडया कृष्य स्वदेहांतस्थितं सकलकलुषं प्रक्षाल्य तज्जलं कृष्णवर्णं पिंगल
या बहिर्निर्गतं मत्वा तज्जलं पुनर्दक्षिणहस्ते कृत्वा स्ववामभागे ऽवले वज्रशिलां ध्यात्वा
ॐ श्लीं पशु हुं फट् इति पाशुपतास्त्रमंत्रेण तस्यां शिलायामास्फाल्य हस्तौ प्रक्षाल्य ॥८॥

मूलविद्यया दक्षिणहस्ते जलमादाय प्रवहन्नाड्यास हस्तदलकमलगतपरमामृतेनैकीभूतं विभाव्य राजदंतविवरान्तर्मार्गेण निर्गमय्य तज्जलं वामके निधाय तेन जलेन ४ अमृतमालिनि स्वाहा इति मंत्रेण कुशैः स्वशिरः त्रिः प्रोक्ष्य ॥ ४ प्रथमकूटमुच्चार्य आत्मतत्त्वं शोधयामि स्वाहा ॥ ४ द्वितीयकूटमुच्चार्य विद्यातत्त्वं शोधयामि स्वाहा ॥ ४ तृतीयकूटमुच्चार्य शिवतत्त्वं शोधयामि स्वाहा ॥ इति त्रिराचम्य पुनरेतद्वैपरीत्येन त्रिराचम्य ॥ तद्यथा ॥ ४ तृतीयकूटमुच्चार्य शिवतत्त्वं शोधयामि ४ द्वितीयकूटं विद्यातत्त्वं शो० ४ प्रथमकूटं आत्मतत्त्वं शो० ॥ पुनः ॥ समस्तविद्यामुच्चार्य सर्वतत्त्वं शोधयामि स्वाहा ॥ इति त्रिधा ॥ एवं नवधा जलप्राशनेन त्रिराचम्य ॥ ४ मूलविद्यया श्रीमहात्रिपुरसुंदरीश्रीपादुकां पूजयामि इति गंधपुष्पाक्षतैस्त्रिः संपूज्य ॥ जलमंजलिना दद्यात्॥ ४ प्रथमकूटमुच्चार्य वागीश्वरी विद्महे द्वितीयकूटमुच्चार्य कामेश्वरी धीमहि ४ तृतीयकूटमुच्चार्य तन्नः शक्तिः प्रचोदयात् ॥ श्रीमहात्रिपुरसुंदरीश्रीपादु

कायैष बोर्घः स्वाहा॥ इति त्रिरर्घ्यं दत्वा॥४ ह्रां ह्रीं हं सः श्रीसूर्यं पूजयामि नमः इति सूर्यं त्रिः स
पूज्य॥४ ह्रां ह्रीं हं सः श्रीसूर्य एष तेऽर्घः स्वाहा इति सूर्याभिमुखमर्घ्यमंजलित्रयं दत्वा॥४ मूल
विद्यया श्रीमहात्रिपुरसुंदरीश्रीपादुकां तर्पयामि नमः इति महादेवीं त्रिः संतर्प्य॥४ ह्रां ह्रीं हं सः
श्रीसूर्यं तर्पयामि नमः इति त्रिः संतर्प्य॥ मूलाधारे प्रथमकूटं तडित्कोटिसमप्रभं मूलादि
ब्रह्मरंध्रांतं संचिंत्य तत्तेजः सुषुम्णावर्त्मना ब्रह्मरंध्रं नीत्वा वहन्नासाध्वना आकाश
स्थवह्निमंडले समावाह्य तत्तेजसोद्भूतां वागेश्वरीं ध्यायेत्॥ तद्यथा॥ पीतां पीतांबरां पी
तस्रग्विभूषानुलेपनां॥ तडित्कोटिप्रभाभासां बालामक्षस्रगुज्ज्वलां॥१॥ पुस्तकाढ्यकरां
भोजां वह्निपीठनिषेदुषीं॥ वाग्भवीं वाग्भवोद्भूतां त्र्यक्षरां ससितां स्मरेत्॥२॥ इत्याकाशस्थ
वह्निमंडले ध्यात्वा॥४ प्रथमकूटमुच्चार्य त्रिपुरावागीश्वरीश्रीपादुकां पूजयामि इति गंध
पुष्पाक्षतैः त्रिः संपूज्य पुनर्वक्ष्यमाणां वाग्भवगायत्रीमुच्चार्य त्रिपुरावागीश्वरीश्रीपादुका

ये अर्घ्यं कल्पयामि स्वाहा इति त्रिरर्घ्यांजलिमुत्क्षिप्य ॥ पुनः प्रथमकूटमुच्चार्य त्रिपुरावागीश्वरी
श्रीपादुकां तर्पयामि नमः इति त्रिः संतर्प्य ॥ श्रीगुरुं प्रणम्य ॥ पूर्ववत्प्राणायामं ऋष्यादि
करषडंगन्यासांश्च विधाय मातृकान्यासस्थानेषु प्रणवत्रितारमूलविद्यादिनित्यावि
द्याहंसः ॐ नमः ॥ ३ इत्यादिना मातृकां विन्यस्य ॥ पूर्वोक्तां तुरीयगायत्रीं यथाशक्तिं जपित्वा वा
ग्भवकूटगायत्रीं जपेत् ॥ सा यथा ॥ ऐं त्रिपुरदेवि विद्महे वागीश्वरी धीमहि ॥ तन्नो मुक्तिः
प्रचोदयात् ॥ इति वाग्भवगायत्रीं जपेत् यथाशक्ति ॥ ततो मूलविद्यां प्रातरित्थं जपेत् ॥ त
द्यथा ॥ तत्र प्रातर्मूलाधारगते कमले वह्निमंडले ॥ वाग्बीजरूपां निस्यांतो विद्युत्पटलेभा
सुरा ॥ १ ॥ पुष्पबाणेक्षुकोदंडपाशांकुशविलसत्करां ॥ स्वेच्छागृहीतवपुषीं युगनित्याक्षरा
त्मिकां ॥ २ ॥ घटिकावरणोपेतां परितः प्रांजलीन्यधा ॥ हीनमुद्रावरकरान्वाग्भवोपासि
तत्परां ॥ नवनाथान्स्मरेन्मूलपंकजे योनिमंडले ॥ दक्षाधःकरमारभ्य दक्षोर्ध्वकरप

र्यं टतं आयुधध्यानं॥ २ एवं संध्याचतुष्टयेपि॥ इति ध्यानं॥ अथ नवत्रितारविद्या मूलविद्या
दिननित्याविद्या हंसः अं आं इं ईं उं ऊं ऋं ॠं ह्रीं श्रीं प्रकाशानंदनाथरूपिणी श्रीमहात्रि
पुरसुंदरी श्रीपादुकां पूजयामि॥४ मूलविद्यामुच्चार्य प्राग्वत् दिननित्याविद्या हंसः ऌं ॡं एं ऐं लं ३
ओं औं अं अः ह्रीं श्रीं विमर्शानंदनाथरूपिणि श्रीपादुकां पू०॥४ मू० दिः वि हंसः कं खं गं घं
ङं ह्रीं श्रीं आनंदानंदनाथरू० पादुकां॥४ मूले दि० हंसः चं४ ह्रीं श्रीं ज्ञानानंदनाथरूपि० पा
दुकां पू०।४ मू० दि० हंसः टं४ ह्रीं श्रीं सत्यानंदनाथरू० पादुकां पू०। मू० दि० हंसः तं४ ह्रीं श्रीं
पूर्णानंदनाथरू० पादु०॥४ मूलं दि० हंसः पं४ ह्रीं श्रीं स्वभावानंदनाथरू० पा०॥४ मूलं दि० हंसः
यं४ ह्रीं श्रीं प्रतिभानंदनाथरू० पा०॥४ मू० दि० हंसः वं४ ह्रीं श्रीं सुभगानंदनाथरूपि० पा०। पू
जयामि॥ इति नवनाथात्मकत्वेन मूलविद्यां जपेत्॥ ततस्तद्दिननित्याविद्यां यथाशक्तिं
जपित्वा॥ इति कालनित्याजपः॥ ततो मूलादिब्रह्मरंध्रांतं मूलविद्यामुद्यत्सूर्यसहस्रस ॥१०॥

मन्त्रमां ध्यायन् मूलविद्यामष्टोत्तरशतं जपित्वा बहिराकाशस्थाग्निमंडले पूर्वोक्त
रूपां वाग्भवेश्वरीं ध्यायन् प्रातर्वाग्भवकूटमष्टोत्तरशतं जपेत् ॥ ततः प्राणायामत्रयं
ऋष्यादिकरषडंगन्यासांश्च विधाय कृतं जपं देव्यै निवेद्य प्रणम्य स्तुत्वा सूर्यमंडला
द्वह्निमंडलाच्च मूलदेवीं वाग्भवेश्वरीं च स्वहृदये मूलाधारे च विसृज्य गुरुं प्रणमेदि
ति ॥ ॥ इति प्रातःसंध्याविधिः ॥ अत्र कर्मकालेषु गुरुध्यानमुक्तं रुद्रयामले ॥ दी
क्षाकाले यथारूपं स्वस्यानुग्रहकर्मणि ॥ दृष्टं तेन भावेन ध्यायन्नाह्निकमाचरेत् ॥
इति गुरोरिति शेषः ॥ एतद्गुरुध्यानं प्रातःस्मरणातिरिक्तकालेषु ज्ञेयं ॥ ॥ प्रातःसं
ध्येयमीशानि सर्वकर्मसु सर्वदा ॥ कर्तव्या मंत्रिणा नित्यं मंत्रसिद्धिः प्रजायते ॥१॥ ३ सम्रदये
प्रातःसंध्यां परित्यज्य कर्म कुर्वन् व्रजत्यधः ॥ प्रातःसंध्यां परित्यज्य देवतापूजनं चरेत् ॥
स भ्रष्टः सुदुराचारः सर्वकर्मबहिष्कृतः ॥३॥ प्रातःसंध्यां परित्यज्य देवपूजादिकं

चरेत्॥ मोहात् कृत्वा महेशानि नारकी जायते नरः॥४॥ प्रातःसंध्यां परित्यज्य हे
मं वा तर्पणं शिवे॥ कुर्वन्न कारणं विप्रस्य जन्म श्वानो भविष्यति॥५॥ पिशाचो जायते भवेध्रुवं
देवि अपि वेदान्तपारगः॥ संध्या नाम पि सर्वासां प्रातःसंध्या गरीयसी॥६॥ तस्मात्तां न
सजेद्द्विप्रस्स जन्म नरकमाप्नुयात्॥ इति त्रिपुरार्णव वचनादियमवश्यं कर्तव्येति शि
वशासनं॥ ॥अथ घटिकापारायणात्मेन षष्टिजपं कुर्यात्॥ स च पंचभिर्दिवसै
र्मातृकायाः षडावृत्तिरूपः॥ तथा च तत्रैव राजपटले॥ आरभ्य भानोरुदयमेक
शो घटिकाक्रमात्॥ एकैकं मातृका वर्णाः पंचाशत् परिवृत्तितः॥१॥ दिवसैः पंच
भिस्तस्याः षडावृत्तिरुदीरितेति॥ ततो द्वितीय घटिकादि पंचाशत् घटिका पर्यंता
सु घटिकासु अकारादि क्षकारान्ता वर्णा विसर्गस्वररहिताः स्वस्व घटिकोदयकाले ॥११॥
समुद्यंति॥ तत एकपंचाशत् घटिकामारभ्य शिष्ट दश घटिकासु अकारादि ल्ट

तस्या मातृकायाः॥ अयमर्थः॥ चतुर्युगेष्वपि तत्तद्युग प्रथम दिने सूर्योदयकाले अकार उदयति॥३

कारांतः दशवर्णाः स्वस्वघटिकोदयकाले समुद्यंति ॥१॥ द्वितीयदिवसे सूर्यो
दयकाले एकार उदेति ततः स्वस्वघटिकोदयकाले एकाराद्या एकोनचत्वा
रिंशद्वर्णा अकाराद्या विंशतिवर्णाश्च समुद्यंति ॥२॥ तृतीयदिवसे सूर्योदयकाले
चकार उदेति ॥ ततः स्वस्वघटिकोदयकाले छकारादि क्षकारांता अकारादि ङका
रांता एकोनषष्टिवर्णाः समुद्यंति ॥३॥ चतुर्थदिवसे सूर्योदयकाले तकार उदेति ॥
ततः स्वस्वघटिकोदयकाले थकारादि क्षकारांता अकारादि मकारांता एकोनषष्टि
वर्णाः समुद्यंति ॥४॥ पंचमदिवसे सूर्योदयकाले पकार उदेति ॥ ततः स्वस्वघटिकोद
यकाले फकारादि क्षकारांताः अकारादि क्षकारांता एकोनषष्टिवर्णाः समुद्यंति ॥ एवं
पंचभिर्दिवसैर्मातृकायाः पंचावृत्तिर्भवति ॥ एवं क्रमेणैव निर्वर्त्यो घटिकापारायणाख्यः
षष्टिजपः क्रियते ॥ तस्य प्रकारः प्रदर्श्यते ॥ ततः तत्र अकारादि क्षांताः पंचाशद्वर्णा विसर्ग

रहिता दशादसशीभूत्ता पंचवर्गाः अं. एं. चं. तं. यं नामानो भवंतिनै. षष्ठि जपः कार्यस्तत्प्रकी

रस्तु ॥४ मूलं दिन नित्या विद्या हंसः अं ॥४ मूलं दिन निसा विद्या हंसः अं ॥ एवं क्षांता

न् पंचाशद्वर्णानावृत्य पुनाराद्विवर्गमावर्तयेत् ॥ एवं षष्ठिरावृत्तयो मूलविद्याया भवंति ॥

द्वितीयदिने ४ मूलं दिन निसा विद्या हंसः एं एवं पुनस्तथा जप्त्वा एं एवं क्षांतान् चतुरो व

र्गानावृत्य पुनराद्यद्वितीयवर्गावावर्तयेत् ॥ एवं षष्ठिरावृत्तयः ॥ तृतीयदिने ४ मूलं.

दिन निसा विद्या हंसः चं एवं क्षांतांस्त्रीन्वर्गानावर्त्य पुनराद्यांस्त्रीनावर्तयेत् ॥ एवं ष

ष्ठिरावृत्तयो मूलविद्याया भवंति ॥ चतुर्थदिने ४ मूलं तद्दिन निसा विद्या हंसः यं ।

एवं क्षांतं वर्गं विवर्तयित्वा पुनरकाराद्यान् क्षांतान् पंचाशद्वर्णानावर्तयेत् ॥ एवं. ततः

षष्ठे दिने पुनरकारादितत्रारभ्यो क्तरीत्या घटिकापारायणं जपमनवरतं कुर्यात् ॥

अत्राधुनावर्तमानसमयो साधकैर्ज्योतिःशास्त्रोक्तप्रकारेणाहर्गणः कलियुग ॥१२॥

12

स्यगतद्दिनादिशोत्वास्वकमारंभद्दिनपर्यंतंगणयित्वापंचभिराहृत्सो वशिष्टतद्दिने
नोदयाक्षरंरवीतीयस्मिन्दिनेउदयाक्षरमकारोभवति तस्मिन्दिनेप्रारभ्यघ
टिकापारायणंप्रोक्तक्रमेणकार्यमितिघटिकापारायणजपः प्रातरेवकार्यः॥ त
त्रराजोक्त्याकालत्रयेपिकार्यः॥ ॥अथमाध्यंदिनसंध्या॥ ॥तत्रप्राणायामादि
सूर्यतर्पणांतंप्रातःसंध्यावदेवविधायबीजसंध्यांकुर्यात्॥सायथा॥तत्रमध्या
ह्नेअनाहतचक्रेमूलविद्यायाःकामराजकूटंरक्तवर्णंध्यायन्ततेजःसुषुम्णा
मार्गेणवहन्नाराधुटीध्वनानिःसार्यसूर्यमंडलेसमावाह्यतद्भूतांकामेश्वरींध्यायेत्॥
तद्यथा॥रक्तांसुरक्तांबरभूषणाढ्यांपाशांकुशाभीतिवरान्दधानां॥शुचिस्मिता
मद्भुतयौवनाढ्यांकामेश्वरींसंस्मरतत्रिनेत्रां॥१॥इतिध्यात्वार्घंकामराजकूटमूला
र्यश्रीत्रिपुराकामेश्वरीश्रीपादुकांपूजयामिइतित्रिःसंपूज्य-पुनः४कामराजकूट

13

गायत्रीमुद्रार्घ्यश्रीत्रिपुराकामेश्वरिश्रीपादुकायै अर्घ्यं कल्पयामिस्वाहेतित्रिरर्घ्यां
जलिमुत्क्षिप्यपुनःकामराजकूटमुच्चार्यश्रीत्रिपुराकामेश्वरिश्रीपादुकां तर्पयामि
नमः इतित्रिःसंतर्प्य॥प्राणायामादिपुरःसरंपूर्ववन्मातृकांविन्यस्यपूर्ववच्चतुरीय
वीद्यागायत्रींजपित्वाकामराजकूटगायत्रींजपेत्॥सायथा॥क्लींत्रिपुरेदेवीविद्म
हेकामेश्वरीधीमहि॥तन्नःक्लिन्नाप्रचोदयात्॥इतिकामराजकूटगायत्रींयथाश
क्तिंजपित्वा॥षट्त्रिंशत्तत्वात्मकत्वेनमूलविद्यांजपेत्॥तद्यथा॥ततस्तत्र॥मध्या
न्हेहृदयांभोजकर्णिकेसूर्यमंडले॥कामराजात्मिकांदेवीमलक्तकसमारुणां॥१॥
प्रसूनबाणपुंड्रेक्षुचापपाशांकुशान्वितां॥परितःस्वात्ममुख्याभिःषट्त्रिंशत्तत्वश
क्तिभिः॥२॥रक्तमाल्यांबरालेपभूषाभिःपरिवारितां॥युगनियाक्षरमयींघटिका
नरणांस्मरेत्॥३॥पुष्पबाणेक्षुकोदंडधराःशोणवपुर्धराः॥हृत्पंकजचताःकाम ॥१३॥

राजोपास्तिपरायणाः ॥४॥ इति देविं ध्यात्वा ॥४ मूलं विद्यां दिननित्याविद्यां हंसः १ दं चौंच्चौं चार्यःआं शिवतत्वरूपिणी श्री महात्रिपुरसुंदरीपादुकां पूजयामि ॥१६॥४ मूले दिनेः हंसः ः कं शक्तितत्वरूपिणी श्री महात्रिपुरसुंदरीपादुकां पूजयामि ॥१६॥ मू दि हंसः खं सदाशिवतत्वरूपिणी ॥१६॥ मूलं दि हंसः गं ईश्वरतत्वरूपिणी १६॥४ मू दी हंसः घं शुद्धविद्यात्वरूपिणी १६॥४ मू दी ङं मायातत्वरूपिणी १६॥ मू दि हंसः चं कलातत्वरूपिणी १६॥४ मू दि हंसः छं विद्यातत्वरूपिणी १६॥४ मूं दि जं रागतत्वरूपिणी १६॥४ मू दि हंसः झं कालतत्वरूपिणी १६॥४ मू दि हंसः ञं नियतितत्वरूपिणी ॥१६॥४ मू दि हंसः टं पुरुषतत्वरूपिणी १६॥४ मू दि हंसः ठं प्रकृतितत्वरूपिणी १६॥४ मू दि हंसः डं अहंकारतत्वरूपिणी १६॥४ मू दि हंसः ढं बुद्धितत्वरूपिणी १६॥४ मू दि हंसः णं मनस्तत्वरूपिणी १६॥४ मू दि हंसः तं श्रोत्रतत्वरूपिणी १६॥४ मू दि हंसः थं त्वक्तत्वरूपिणी १६॥४ मू दि हंसः दं चक्षुस्तत्वरूपिणी १६॥४ मू दि हंसः धं जिह्वातत्वरूपिणी १६॥४ मू दि हंसः

१५ नं घ्राण तत्वरूपिणी॰१६॥४ मू॰दि॰ हं सः पें वाक् तत्वरूपिणी॰१६॥४ मू॰दि॰ हं सः फं पाणि तत्वरूपि
णी॰१६॥४ मू॰दि॰ हं सः बं पाद तत्वरूपिणी॰१६॥४ मू॰दि॰ हं सः भं पायु तत्वरूपिणी॰१६॥४ मू॰दि॰
हं सः मं उपस्थ तत्वरूपिणी॰१६॥४ मू॰दि॰ हं सः यं श्रोत्र तत्वरूपिणी॰१६॥४ मू॰दि॰ हं सः रं स्प
र्श तत्वरूपिणी॰१६॥४ मू॰दि॰ हं सः लं रूप तत्वरूपिणी॰१६॥४ मू॰दि॰ हं सः वं रस तत्वरूपि
णी॰१६॥४ मू॰दि॰ हं सः शं गंध तत्वरूपिणी॰१६॥४ मू॰दि॰ हं सः षं आकाश तत्वरूपिणी॰१६॥४
15 मू॰दि॰ हं सः सं वायुस्तत्वरूपिणी॰१६॥४ मू॰दि॰ हं सः हं तेजः तत्वरूपिणी॰१६॥४ मू॰दि॰
हं सः ळं अप तत्वरूपिणी॰१६॥४ मू॰दि॰ हं सः क्षं पृथ्वी तत्वरूपिणी॰ श्रीमहात्रिपुरसुंदरी
पादुकां॥ इति षट्त्रिंशत्तत्वयोगेन मूलविद्यां जपित्वा॥ ततः कालनित्याविद्यामष्टो
त्तरशतं जपित्वा प्राग्वन्मूलविद्यामष्टोत्तरशतवारं जपित्वा। हृदयकमले कामराज ॥१५॥
कूटं बालार्ककोटिप्रभं हृदयादिब्रह्मरंध्रपर्यंतं हृदयादिमूलाधारांतं च व्योम्नि रश्मि

कदंबकं ध्यायन् कामराजकूटमष्टोत्तरशतवारं जपित्वा। प्राणायामादिपूर्वकं जपं स
मर्प्य स्तुत्वा प्रणम्य मूलदेवीकामेश्वरीं च प्राग्वत् हृदये विसृजेदिति॥ इति मध्या
ह्नसंध्याविधिः॥ ॥ अथ सायंसंध्याविधिः॥ तत्र प्राणायामादिसूर्यतर्पणांतं प्रा
ग्वत् विधाय। बीजसंध्यां कुर्यात्॥ सा यथा॥ सायमाशौच कैहक्षाब्जे चंद्रमंडले मू
लविद्यायास्तृतीयकूटं शुद्धस्फटिकसंकाशं ब्रह्मरंध्रस्थपूर्णेंदुमंडलपर्यंतं ध्या
त्वा वहन्नासापुटेनाकाशस्थसोममंडले समावाह्य तदुद्भूतां देवीं वृद्धां ध्यायेत्॥
तद्यथा॥ शुक्लां शुक्लांबरालेपस्रग्विभूषाविभूषितां॥ जटाजूटधरां नेत्रत्रयो
द्भासिमुखांबुजां॥१॥ ईषत्स्फुटितदंष्ट्रां च भैरवीरूपमास्थितां॥ जरापलितसं
कीर्णां लंबमानपयोधरां॥२॥ पाशांकुशौ पुस्तकं च स्फाटिकाक्षस्रजं करैः। दधा
नां शक्तिबीजोत्थां पूर्णेंदोर्मंडले स्थितां॥३॥ ध्यायेदाद्यां परां शक्तिं शक्तिमद्भिर्निषेविता॥

भोगमोक्षप्रदां शांतामनंतामृतेश्वरी ॥४॥ वामाघूर्द्धयोराद्येत दाघ घस्थयोरन्ये इ
त्यायुधध्याने ॥ इति ध्यात्वा ॥ मूलविद्यास्तृतीयं कूटमुच्चार्य त्रिपुरामृतेश्वरी श्रीपा
दुकां पूजयामि इति गंधादिभिः संपूज्य वक्ष्यमाणां तार्तीयकूटगायत्रीमुच्चार्य त्रि
पुरामृतेश्वरी श्रीपादुकायै अर्घ्यं कल्पयामि स्वाहेति त्रिरर्घ्यं दत्वा पुनस्तार्तीयकूट
मुच्चार्य त्रिपुरामृतेश्वरी श्रीपादुकां तर्पयामि नमः ॥ इति त्रिः संतर्प्य प्राणायामा
15 दिपूर्वकां मातृका विन्यस्य । तुरीयविद्यागायत्रीं प्राग्वज्जपित्वा शक्तिकूटगाय
त्रीं जपेत् ॥ सा यथा ॥ सौः त्रिपुरे देवि विद्महे शाक्तेश्वरी धीमहि । तन्नोमृता प्रचो
दयात् ॥ इति शक्तिगायत्रीमष्टाविंशवारं जपित्वा ॥ सायाह्ने षोडशनित्यात्मकदे ॥१५॥
ने मूलविद्यां जपेत् ॥ तद्यथा ॥ तत्र सायमास्ते सरोजस्थे चंद्रे चंद्रसमद्युतिं ॥ शक्ति
बीजात्मिकां चापबाणपाशांकुशान्वितां ॥१॥ युगनित्याक्षरां देवीं घटिकावरणां परां ॥

चितयित्सा भगवती नित्या भिः परिवारितां ॥२॥ पुस्तकं चाक्षसूत्रं च दधानाः स्मेरवक्त्रकाः ॥
नित्याः षोडश ध्याता सा यां सायंकाले तु संस्मरेत् ॥३॥ इति देवीध्यानं ॥४ मूलं · दि न नित्या
विद्या · हंसः अं कामेश्वरी नित्या विद्या मुद्राचार्य ऐं कामेश्वरी नित्या रूपिणी श्री महात्रिपुर
सुंदरी श्रीपादुकां पूजयामि नमः ॥४ मू · दि · हंसः आं भगमालिनी विद्यामुद्राचार्य आं भगमा
लिनी नित्या स्वरूपिणी श्री · १६ ॥४ मूलं · दि न · हंसः इं नित्य क्लिन्ना विद्यामुद्राचार्य इं नित्य क्लि
न्ना नित्या स्वरूपिणी · श्री १६ ॥४ मू · दि · हंसः ईं भेरुंडा विद्यामुद्राचार्य ईं भेरुंडा नित्या स्वरूपिणी
श्री · १६ ॥४ मू · दि · हंसः उं वह्निवासिनी विद्यामुद्राचार्य उं वह्निवासिनी नित्या स्वरूपिणी श्री · १६ ॥४
मू · दि · हंसः ऊं महावज्रेश्वरी विद्यामुद्राचार्य ऊं महावज्रेश्वरी नित्या स्वरूपिणी · १६ ॥४ मू · दि
हंसः ऋं शिवदूती विद्यामुद्राचार्य ऋं शिवदूती नित्या रूपिणी श्री · १६ ॥ मू · दि · हंसः ॠं त्वरिता
विद्यामुद्राचार्य ॠं त्वरिता नित्या रूपिणी श्री · १६ ॥४ मू · दि · हंसः ऌं कुलसुंदरी विद्यामुद्राचार्य ऌं

कुलसुंदरीनित्यारूपिणीश्री·१६॥४मू·दि·हं सः ल्रं नित्यानित्याविद्यामुच्चार्य ल्रं नित्यानि
त्यारूपिणी·१६॥४मू·दि·हं सः ऐं नीलपताकाविद्यामुच्चार्य ऐं नीलपताकानित्यारूपिणीश्री·
१६॥४मू·दि·हं सः ऐं विजयानित्याविद्यामुच्चार्य ऐं विजयानित्यारूपिणीश्री·१६॥४मू·दि·हं सः
स्रौं सर्वमंगलानित्याविद्यामुच्चार्य स्रौं सर्वमंगलानित्यारूपिणीश्री१६॥४मू·दि·हं सः
स्रौं ज्वालामालिनीनित्याविद्यामुच्चार्य स्रौं·ज्वालामालिनीनित्यारूपिणीश्री१६॥४मू·दि·
हं सः च्रें चित्रानित्याविद्यामुच्चार्य च्रें चित्रानित्यारूपिणीश्री·१६॥४मू·दि·हं सः अः मूल
पंचदशीमुच्चार्य अः चित्रानित्याविद्यामुच्चार्य श्रीमहात्रिपुरसुंदरीनित्यारूपिणीश्री·१६॥
इति षोडशनित्यात्मकत्वेन मूलविद्यां जपित्वा पूर्व वत्कालेनित्याविद्यां मूले विद्यां च जपि
त्वा भ्रूमध्यादिब्रह्मरंध्रांतं तृतीयकूटं शरच्चंद्रकोटिनिभं ध्यायन्नष्टोत्तरशतवारं तार्तीयकूटं
जपेत्॥ ततः प्राणायामपूर्वकं जपं समर्प्य स्तुत्वा देवीं प्रणम्य सूर्यमंडलाच्चंद्रमंडलीचे मूल

१६

देवीममतेश्वरीहृदिभ्रूमध्येचविसर्जयेदिति॥ सायंसंध्याविधिः॥ ॥अथतुरीयसंध्याविधिः॥
ततोर्धरात्रेतुरीयसंध्यामुपासीत॥सायथा॥अर्कमंडलेदेवीध्यानंविनाप्राणायामाद्याच
मनपर्यंतंपूर्ववद्विधायसहस्रारकमलेतुरीयकूटंमूलविद्यात्रयोदशाक्षररूपंपरमाराग
समप्रभंध्यात्वावहन्नासापुटेनतारकमंडलाद्वहिःपरमाकाशेसमावाह्यतदुद्भूतांभगवतीं
यथोक्तरूपांध्यायन्॥४ तुरीयकूटमुच्चार्यश्रीमहात्रिपुरसुंदरीश्रीपादुकांपूजयामि इतित्रिः
संपूज्यायथोक्तरूपांध्यायन्तुरीयकूटमुच्चार्यश्रीमहात्रिपुरसुंदरीश्रीपादुकायेअर्घ्यंक
ल्पयामिस्वाहेतित्रिरर्घ्यंदत्वापुनस्तुरीयकूटमुच्चार्यश्रीमहात्रिपुरसुंदरीश्रीपादुकांतर्प
यामि इतित्रिः संतर्प्यप्राणायामादिपूर्वकंपूर्वोक्तांतुरीयगायत्रीयथाशक्तिंजपित्वाकाल
नित्याविद्यांमूलविद्यामष्टोत्तरशतवारंतरीयबीजंचाष्टोत्तरशतवारंजपित्वाप्राणाया
मादिपूर्वकंजपंसमर्प्यदेवीस्तुत्वापरमाकाशात्सहस्रदलकमलकर्णिकायामुद्वा
स्यकामकलारूपमात्मानंध्यायेदितितुरीयसंध्याविधिः॥ ॥एतत्संध्याचतुष्टयमेत

द्विघोपासकानामावस्यकं ॥ बाह्यशक्तौ ध्यानरूपमप्यर्द्धरात्रसंध्योपासनं कार्यमिति ॥ ॥
अधिकं ते द्वितीयदिने प्रायश्चित्तार्थमष्टोत्तरशतं मूलविद्यां जपित्वा पुनः कर्मकर्तुमधि
कारी भवतीति शिवशासनं ॥ स्नानसंध्यार्चनालोपे अष्टोत्तरशतमिति तंत्रराजवचनात् ॥
जपेन्मूलविद्यामिति शेषः ॥ अत्र ॥ संध्यालोपो न कर्तव्यः शंभोराज्ञैवमेव हि ॥ दीक्षितः
संध्यया हीनो न विद्याफलमश्नुते इति वचनात्संध्याचतुष्टयं साधकैरवश्यं कर्तव्यमिति
17 संक्षेपः ॥ अत्र प्रमादाद्यदि संध्यालोपो भवति तदा त्वन्यसंध्यासमये प्रोक्तप्रायश्चित्तपूर्वकं
पूर्वसंध्याक्रियां विधाय तत्कालसंध्यां कुर्यात् ॥ उक्तं च त्रिपुरार्णवे ॥ संध्याहीनोऽन्यसंध्यायां
पूर्वसंध्याक्रियामथ ॥ विधायोत्तरसंध्यायाः क्रियां कुर्यात्समाहित इति ॥१॥ श्रीविद्यानंद
नाथेन शिवयोः प्रियसूनुना ॥ कृते सौभाग्यरत्नाख्ये तरंगः प्रथमो गमत् ॥१॥ ॥ इति
श्रीसच्चिदानंदनाथचरणारविंदद्वंद्वांतेवासिना श्रीविद्यानंदनाथेन विरचिते
सौभाग्यरत्नाकरे प्रथमस्तरंगः ॥१॥

॥१॥

॥ इत्थं संध्यां विधाय प्रकृतेः प्रातःसंध्यानंतरं पित्रादितर्पणानंतरं वा त्रिकतर्पणं कु
र्यात तत्र प्राणायामत्रयं ऋष्यादिन्यासपूर्वकं स्वपुरतो जले पूर्ववत्तीर्थमावाह्य वमिति
धेनुमुद्रयाऽमृतीकृत्य मूलेनाष्टवारमभिमंत्र्य तत्र श्रीचक्रं विभाव्य तन्मध्ये वक्ष्य
माणप्रकारेण पीठपूजां पुरःसरं देवीमावाह्य षोडशोपचारैर्जले देवीं संपूज्य वक्ष्य
माणविधिना गणावरणदेवताः संपूज्य पुनर्मूलेन देवीं संपूज्य ४ मूलविद्यामुच्चार्य श्री
महात्रिपुरसुंदरीश्रीपादुकां तर्पयामि नमः॥ इत्येकोत्तरशतं तदर्द्धमष्टाविंशतिवारं
वा यथाशक्ति तत्तीर्थजलैः परदेवतामुखकमले परमामृतबुद्ध्या संतर्प्यावरणदेवताः
यथाक्रमं प्रजोक्तमंत्रैः पूजयामीतिस्थाने तर्पयामीति ते रेकैकांजलिना तर्पयेत्॥ तद
नु कौलबटुकादिचतुष्टयं षडंगयुवतीगुरुपंक्तित्रयं सप्तदशानित्याभिः सहितां चतुर
स्रवृत्तत्रयेत त्रिकोणमंडलमध्यस्थां सायुधत्रिकोणावरणशक्तियुतां मूलदेवीं तर्पयेत्॥

तत्राप्यशक्तौ संस्कृते जले देवीं ध्यात्वा संपूज्य देवीमेव तर्पयेदिति तर्पणविधिः॥ अथैवं
कृतप्रातःसंध्यावंदनादिक्रियः स्वगुरूपदिष्टविधिना षट्त्रिंशदुत्तरसप्तशताधिक
विंशतिसहस्रसंख्याभिर्युगाक्षरदिनाक्षरोत्थकालनित्याविद्याभिः सह मूलविद्यायाः
18 नामपारायणजपं कुर्यात्॥ ॥कालनित्याविद्यास्तु तंत्रराजोक्ता उद्ध्रियंते॥ तत्र अ
कारादिक्षांताः षट्त्रिंशत्तत्ववर्णाः षोडशनित्याभिः षोडशस्वरैः प्रत्येकं संयोजिताः ष
ट्सप्तत्युत्तरपंचशतसंख्याकाः पूर्णमंडलाख्या वर्णाः भवंति॥ एते वर्णाः कालनित्या
विद्यानां प्रागुक्तसंख्यानामेकैको वर्णः षट्त्रिंशत् षट्त्रिंशत् विद्यानामादिवर्णा इति
सर्वे वर्णा वाग्भवाख्या भवंति॥ प्रागुक्तषट्त्रिंशत् ते ते वर्णास्तु सर्वासां विद्यानां
माकारेण कृतसंधिकाः पुनः पुनः क्रमेण कामराजाख्यो द्वितीयवर्णो भवति॥ ईकार
स्तु सर्वासां विद्यानां शक्तिकूटाख्यस्तृतीयवर्णो भवंति॥ ॥अथैताः विद्याः क्रमेण ॥१८॥

पारायणजपविधिः प्रदर्श्यते ॥ तत्रादौ साधको विविक्ते देशे नद्यादितीरे एकांते स्वगृहे वा स्वासनमास्तीर्य ॥ ॐ ह्रीं आधारशक्तिकमलासनाय नमः ॥ इत्यासनं संपूज्य ॥ तत्र प्राङ्मुख उदङ्मुखो वा स्वस्तिकाद्यासने नोपविश्य गुरुगणपतिस्वेष्टदेवताः प्रणम्य प्राणायामत्रयपूर्वकं संक्षेपतो भूतशुद्धिप्राणप्रतिष्ठां मातृकान्यासं च कृत्वा मस्तके दक्षबाहुमूले द्विषट्त्रिंशत्सु स्थानेषु प्रतिस्थानं षोडशदलपद्मं विभाव्य ते च काराद्धिक्षकारांतान् षट्त्रिंशत्तत्ववर्णाः प्रत्येकं षोडशस्वरसंयुक्तान् विभाव्य मध्ये तत्प्रथमाक्षरं विन्यस्य पूर्वादिदलेषु तत्तदक्षरविशिष्टं षोडश वर्णांस्तदादिकान् विन्यसेदित्येवं पूर्णमंडलवर्णान्विन्यस्य पुनस्तदिन निशाविद्यापासहितमूलविद्यया प्राणायामत्रयं कृत्वा शिरसि ४ दक्षिणामूर्तये नमः ॥ मुखे ४ पंक्तये छंदसे नमः ॥ हृदये ४ कालनित्यास्वरूपिण्यै श्रीमहात्रिपुरसुंदर्यै देवतायै नमः ॥ इति न्यासादिकं विन्यस्य मम मोक्षार्थे नाम पारायणजपे विनियोगः ॥ इति कृतांजलिरुक्त्वा ॥

तत्तद्दिननित्याविद्याक्षरैस्त्रिभिः कूटैः द्विरावृत्याय यथाविधि करषडंगन्यासं वक्ष्यमाणंच
तुरासनन्यासैः वाग्देवताष्टकन्यासंच विधाय ध्याये तद्यथा॥ रक्तां रक्ताम्बरां रक्तस्रग्वि
लेपानुलेपनां॥ पाशांकुशौ पुस्तकोदंडप्रसूनविशिखौ स्मरेत्॥१॥ इति कालनित्यां हृदये
ध्यात्वा वक्ष्यमाणविधिना हृदये श्रीचक्रं कालचक्रमध्यगतं विभाव्य। तत्र देवीं सांगावर
णां कालनित्याभिश्च परिवृत्तां ध्यात्वा। मानसैरुपचारैः संपूज्य पारायणजपमारभेत् तत्रा
दौ त्र्यंगविद्याजपः॥ तत्र॥४मूले तद्दिननित्याविद्या अः स्सौः हंसः॥४मू. तद्दिननित्याविद्या-
आः स्सौः हंसः॥४मू. तद्दि. इं स्सौः हंसः॥४मू. तद्दि. ईं स्सौः हंसः॥४मू.। तद्दि. उं स्सौः हंसः॥४
मू.। तद्दि. ऊं स्सौः हंसः॥४मूले. तद्दि. ऋं स्सौः हंसः॥४मू. तद्दि. ॠं स्सौः हंसः एवं ४ मू. स्सौः
हंसः इसतंएक पंचाशद्विद्याभिः सह मूलविद्यां जपित्वा। ततः केवलमूलविद्यां त्रिर्जपि ॥१९॥
त्वा॥४ ऐं वद्व वद वाग्वादिनि ऐं क्लीं क्लिन्ने क्लेदिनि क्लेदय महाक्षोभं कुरु कुरु क्लीं सौः मोक्षं कुरु कुरु स्सौः

इति हंसिनीविद्यामेकवारं जपित्वा ॥ ततो वक्ष्यमाण गुरुपादुका विद्यामप्येकवारं जपित्वा
पुनश्चत्वारिंशद्विद्याभिः सह मलविद्यां जपेत् ॥ तद्यथा ॥ तत्र ॐ ३ मू· आंक्षा हसाईं हंसः ॥४
मू· ईला हसाईं हंसः ॥४ मू· ऊहा हसाईं हंसः ॥४ मू· ऋसा हसाईं हंसः ॥४ मू· ॡबा हसाईं हंसः ॥४
मू· ऐशा हसाईं हंसः ॥४ मू· औवा हसाईं हंसः ॥४ मू· अःला हसाईं हंसः ॥३ सप्तधा जपित्वा ॥
पुनः ॥४ मू· आंक्षा ईं हंसः ॥४ मू· आंक्षा ईं हंसः ॥४ मू· ईंक्षा ईं हंसः ॥४ मू· ईंक्षा ईं हंसः ॥४ मू·
ऊहा ईं हंसः ॥ मू· ऊहा ईं हंसः ॥ मू· ऋसा ईं हंसः ॥४ ॠत्या ईं हंसः ॥४ मू· ऌषा ईं हंसः ॥४
मू· ॡषा ईं हंसः ॥४ मू· ऐशा ईं हंसः ॥४ मू· एशा ईं हंसः ॥४ मू· औवा ईं हंसः ॥४ मू· ओवा ईं
हंसः ॥४ मू· अःला ईं हंसः ॥४४ मू· अंला ईं हंसः ॥३ इति षोडश सप्तधा जपित्वा ॥४ मू· अका ईं
हंसः ॥४ मू· इचा ईं चा ईं हंसः ॥४ मू· उय ईं हंसः ॥४ मू· ऋता ईं हंसः ॥४ मू· ऌपा ईं हंसः ॥४ मू·
एपा ईं हंसः ॥४ मू· ओबा ईं हंसः ॥४ मू· अंला ईं हंसः ॥३ सप्तधा जपित्वा ॥४ मू· आंक्षा ईं हंसः ॥४

मू॰ ईंलाईं हं सः॥४ मू॰ ऊंहाईं हं सः॥४ मू॰ ऋंह्लाईं हं सः॥४ मू॰ ऌंबाईं हं सः॥४ मू॰ ऐंशाईं हं सः॥४
मू॰ औंवाईं हं सः॥४ मू॰ अःलाईं हं सः॥ इत्यक्षजपविधि॥ ततः षोडशावांतरयुगभिन्ने
महायुगेयदेवयुगंभविष्यतितदक्षरमारभ्यसर्वाभिर्युगनित्याविद्याभिःसहमूलंजपेत्॥
ततः युक्तांगविद्याजपपूर्वकं पश्चात्कालनित्याविद्याभिःसहमूलविद्यांजपेत्॥ अथयुग
विद्याजपोवर्गद्वयस्याप्यादौ प्रसहे कार्यः॥ ततः प्रथमदिने॥४ मूलविद्यामुच्चार्य अं आ
ईं हं सः॥४ मू॰ अंकाईं हं सः॥४ मू॰ अंखाईं हं सः॥४ मू॰ अंगाईं हं सः॥४ मू॰ अंघाईं हं सः॥४
20 मू॰ अंङाईं हं सः॥४ मू॰ अंचाईं हं सः॥४ मू॰ अंछाईं हं सः॥४ मू॰ अंजाईं हं सः॥४ मू॰ अंझा
ईं हं सः॥ मू॰ अंञाईं हं सः॥४ मू॰ अंटाईं हं सः॥४ मू॰ अंठाईं हं सः॥४ मू॰ अंडाईं हं सः॥४ मू॰
अंढाईं हं सः॥४ मू॰ मू॰ अंणाईं हं सः॥४ मू॰ अंताईं हं सः॥४ मू॰ अंथाईं हं सः॥४ मू॰ अंदाईं ॥२०॥
हं सः॥४ मू॰ अंधाईं हं सः॥४ मू॰ अंनाईं हं सः॥४ मू॰ अंपाईं हं सः॥४ मू॰ अंफाईं हं सः॥४ मू॰ अं

बाईहंसः॥४मं॰ अभाईहंसः॥४मं॰ अमाईहंसः॥४मं॰ अयाईहंसः॥४मं॰ अराईहंसः॥४
मं॰ अलाईहंसः॥४मं॰ अवाईहंसः॥४मं॰ अशाईहंसः॥४मं॰ अषाईहंसः॥४मं॰ असाईहंसः॥४
मं॰ अहाईहंसः॥४मं॰ अलाईहंसः॥४मं॰ अक्षाईहंसः॥ इतिजपित्वा ॥पुनरेवंचतुस्तार
मूलपूर्वकंजपेत्॥ तद्यथा ॥४मं॰ आआईहंसः॥४मं॰ आकाईहंसः॥४मं॰ आसाईहंसः॥४
मं॰ आगाईहंसः॥ इत्यादि॥४मं॰ आक्षाईहंसः॥ इसंतंजपित्वा॥पुनः॥४मं॰ इआईहंसः॥४
मं॰ इकाईहंसः॥४मं॰ इखाईहंसः इत्यादि॰४मं॰ इक्षाईहंसः॥ इसंतंजपित्वा ॥४मं॰ ईआ
ईहंसः॥४मं॰ ईकाईहंसः॥ इत्यादि॰४मं॰ ईक्षाईहंसः॥ इसंतंजपित्वा ॥४मं॰ उआई
हंसः॥४मं॰ उकाईहंसः इत्यादि॰४मं॰ उक्षाईहंसः॥ इसंतंजपित्वा ॥४मं॰ ऊआईहंसः॥४
मं॰ ऊकाईहंसः इत्यादि॰४मं॰ ऊक्षाईहंसः॥ इसंतंजपित्वा ॥४मं॰ ऋआईहंसः॥४
मं॰ ऋकाईहंसः॥ इत्यादि॰४मं॰४ ऋक्षाईहंसः॥ इसंतंजपित्वा ॥४मं॰ ॠआईहंसः॥४

मू॰ ॠकाई हं सः॥ इत्यादि॰४ मू॰ ॠक्षाई हं सः॥ इत्येतं जपित्वा॥४ मू॰ लृ आई हं सः॥४ मू॰ लृ
काई हं सः॥ इत्यादि लृ क्षाई हं सः॥ इत्येतं जपि॰४ मू॰ लॄ आई हं सः॥४ मू॰ लॄकाई हं सः इत्यादि॰
लॄ क्षाई हं सः॥ इत्येतं ज॰४ मू॰ ए आई हं सः॥४ मू॰ ए काई हं सः इत्यादि४ मू॰ ए क्षाई हं सः इत्येतं ज॰४
मू॰ ऐ आई हं सः॥४ मू॰ ऐ काई हं सः इत्यादि४ ऐ क्षाई हं सः॥ इत्येतं जपित्वा॥४ मू॰ ओ आई
हं सः॥४ मू॰ ओ काई हं सः इत्यादि॰४ मू॰ ओ क्षाई हं सः॥ इत्येतं जपित्वा मू॰ औ आई॰ इत्यादि॰४
मू॰ औ क्षाई॰॥४ मू॰ अं आई हं सः॥४ मू॰ अं काई हं सः इत्यादि॰४ मू॰ अं क्षाई हं सः॥ इत्येतं जपि
त्वा४ मू॰ अः आई हं सः॥४ मू॰ अः काई हं सः इत्या अः क्षाई हं सः॥ इत्येतं जपित्वा॥ ॥एवं जपेत्॥
एवं षट्सप्तसुतरपंचशतसंख्याको जपः प्रथमतिथौ मूलविद्यायाः॥ अत्र पारायणे प्रथम
तद्दिनयुगाक्षारात् षोडशस्वरभिन्नादुत्पन्नषट्सप्तसुत्तरपंचशतविद्याभिः सह मूल
विद्यां जपित्वा॥ पश्चात्तद्दिनाक्षरजनितविद्याभिस्तावत्संख्याताभिः सह प्रोक्तेक्रमेण मूल
विद्यां जपेत्॥ ॥२१॥

युगाक्षर द्विनाक्षरे तु तत्त द्दिन निसा विद्यायाः प्रथमाक्षरं द्वितीयाक्षरं च बोद्धव्यं॥ युगाक्षरोथ विद्याजपे विशेषस्तु॥ यस्मिन्युगे यत्स्वरयुतं युगाक्षरं भवति तत्स्वरमारभ्य प्रति स्वरे षट्त्रिंशत् क्रमेण तद्दिसगांति म विद्या पर्यंतं जपित्वा पुनस्तदक्षरं स्यप्रथम स्वर मारभ्य आरब्ध स्वरस्य पूर्व स्वरांत विद्यावधि पजेत्॥ तदा मूलविद्यायाः षट्सप्तयुत्तरपंचशत संख्याको जपो भवति॥ एपत्र युगस्तु षट्त्रिंशद्दिनात्मको भवति॥ प्रागुक्त पूर्णमंडलवत्तेषु षट्सप्तयुत्तरपंचशत संख्याकेष्वेकैकाक्षरस्यैकैक युगं प्रत्ति युगाक्षरत्वे च भवति॥ एतत्सर्वं गुरुमुखात्सम्यग् विज्ञाय पारायणजपः कार्यः॥ दिन निसा विद्या क्रम श्च गुरुमुखादेवावगंतव्य इति॥ एवं द्विपंचाशदुत्तरैक दशशत संख्याको जपो भवंति मूलविद्यायाः॥ अंग विद्या जपस्त्वेकैक वर्गादावेक न वति संख्याकस्तेन वर्गद्वयादौ जपोद्व्यशीत्युत्तर शत संख्याको भवति। केवल मूल विद्या

22

जपोऽपिवारचतुष्टयंस्त्रिरावृत्त्यासाक्षाद्दशधाभवति॥ सेमत्य· षट्चत्वारिंशदुत्तरत्रि
शताधिकसहस्रसंख्याकोजपोभवतिमूलविद्यायाः॥ एवमुक्तसंख्याकंजपमुक्तवि
धिनाकृत्वापुनःकेवलांमूलविद्यांत्रिर्जपित्वागुरूक्तदीपिनीविद्यांगुरुपादुकाविद्यां
चसहैवसकृज्जपित्वा॥४उरलकसहैंहसकलरडींसहकलरऔःनमः॥ रमुत्तो णिविद्यां
सकृज्जपित्वा॥४ममसकलमनोरथान्साधयसाधयपतुभ्यंनमः॥ इतिश्रा र्धनीय
विद्यांसकृज्जप्त्वातांत्रिर्जपेत्॥ इति वर्गद्वयस्यार्थंतत्त्वबोद्धव्यं॥ स्थंपारायण जपंकृत्वा:
इदंस्तोत्रंपठेत्॥ तद्यथा॥ ॐ३क्ष्मांब्रूंग्नीरणखार्कंदुयष्टुप्राययुगस्वरैः॥मातृ
भैरवगांवंदेदेवींत्रिपुरभैरवीं॥१॥कादिवर्गाष्टकाकारसमस्ताक्षरविग्रहां॥अ
ष्टशीत्यपितांदेवींवंदेत्रिपुरभैरवीं॥२॥स्वरषोडशकामांतुषट्त्रिंशद्भिःपरावरैः॥
षट्त्रिंशत्तत्त्ववर्गांवंदेदेवींत्रिपुरभैरवीं॥४षट्त्रिंशतत्त्वसंस्थाप्यशिवचंद्रकलास्व ॥२२॥
वि॥

कादितत्वांतरां वंदे देवी त्रिपुरभैरवी ॥४॥ आईमायाद्वयोपाधिविविचित्रं दुकलावती ॥
सर्वात्मिकां परां वंदे देवी त्रिपुरभैरवी ॥५॥ षडध्वपिंडयोनिस्थां मंडलत्रयकुंडली ॥
लिंगत्रयातिगां वंदे देवी त्रिपुरभैरवी ॥६॥ स्वयंभूहृदयां बाणाभ्रूकामांतस्थितेतरां ॥
प्रामत्रत्यकूचितिं वंदे देवी त्रिपुरभैरवी ॥७॥ अक्षरांतर्गताशेषनामरूपक्रियां परां ॥
शक्तिं विश्वेश्वरीं वंदे देवी त्रिपुरभैरवी ॥८॥ वर्गातं पठितव्यं स्यात्स्तोत्रमेतमाहितैः ॥
इति श्लोका ॥ दिननिसायुक्तमूलविद्यायाप्राणायामत्रयं कृत्वा प्राग्वदृष्यादिन्यासत
द्विननिसाविद्यायाप्राग्वत्करषडंगन्यासं च कृत्वा सकृत्तं जपं देव्यै समर्पयेदिति ॥१॥
एवं द्वितीयदिने प्राग्वदासनपूजाद्यंगविद्याजपांते विधाय ४ म- कआईहंसः ॥४॥
म- ककाईहंसः ॥४ म- कखाईहंसः ॥ इसादि ४ म- क क्षाईहंसः ॥ इति तज्जपित्वा ॥४
को आईहंसः ॥४ म- काकाईहंसः ॥४ मू काखाईहंसः इसादि ४ म- काक्षाईहंसः ॥

२ सं तं तेजपित्ता ॥४ म्र॰ कि=आ ई हं सः ॥४ म्र॰ किका ई हं सः ॥ २ स्यादि॰ ४ म्र॰ किक्षा ई हं सः ॥
२ सं ते जपित्ता ॥ एवं की=आ ई हं सः ॥ की का ई॰ २ स्यादि कीक्षा ई॰ २ सं ते ज॰ ॥४ म्र॰ कु=आ
ई हं सः ॥ कु का ई॰ २ स्यादि॰ कुक्षा ई॰ २ सं ते जपित्ता ॥४ म्र॰ कू=आ ई॰ २ स्यादि॰ ४ म्र॰ कूक्षा ई॰
२ सं तं ज॰ ४ म्र॰ हे=आ ई॰ २ स्यादि॰ ४ म्र॰ हे क्षा ई॰ २ सं ते ज॰ ॥ एवं सर्वत्र ॥४ म्र॰ श=आ ई
23 हं सः २ स्यादि॰ ४ म्र॰ शः क्षा ई हं सः क्षा ई हं सः २ सं तं ५७६ ॥ ज॰ ३१ ॥ द्वात्रिंशत्तमे दिने ॥४
म्र॰ ष=आ ई हं सः २ स्यादि॰ ४ म्र॰ षक्षा ई हं सः २ सं ते ५७६ ॥ ज ॥ ३२ ॥ त्रयस्त्रिंशत्तमे दिने
॥४ म्र॰ स=आ ई हं सः २ स्यादि॰ ४ म्र॰ सः क्षा ई हं सः २ सं तं ५७६ ज॰ ॥ ३३ ॥ चतुस्त्रिंशत्तमे दिने
॥४ म्र॰ ह=आ ई हं सः २ स्यादि॰ ४ म्र॰ हः क्षा ई हं सः २ सं तं ५७६ ॥ ज॰ ३४ ॥ पंचत्रिंशत्तमे
दिने ॥४ म्र॰ ल=आ ई हं सः २ स्यादि॰ ४ म्र॰ लः क्षा ई हं सः २ सं तं ५७६ ॥ ज॰ ३५ ॥ षट्त्रिंशत्तमे दिने
॥४ म्र॰ क्ष=आ ई हं सः २ स्यादि॰ ४ म्र॰ क्षः क्षा ई हं सः २ सं तं ५७६ ॥ जपित्ता ॥ प्राग्वत्सा जपेत्

अत्र षट्त्रिंशद्दिनेषु च प्रागुक्तपरिपाट्या प्रत्यहं षट्चत्वारिंशदुत्तरत्रयोदशशत सं
ख्यं यथा भवति तथा जपं कृत्वा वर्गद्वयस्यान्ते स्तोत्रपाठं च कुर्यात्॥ अत्र वारावृत्ति
पर्याय भेदः पंचधा भवति॥ ॥तथा च तंत्रराजे॥ दिनतो वारतः पक्षान्मासात्षट्त्रिं
शता दिनैः॥ जपं तो वारमेकं तु विद्यानित्या त्मिकास्तु ताः॥१॥ आयुरारोग्यमैश्वर्यं
विजयं वांछितं क्रमात्॥ लभंते ललिताद्याभिः संप्रदायैर्व्रती भवेत्॥२॥ एकस्मिन्
दिवसे त्वेकवारावृत्तौ विधिस्त्वयं॥ मध्याह्नेतु समारभ्य मध्यरात्रे समापयेत्॥३॥ वा
रेषु चैकदा जापे प्रथमे रविवारके॥ वशिन्याः प्रथमं वर्गं कामेश्वर्या द्वितीयकं॥४॥
जप्त्वा वर्गद्वयं मंत्री सोमवारादिषट्स्वपि॥ दिनेषु मोदिनीवर्गादेकैकं प्रजपेत्सुधीः
॥५॥ पक्षेपि चैकदा जापे प्रथमादितिथिष्वपि॥ पंक्तिद्वयोद्याविद्यास्तु प्रजपेत्प्रति
वासरं॥६॥ पंचमीदशमीपंचदशीषु तिथिषु क्रमात्॥ पूर्वास्तु प्रजपेद्विद्याश्चतुःपंक्तिभवाः

सुधीः ॥७॥ मासेप्रतिदिने विद्वानेकैकां योनिमेवतु ॥ पूर्णासुद्दिद्दियोन्युत्थाजपेत्षट्-
स्वपिताः क्रमात् ॥८॥ षट्त्रिंशत्सु दिनेष्वेवमेकैकां योनिमेवतु ॥ जपेत्प्रतिदिनं विद्वा
नेवं पूर्णा भवेत्तिताः ॥९॥ नैताभिः सदृशी कापि विद्या लोकेषु विद्यते ॥ तस्मादाभिः सपा
येत्तैः साधयेत्सर्वमीप्सितं ॥१०॥ यद्यन्निजेप्सितं तत्तदुष्करं सुकरं भवेत् ॥ जपतर्प
णहोमार्चासेकैः संतर्पयेत्स्थिरः ॥११॥ पंचाशद्वारमावर्त्या विद्यां भक्तिसमन्वितः ॥
मुच्यते निगडैः क्रूरैर्वैरिरोधैः सुदारुणैः ॥१२॥ शतवारं समावर्त्य विद्यां विविधवैभवाः ॥

लभते तनयान्वध्याप्यपि सर्वगुणान्वितान् ॥१३॥ ऽपध्य द्विशतवारं तु विद्याभ्या
वर्त्य भक्तितः ॥ गुणरूपादिसंपन्नां भार्यां विंदत्ययत्नतः ॥१४॥ तावद्वावर्त्य कन्या वा
पतिं सर्वगुणान्वितं ॥ लभते पुत्रपौत्राद्यैरेधते संपदन्विता ॥१५॥ त्रिशततः समाव
र्त्य दारिद्र्यान्मुच्यते ध्रुवं ॥ त्रिशते भूमिसस्याढ्यश्चतुर्भिश्शतैर्धनी ॥१६॥ पंचभि ॥२४॥

स्तुशतैर्नृपो भवेत् षड्भिः शतैर्नृपः ॥ सप्तभिस्तुशतैस्तस्य नमुंचत्यन्वयं रमा ॥१७॥
अष्टभिस्तुशतैस्तासां नृपाः सर्वेस्य किंकराः ॥ नवभिस्तुशतैरेवं कंदर्पो वनिताजने
॥१८॥ एवं नवशतं जप्त्वा सर्वान्कामानवाप्नुयात् ॥ समस्तभजनं तासामुक्तं सर्वार्थ
सिद्धिदं ॥१९॥ इति ॥ अथैतेषां विषमपदव्याख्या ॥ दिनतस्मादि भवेदित्यंतः सार्द्ध
द्वयश्लोकस्य स्पष्टार्थः ॥ एकवारारभ्य तो षट्त्रिंशदुत्तरसप्तशताधिकविंशतिसहस्रसं
ख्याभिः कालनित्याविधाभिः सहमूलविद्यायास्तावत्संख्याजपेनोक्तविधिना प्रसह
क्रियमाण इत्यर्थः ॥ वीरेषु रविवारादिशनिवारांतेषु सप्तसु वशिन्यादीनां वर्गास्तद्ग्रेन्या
सप्रकरतो स्फुटीकरिष्यामः ॥ वर्गः पंक्तिर्योनिरिति पर्यायः ॥ सेकः अभिषेकः स्थिरः
निश्चलभक्तिमान् पंचाशदित्यादि त्रिभिः श्लोकैः प्रपंचितः काम्यजपः केवलकालनि
त्याविधानामेव अन्येपि काम्यप्रयोगा बहवः संति ते तत्र ग्रंथगौरवभयान्नास्मा

भिर्लिखिताः गुरुतः शास्त्रतः उपबोद्धव्याः ॥ ॥अथ कालचक्ररचनाप्रकारः॥ ततः॥
प्रथमतः कंचिद्बिंदुं कृत्वा तं परितः षडंगुलमानेन वृत्तं कृत्वा तद्बहिरप्येकैकांगुलांत
रालमानतः षोडश वृत्तानि रचयित्वा प्रथमकृतवृत्तेन सह सप्तदश वृत्तानि निष्पाद्य तानि
वृत्तानि षट्त्रिंशद्रेखाभिर्विभज्य षोडश षोडश कोष्ठयुक्ताः षट्त्रिंशद्वीथीर्निष्पाद्य त
सु खाग्र वीथ्यां सर्वबाह्यस्थकोष्ठमारभ्य प्रवेश गत्या अ आ इ ई उ ऊ ऋ ॠ ऌ ॡ ए ऐ
ओ औ अं अः॥ इति विलिख्य॥ ततः प्रादक्षिण्यक्रमप्राप्तद्वितीयवीथ्यां तथैव बाह्यको
ष्ठमारभ्य के का कि की कु कू कृ कॄ कॢ कॣ के कै को कौ कं कः॥ तृतीय विथ्यां॥ ख खा खि खी
खु खू खृ खॄ खॢ खॣ खे खै खो खौ खं खः॥ चतुर्थ विथ्यां॥ ग गा गि गी गु गू गृ गॄ गॢ गॣ गे गै
गो गौ गं गः॥ पंचमवीथ्यां॥ घ घा घि घी घु घू घृ घॄ घॢ घॣ घे घै घं घः॥ षष्ठ विथ्यां॥ ङ ङा ङि ङी
ङु ङू ङृ ङॄ ङॢ ङॣ ङे ङै ङो ङौ ङं ङः॥ सप्तमवीथ्यां॥ चवर्गः॥ एवं सर्वत्र॥ वीथ्यां न्यसेत्॥ १६ ॥२५॥

छवर्गः ॥ अष्टमवीथ्यां ॥ नवमवीथ्यां जवर्गः ॥ दशमवीथ्यां झवर्गः ॥ एकादशवीथ्यां
ञवर्गः ॥ द्वादशवीथ्यां टवर्गः ॥१३ वी॰ ठवर्गः ॥१४ वीथ्यां डवर्गः ॥१५ वीथ्यां ढवर्गः ॥१६
वीथ्यां णवर्गः ॥१७ वीथ्यां तवर्गः ॥१८ वीथ्यां थवर्गः ॥१९ वीथ्यां दवर्गः ॥२० वीथ्यां धवर्गः २१
वीथ्यां नवर्गः ॥२२ वीथ्यां पवर्गः ॥२३ वीथ्यां फवर्गः ॥२४ वीथ्यां बवर्गः ॥२५ भवर्गः ॥२६
मवर्गः ॥२७ वीथ्यां यवर्गः ॥२८ वीथ्यां रवर्गः ॥२९ वीथ्यां लवर्गः ॥३० ववर्गः ॥३१ वीथ्यां शवर्गः
॥३२ वीथ्यां षवर्गः ॥३३ वीथ्यां सवर्गः ॥३४ वीथ्यां हवर्गः ॥३५ वीथ्यां ळवर्गः ॥३६ वीथ्यां क्ष सं १
वर्गः ॥ एवं षट्त्रिंशद्वीथीषु षट्सप्तत्युत्तरपंचशतरेखाकोष्ठपूर्तमंडले वर्णानालिख्य
कर्णिकायां ॥ आईं हंसः इति वर्णचतुष्टयं विलिख्य सर्वबाह्ये वृत्ताद्बहिर्वृत्तत्रयं निष्पाद्य
सकेसरमष्टदलकमलं विलिख्य तद्बहिश्चतुरस्रं कुर्यात् ॥ अत्र वर्णविन्यासे मध्यस्थदेव
ताभिमुखाः सर्ववर्णा यथा भवंति तथा लेख्याः ॥ इति कालचक्ररचनाप्रकारः ॥ एतच्छ्रु

॥२६॥ कास्याः षट्सप्तत्युत्तरपंचशतभेदाः संति तत्सर्वं तत्र देव्याः पूजनप्रकारं तत्कालीनिच
गुरुतः शास्त्रतः अवबोद्धव्यं ॥ ग्रंथगौरवभयाद् अत्र न लिखितमिति ॥ ॥ एवं कारायत्त
जपं विधाय ततो गुरुर्दिक्पतिग्रहान् प्रणम्य श्रुचीदकपूर्णपात्रमादाय हृदिस्थं देव
तां स्मरन् मूलमंत्रस्तोत्रं वा स्तपन् मौनी स्वपदमात्रदृष्टिः स्वगृहं गत्वा शरीरस्थितिवीहीता
स्नातं स्वपापं स्मरन् प्रणवमुच्चार्य ॥४ देव त्वं प्राहेति चित्तं पापाक्रांतमभ्रमभ्रमा ॥ तन्निःसारय
26 चित्तान्मे पापं फट् फट् फट् ॥ तेन मः सूर्यः सोमो यमः कालो महाभूतानि पंच च ॥ एते
शुभाशुभस्येह कर्मणो नव साक्षिणः ॥ ॥इति पठित्वा॰ हुं फट् इति क्रोधदृष्ट्या पार्श्वदि
यमूर्ध्वमधश्चावलोक्य सुमनाः मत्वा गृहांतः प्रविश्य हस्तौ पादौ प्रक्षाल्याचम्य गृहांग
णे सुसमे गोमयोपलिप्ते भूप्रदेशे सिंदूरादिना हृत्तस्फत्तमंडलं ततः स्वासनमास्तीर्य ॥४ ॐ ह्रीं
आधारशक्तिकमलासनाय नमः इत्यासनं संपूज्य तत्रोपाङ्मुखः उपविश्य वक्ष्यमाणमाहूर्ते ॥२६॥

भैरवमंत्रेण प्राणायामत्रयं कृत्वा । शिरसि ४ देवभाग ऋषये नमः ॥ मुखे ४ देवी गायत्री
छंदसे नमः ॥ हृदये ४ श्री मार्त्तंडभैरवाय देवतायै नमः ॥ इति विन्यस्य मम सर्वाभीष्ट
सिद्धये सूर्यार्घ्यदाने विनियोगः ॥ इति कृतांजलिर्वदेत् ॥ ततः ॐ घ्रां ह्रां ध्रां हृदयाय
नमः ॥ ॐ घ्रीं ह्रीं घ्रीं शिरसे स्वाहा ॥ ॐ घ्रुं ह्रुं घ्रुं शिखायै वषट् ॥ ॐ घ्रैं ह्रैं घ्रैं कवचाय हुं ॥
ॐ घ्रौं ह्रौं घ्रौं नेत्रत्रयाय वौषट् ॥ ॐ घ्रः ह्रः घ्रः अस्त्राय फट् ॥ इति मंत्रांगुष्ठादि
कनिष्ठांतं करयोर्विन्यस्य हृदयादिषु विन्यसेत् ॥ ततो ध्यानं ॥ हेमांभोजप्रवाले
प्रतिमनिजरुचिं चारुखट्वांगपद्मे चक्रं शक्तिं च पाशं सृणिमपि रुचिरामक्षमालां
कपालं ॥ हस्तांभोजैर्दधानं त्रिनयनविलसद्वेदवक्त्राभिरामं मार्त्तंडं वल्लभांकं मणि भि ३
मयमुकुटं हारदीप्तं भजामः ॥ १ ॥ दक्षाधःऊर्ध्वयोराद्ये - तदाद्यधस्तयोरन्ये - तदाद्यध
स्थयोरपरे - तदाद्यधस्थयोरितरे - रसायुधध्यानं ॥ इति स्वैक्येन ध्यात्वा मनसा पूज

यित्वा ताम्रादिपात्रे सिंदूरकुंकुमादिना त्रिकोणवृत्तकर्णिकं सकेसरमष्टदलकमलं
निर्माय तद्बहिर्वृत्तं च चतुर्द्वारोपेतं चतुरस्रं च कृत्वा तद्बहिर्वृत्तत्रयं भ्रामयेदिति पूजा
मंडलं कृत्वा तत्र सूर्यमंत्रेण पुष्पं दत्वा वक्ष्यमाणविधिना सामान्यार्घ्यं विधाय तेनैव
द्वादशाधाभिमंत्र्यतेनोदकेन मंडलं स्वात्मानं पूजोपकरणानि चाभ्युक्ष्य॥ तत्र॥ ॐ
27 मंमंडूकाय नमः॥ एवं· कालाग्निरुद्राय नमः॥ मूलप्रकृत्यै नमः॥ आधारशक्तये·
कूर्माय· अनंताय· वराहाय· पृथिव्यै· क्षीरसमुद्राय नमः· श्वेतद्वीपाय· कल्पवाटिकायै·
मणिमंडपाय नमः रत्नवेदिकायै· रत्नसिंहासनाय नमः इत्युपर्युपरि संपूज्य· च
तुरस्रे पूर्वादि चतुर्दिक्षु मध्ये च· ॐ प्रं प्रभूताय नमः॥ विमलाय नं· साराय नं समा
राध्याय· मध्ये· परमसुखाय· तत्र॥ आग्नेयादि कोणेषु॥ ॐ धं धर्माय· ज्ञानाय· वैरा
ग्याय· ऐश्वर्याय· ततः स्वाग्यादि चतुर्दिक्षु ॐ अं अधर्माय नमः॥ अज्ञानाय· अवै
राग्याय· ॥२५॥

अनैश्वर्याय·मध्ये·अनंताय·पद्माय·आनंदकंदाय·संविन्नालाय·प्रकृतिमय
पत्रेभ्यो·विकारमयकेसरेभ्यो·पंचाशद्वर्णबीजाढ्यसर्वतत्त्वरूपायैकर्णिकायै
नमः॥ सं सत्त्वाय·रं रजसे·तं तमसे·आं आत्मने·अं अंतरात्मने·पं परमात्मने॥
ह्रीं ज्ञानात्मने·मं वह्निमंडलाय·उं सोममंडलाय·अं अर्कमंडलाय·ततोऽष्टदलकें
रेषु·मध्ये च॥ रां दीप्तायै·रीं सूक्ष्मायै·रूं जयायै·रें भद्रायै·रैं विभूत्यै·रों विमलायै·
रौं अमोघायै·रं विद्युतायै·मध्ये रः सर्वतोमुख्यै॥ इतिपीठशक्तीः संपूज्य·ॐ ब्र
ह्मविष्णुशिवात्मकाय सौराय योगपीठाय नमः॥ इति पीठसंपूज्य· तत्कर्णिकायां·
पूर्वादिचतुर्दिक्षु·ॐ उं उषायै नमः। ॐ प्रं प्रज्ञायै·ॐ प्रं प्रभायै·ॐ सं संध्यायै·इति चतुःशक्तिः
तैः संपूज्य·मार्तंडभैरवमंत्रमुच्चार्य·श्रीमार्तंडभैरवमूर्तिं कल्पयामीति मध्ये मूर्तिं परि
कल्प्य पुनर्मंत्रमुच्चार्य·मार्तंडभैरवमूर्तये नमः इति मूर्तिं संपूज्य कराभ्यां पुष्पांजलिं

माद्यहृदयकमले देवं तेजोरूपं ध्यात्वा सुषुम्णामार्गेणावहन्नासापुटाध्वनीतं तेजः
करस्थपुष्पांजलावानीय सूर्यमेवमुच्चार्य भगवन् सूर्य इहागच्छागच्छेति तस्यां मूर्तौ पु
ष्पांजलिक्षेपेण तत्तेजः (करस्थपुष्पां) समावाह्य यथोक्तरूपं देवं ध्यात्वा पूर्वोक्तषडंग
न्यासेन सकलीकृत्य प्राणप्रतिष्ठां विधाय पद्मबिंब मुद्रां प्रदर्श्य सूर्यमेवमुच्चार्य श्रीमार्त
ण्डभैरव एतत्ते आसनं नमः॥ एवं एष ते अर्घ्यः स्वाहा मूर्ध्नि॥ एतत्ते पाद्यं नमः पादयोः॥
एतत्ते आचमनीयं सुधेति मुखे॥ एष ते मधुपर्कः। सुधेति मुखे॥ एतत्ते आचमनीयं
सुधेति मुखे॥ एवं स्नानं नमः॥ आचमनीयं सुधेति मुखे॥ वाससा नमः॥ आचमनीयं
सुधा मुखे॥ उपवीतं नमः आचमनं सुधा मुखे॥ अलंकारो नमः। गंधो नमः पुष्पाणि वौषट्
इति पुष्पांतानुपचारान् दत्वा॥ अथावरणपूजां कुर्यात्॥ सा यथा॥ कर्णिकायां पूर्वादि चतु
र्दिक्षु ॐ ह्रां सूर्याय नमः॥ ॐ ह्रीं भास्कराय नमः॥ ॐ ह्रूं भानवे नमः॥ ॐ ह्रैं रवये नमः॥

ॐ शं शनैश्चराय नमः॥ ॐ रां राहवे नमः॥ ॐ कें केतवे नमः। तद्बाह्ये दिक्पालांस्तदायुधानि च पूजयेत्॥ १

ततः आग्नेयादि चतुर्दिक्षु। ॐ ह्रौं दिवाकराय नमः॥ इति पंच मूर्तीः संपूज्य अष्टदल केसरेषु। आग्नेये॥ ॐ ह्रां ह्रीं ह्रां हृदयाय नमः॥ नैर्ऋत्ये ॐ ह्रीं ह्रीं ह्रीं शिरसे नमः। वायव्ये॥ ॐ ह्रूं ह्रूं ह्रूं शिखायै नमः॥ ईशान्यां॥ ॐ ह्रैं ह्रैं ह्रैं कवचाय नमः। पूर्वादि चतुर्दिक्षु। ॐ ह्रः ह्रः ह्रः अस्त्राय नमः॥ देवाग्रे॥ ॐ ह्रौं ह्रौं ह्रौं नेत्रत्रयाय नमः॥ ततोऽष्टदलेषु॥ देवाग्रदलमारभ्य। ॐ सों सोमाय नमः॥ ॐ मं मंगलाय नमः॥ ॐ बुं बुधाय नमः॥ ॐ बृं बृहस्पतये नमः॥ ॐ शुं शुक्राय नमः॥ ॐ लं इंद्राय नमः। एवं रं अग्नये नमः॥ टं यमाय नमः॥ क्षं नैर्ऋतये नमः। वं वरुणाय नमः॥ यं वायवे नमः॥ सं सोमाय नमः॥ हं ईशानाय नमः॥ ईं ईशानयोर्मध्ये। निर्ऋति वरुणयोर्मध्ये च॥ आं ब्रह्मणे। ह्रीं अनंताय। ततो दिक्पालानां पार्श्वेषु। वं वज्राय नमः॥ शं शक्त्यै। दं दंडाय नमः। खं खड्गाय। पां पाशाय। ध्वं ध्वजाय। अं अंकुशाय नमः। गं गदायै नमः। त्रिं त्रिशूलाय नमः। पं पद्माय नमः। चं चक्राय नमः। इत्यावरणानि संपूज्य॥ धूपदीपनैवेद्यादीनि दत्त्वा स्व

पुरतो वृत्ताकारं मंडलं निर्माय॰ मार्त्तण्डभैरवार्घमंडलाय नमः इति मंडलं संपूज्य।।
प्रस्थमात्रजलग्राहिताम्रार्घन्यूनममलक्षालितं पात्रं साधारं तत्र निधाय॰ सूर्यमंडल
ले न ध्यायन् सूर्यमंत्रं जपन् शुद्धोदकैः संपूर्य कुशतिलश्यामाककुंकुमचंदनरोचना
करवीरपुष्पाणि निक्षिप्य कुशैराच्छाद्य॰ घ्रिं घ्रौं घ्रिं इति सूर्यमंत्रम् अष्टोत्तरशतवारं
जप्त्वा पात्रं स्पृशन् जपित्वा मार्त्तण्डभैरवं ध्यायन् जानुभ्याम् अवनीगतः कराभ्यां तत्पात्र
29 मामस्तकमुत्थाप्य॰ घ्रिं घ्रौं घ्रिं श्रीमार्त्तण्डभैरवाय प्रकाशशक्तिसहिताय द्वादश
कलात्मने सग्रहराशिनक्षत्रतिथिवारयोगकरणपरिवृत्तसनसंस्थिताय श्रीसू
र्य्यायार्घं समर्पयामि स्वाहेति मंत्रेणार्घं दत्वा महामुद्रया स्वदृष्टिपथमाच्छाद्य मा
र्त्तण्डभैरवं तद्धाम्नि तत्परिस्फुटं विभावयन् पूर्वोक्तसूर्यमंत्रेण पुष्पांजलिं दत्वा प्राणाया
मादिपूर्वकं स्वमंत्रं यथाशक्तिं जपित्वा प्राणायामादिपूर्वकं जपं समर्प्य स्तुत्वा प्रणम्य ।।२९।।

क्षमस्वेति मार्त्तण्ड भैरवं खेविसर्ज्य ऐशान्ये तेजश्चण्डाय नम इति निर्माल्यं क्षिपेत्॥ ॥इति सूर्यार्घ्यदानविधिः॥ ॥अयं मुख्यकल्पः॥ तदशक्तौ सूर्यमण्डल एव व्योम्नि साबरणां मार्त्तण्ड भैरवं ध्यायन्यथोक्तविधिना अर्घ्यं दद्यादिति मध्यमः कल्पः॥ केवलमंत्रमात्रेणार्घ्य दानं दत्वाप्यकल्पः॥ एवं पूजायाः पूर्वं सूर्यार्घ्यदानमावश्यकमिति॥ ॥ततः शिवपूजां कुर्यात् मे उपचारपूजां कुर्वीत॥ तत्र पार्थिवं सर्वसिद्धिदमिति श्रुतेः पार्थिवलिङ्गपूजनं प्रशस्तं॥ तत्पूजनप्रकारस्तु गोमयोपलिप्ते शुचौ देशे प्राक् सूर्यपूजोक्तविधिना स्वासने संपूज्य तत्रोदङ्मुख उपविश्य प्रायश्चित्तादि तिथ्युल्लेखनान्ते श्रीपरदेवतार्चनाधिकारार्थं पार्थिवलिङ्गपूजनमहं करिष्ये। इति संकल्प्य॥ ॐ सर्वाधारधरे देवि त्वद्रूपां मृत्तिकामिमां॥ महीष्यामि प्रसन्नात्वं लिङ्गार्थं भव सुप्रभे॥१॥ इति मृत्तिकां प्रार्थ्य ॐ हराय नमः। इति शुचिस्थानात् शुभ्रां सुस्निग्धां मृदमादाय संशोध्य ॐ महेश्वराय नमः इति संघट्ट

नं विधाय स्वपुरतः ॐ शूलपाणये नमः इति पीठे संस्थाप्य पुष्पांजलिमादाय
हृदि तेजोरूपं देवं ध्यात्वावहन्या साध्य नाबहिर्निःसार्य करस्थपुष्पांजलौ तत्तेजः संयो
ज्य ॐ पिनाकधृक् इहागच्छागच्छेति तस्मिन् लिंगे पुष्पांजलिक्षेपेणावाह्य ॐ शूल
पाणे इह तिष्ठ तिष्ठेति संस्थाप्य ॐ पशुपतये नमः इति शुद्धजलैः स्नापयित्वा ॐ शि
वाय नमः इति गंधपुष्पाणि निवेद्य वेद्यादामावर्त्तेन स्वाग्रमारभ्य ॐ शर्वाय क्षिति
मूर्तये नमः ॥ ॐ भवाय जलमूर्त्तये नमः ॥ ॐ रुद्राय अग्निमूर्त्तये नमः ॥ ॐ उग्राय वायुमू
र्त्तये नमः ॥ ॐ भीमाय आकाशमूर्त्तये नमः ॥ ॐ पशुपतये यजमानमूर्त्तये नमः ॥ ॐ महा
देवाय सोममूर्त्तये नमः ॥ ॐ ईशानाय सूर्यमूर्त्तये नमः ॥ इति संपूज्य प्रणालिकायां ॐ
ह्रीं उमायै नमः ॥ इति पूजयेत् ॥ ततः सांगाय सपरिवाराय श्रीशिवाय नमः ॥ इति च संपूज्य
ॐ शिवाय नमः इति त्रिरर्घ्यपाद्यताम्बूलान्तानुपचारान् दत्वा ॥ ॐ सर्वज्ञ ज्ञानविज्ञानप्रद ॥३०॥

नैकमहात्मने॥नमस्तेदेवदेवेशसर्वभूतहितेरत॥१॥अनंतकीर्तिसंपन्नअनेकासन
संस्थित॥अनंतकोतिसंयोगपरमेशनमोस्तुते॥२॥परापरपरातीतउत्पत्तिस्थिति
का॥सर्वार्थसाधनोपायविश्वेश्वरनमोस्तुते॥३॥स्वभावनिर्मलाभोगसर्वव्याधिविना
शन॥योगियोगिमहायोगियोगेश्वरनमोस्तु॥४॥स्तुत्वालिंगप्रतिष्ठोतुस्तवमेनमुदी
रयेत्॥लिंगस्तवंमहापुन्यंयःशृणोतिसदानर॥५॥नोमद्यतेचसंसारेस्थानंप्राप्नोति
शाश्वतं॥तस्मात्सर्वप्रयत्नेनशृणुयाल्लिंगसंस्तवं॥६॥पापकंचुकेनिर्मुक्तःप्राप्नोति
परमंपदं॥इतिस्तुत्वाएकाग्रमनाइमंमंत्रंपठेत्॥अंगहीनंक्रियाहीनंविधिहीनंमहेश्वर॥
पूजितोसिमयादेवतत्क्षमस्वप्रमात्कृतं॥१॥यद्यप्युपहतैरपात्रैर्भावदूषितैः॥केरी
किटपविद्धैश्चपूजितोसिमयाप्रभो॥२॥अन्यत्रासक्तचित्तेनक्रियाहीनेनवाप्रभो॥म
नोवाकायदुष्टेनपूजितोसित्रिलोचन॥३॥यच्चोपहतपात्रेणाकृतमघादिकंमया॥तामसेन

च भावेन तत्क्षमस्व मम प्रभो ॥४॥ मंत्रेणाक्षरहीनेन पुष्पेन विफलेन च ॥ पूजितोसि महा
देव तत्सर्वं क्षम्यतां मम ॥५॥ व्रतं संपूर्णतां यातु फलं चाक्षय्यमस्तु मे ॥ इति पठित्वा प्र
दक्षिणानमस्कारैः सम्यक् परितोष्य श्रीमहादेव क्षमस्वेति स्वात्मनि संहारमुद्रया वि
सृज्य निर्माल्यमादाय ॐ चंडेश्वराय नम इति ईशानकोणे निक्षिप्य तत्र लिंगं निर्मा
ल्यपुष्पार्चादिकं च जलेध्ये वा धारी विसृजेत्. अत्र पार्थिवलिंगपूजायां पार्थिवलिंगं
यथा यथा वृहत्तथा तथा फलं कैवाकुर्त्यं. यथा यथा सूक्ष्मं तथा तथा फलमल्पं ॥ सू
क्ष्मे पि फलत्रयान्न्यूनं न कार्यमिति पार्थिवलिंगपूजनप्रकारः ॥ ॥अथ द्वारपूजा॥
तत्र स्वर्णप्राकारस्य पूर्वद्वारेणान्तः प्रविश्य प्रादक्षिणेन मंडपस्य पश्चिमद्वारं गत्वा
तद्वारस्य मण्डपं प्रदक्षिणीकृत्य पश्चिमद्वारेण तं प्रविश्य साधकः पूजयेद्देवी
मिति क्रमस्तेनैव क्रमेण द्वारपूजनमिति ॥ याग मंडपस्य प्राकारासंभवे मंडपस्य द्वा
॥३१॥

गतस्त्र दसंमवेयागमंडपस्यपश्चिमेद्वारमंडपासंमवगोमयोपलिप्तायाःयागभूमेःप
श्चिमेभागेक्ष्मापिस्थित्वासामान्यार्घंविधायैवंकल्पयित्वाक्रमेणपूजये ॥ तद्यथा ॥ कोटि
कोटियोजनविस्तीर्णसुधार्णवचतुष्टयांतर्गतंकोटियोजनविस्तीर्णयामंमहाद्भुतेनवरत्न
३२ मयंद्वीपंसहस्रादित्यतेजसंतन्मध्यवर्तीयांशेमदनोन्मादनंनाममनानापुष्पलताकुलंकदं
बकाननगर्भंनंदनोद्यानंतन्मध्यवर्तीयांशेकोटिसूर्यप्रतीकाशोज्ज्वलत्स्वर्णप्राकारवेष्टितं
नानासुरभिशालितोरणद्वारनानारत्नमंडितंपरितःसेवार्थमायातेंद्रादिदेवगणसमाकु
लंमाणिक्यमयंश्रीमंडपंध्यात्वासामान्यार्घोदकेनाभ्युक्ष्यपुष्पादिभिःक्रमेणपूजयेत् ॥
तद्यथा ॥४ सुधार्णवचतुष्टयायनमः ॥४ अं ५१ नवखंडविराजितायनवरत्नद्वीपायनमः ॥४
नंदनोद्यानायनमः ॥४ स्वर्णप्राकारायनमः ॥ तद्द्वारस्यदक्षिणोत्तरशाखयोरूपर्यधश्च ॥४
गंगणेशायनमः ॥४ क्षं क्षेत्रपालायनमः ॥४ द्वां द्वारश्रियैनमः ॥४ देहल्यैनमः ॥ इति

संपूज्य॥ प्राकारांतः प्रविश्य प्रदक्षिणाक्रमेणेंद्रादिदशदिक्पालान्स्वस्वदिक्षु संपूज्य मणिमंडपस्य पश्चिमद्वारं गत्वा सामान्यार्घ्यं वक्ष्यमाणविधिना संस्थाप्य तेनोदकेनास्त्रमंत्रेण तोरणद्वारमभ्युक्ष्य सामान्यार्घ्यकरणोक्ताम्रादिपात्रस्थजलं मूलेनाष्टवारमभिमंत्र्य धेनुमुद्रया मृतीकृत्य तेनोदकेन वा प्रोक्षयेत्॥ ततः ४ कदंबकाननाय॥ तद्दक्षिणे ४ कामदेवरतिभ्यां॥ तदुत्तरे ४ वसंतप्रीतीभ्यां नमः॥ इति संपूज्य॥ ४ श्रीरत्नमंडपाय नमः॥ इति मंडपं संपूज्य तोरणद्वारस्य पश्चिमभागे द्वाराभिमुखमुपविष्टां वाराहीं वक्ष्यमाणरूपां ध्यात्वा तद्विद्यया तां संपूज्य तद्द्वारमस्त्रेणाभ्युक्ष्य द्वारस्योर्ध्वशाखायां दक्षिणे ४ मां महालक्ष्म्यै नमः॥ वामे ४ सं सरस्वत्यै नमः॥ मध्ये ४ दुं दुर्गायै नमः॥ ४ द्वां द्वारश्रियै नमः॥ द्वारस्य दक्षिणवामशाखयोरधोधः क्रमेण ४ शं शंखनिधिवसुधाराभ्यां नमः॥ ४ पं पद्मनिधिवसुमतीभ्यां नमः॥ ४ गं गणपतये नमः॥ ४ क्षें क्षेत्रपालाय नमः॥ ४ मां मायाशक्त्यै नमः॥ ४

स

चिं चित्रायै नमः॥४ गं गंगायै नमः॥४ यं यमुनायै नमः॥४ धं धात्रे ४ विं विधात्रे दहल्यां देहल्यै द्वाराग्रे ४ वं वरुणाय नमः इति पश्चिमद्वारं संपूज्य॥ ततो नरद्वारं गत्वा तथैवाभ्युक्ष्य तस्योर्ध्वशाखायो दक्षिणवामपार्श्वयोः प्राग्वन्महालक्ष्मीरसरस्वत्यौ संपूज्य मध्ये ४ बं बटुकाय नमः॥४ द्वां द्वारश्रियै पुनः पूर्ववत्सत्रांखवनिध्यादि देहल्यं तं संपूज्य द्वाराग्रे ४ सों सोमाय नमः॥ इति संपूज्य॥ ततः पूर्वद्वारं गत्वा तथैवाभ्युक्ष्य तस्योर्ध्वशाखायां दक्षिणवामपार्श्वयोः प्राग्वन्महालक्ष्मीरेस्वत्यौ संपूज्य मध्ये ४ क्षं क्षेत्रपालाय नमः॥४ द्वां द्वारश्रियै नमः॥ पुनः प्राग्वच्छंखनिध्यादि देहल्यं तं संपूज्य द्वाराग्रे ४ लं इन्द्राय नमः। ततो दक्षिणद्वारं गत्वा पूर्ववदभ्युक्ष्य तदूर्ध्वशाखायां दक्षिणवामपार्श्वयोः प्राग्वन्महालक्ष्मी सरस्वत्यौ संपूज्य मध्ये ४ गं गणनाथाय नमः॥४ द्वां द्वारश्रियै नमः॥ इति संपूज्य द्वारशाखयोः प्राग्वच्छंखनिध्यादि देहल्यं तं संपूज्य द्वाराग्रे ४ टं यमाय। ततः पुनः

33

पश्चिमद्वारं गत्वा वामपादपुरःसरं तत्तोरणात् प्रविश्य ॥ ॐ रत्नसोपानपंक्तये नमः इति
सोपानपंक्तिं संपूज्य ताम् आरुह्य मंडपस्य पश्चिमद्वारादि चतुर्द्वारेषु पंचस्थदेवताः संपू
जयेत् ॥ तत्र प्रथमं तिरस्कारिणीं ॥ श्यामवर्णां मदाघूर्णारक्तनेत्रत्रयान्वितां ॥ कृष्णांबरां ग
दां खड्गं दधतीं च भुजद्वये ॥१॥ दोर्भ्यां मनोहराभ्यां च खर्जूरीकुंभधारिणीं ॥ नीलां तुरंग
मारूढां प्रौढां पीनघनस्तनीं ॥२॥ मुक्तकेशीं विवसनां सर्वालंकारभूषितां ॥ स्वयोनिद॥
र्शनान्मुह्यत्समस्तवर्गां स्मरेत्तु ॥३॥ कृष्णांबरामिति कृष्णवर्णं प्रच्छदपटं । विवसना
मधोवस्त्ररहितां । खर्जूरीकुंभधारिणीं खर्जूररसभरितकुंभधारिणीम् इत्यर्थः ॥ दक्षा
घूर्णयोरधो ऽवस्थयोः कुंभमिति ध्यात्वा पश्चिमद्वाराग्रे किंचिद्दक्षिणे ॐ ऐं नमो भगवति
माहेश्वरि पशुजनमनश्चक्षुस्तिरस्करणं कुरु कुरु स्वाहा ॥ तिरस्करिणी देवी श्रीपादु
कां ॥ इति संपूज्य मंचस्थदेवताः पूजयेत् ॥ तत्पूजाक्रमस्तु डीत्रामते ॥ सरस्वती रमा चैव ॥३३॥

पश्चिमे परिपूजयेत्॥ मायां दुर्गां दक्षिणे तु पूजयेत्परमेश्वरि॥१॥ भद्रकालीं ततः स्वस्तिं
पूर्वे च परिकल्पयेत्॥ स्वाहां शुभंकरीं गौरीं यक्षे च परिपूजयेत्॥२॥ वागीशीं लोकधा
त्रीं च दक्षपश्चिमद्वारके॥ एतामं च स्थिताः पूज्या यथानुक्रमयोगतः॥३॥ इति। अथैता
सां पूजा यथा॥ पश्चिमद्वारस्य वामभागे॥४ सों सरस्वती श्री· दक्षिणभागे ४ मां महा
लक्ष्मी श्री· ततो दक्षिणद्वारि। वामभागे ४ मां माया श्री॰ दक्षणभागे ४ दुं दुर्गा श्री· ततः पूर्व
द्वारि॥ वामे ४ भद्रकाली श्री॰ दक्षे ४ स्वं स्वस्ति श्री· तत उत्तरद्वारे· वामे ४ स्वां स्वाहा श्री॰
दक्षे· ४ शुं शुभंकरी श्री॰ द्वाराग्रे· ४ गौ गौरी श्री॰ पुनर्दक्षिणद्वारं गत्वा तद्वाराग्रे ४ लों लो
कधात्री श्री· ततः पश्चिमद्वारं गत्वा द्वाराग्रे· ४ वां वागीश्वरी श्री॰ इति संपूज॥ पालितं
बहुभिर्ब्रह्माद्यैः परमैश्वर्यशोभितं॥ प्रपद्ये पश्चिमद्वारं भवान्या मंदिरं महत्॥१॥ इति ध्या
त्वा ४ पश्चिमद्वाराय मंडपायतनमरतिमंडपं संपूज्य· तालत्रयपूर्वकं तद्द्वारमुद्घाट्य

सिद्धार्थाक्षतभस्माङ्कुशकुसुमानि नाराचास्त्रप्रयोगेण ॥४॥ अपक्रामंतु भूतानि पिशा
चाः प्रेतगुह्यकाः ॥ ये चात्र निवसंत्यन्ये देवता भुवि संस्थिताः ॥१॥ अपसर्पंतु ये भूता
ये भूता भुवि संस्थिताः ॥ ये भूता विघ्नकर्त्तारस्ते नश्यंतु शिवाज्ञया ॥२॥ इत्यस्त्र
मुच्चरन्‌ मं ३ पं तः प्रक्षिप्य तस्मिन्निर्गच्छतां विघ्नसंघानां स्ववामांगसंकोचेन मार्ग
दत्वा त्रिविधविघ्नानुत्सारयेत्‌ ॥ तद्यथा ॥४ र्या खं उकारितो भूत्वा भूमौ ये चांतरिगाः ॥
दिवि लोके स्थिता ये च ते नश्यंतु शिवाज्ञया ॥१॥ इत्यस्त्रमुच्चरन्‌ वामपार्ष्णिघात
त्रयेण भौमान्‌ ऊर्ध्वोर्ध्वतालत्रयेणांतरिक्षगान्‌ तीक्ष्णदृष्ट्यवलोकनेन दिव्यान्‌ विघ्नानु
त्सार्य । वामपादपुरःसरं मं ३ पं तः प्रविशेदिति द्वारपूजा ॥ अत्र प्रतिद्वारगमनासंभवे
पश्चिमद्वार एव स्थित्वा तत्तद्द्वाराणि कल्पयित्वा पूजयेत्‌ ॥ ॥ अथ यथाक्रमं द्वारदेवता
नां ध्यानं लिख्यते ॥ पद्महृदयवरामीति भास्वत्याशिनतुद्दयां ॥ पद्मवर्णांबुजे तत्पद्मां ॥३४॥

क्षौं पद्मवासिनी॥१॥ अक्षस्रक्कुपुस्तकधरा पूर्णचंद्रसमद्युतिः॥ विश्वविद्यामयी देवी भारती
भास्वतां मयि॥२॥ शंखचक्रांकितकरा कुमारी कुटिलालता॥ मृगेंद्रवाहना देवी दुर्गा दुर्गापि
हं तु मे॥३॥ ततस्कात्स्वरा मासा दिव्यरत्नविभूषिता॥ द्वारश्री रूर्ध्वपद्मस्था वराभयकरांबुजा
॥४॥ मुक्तामाणिक्यसंकाशौ किंचित्स्मितमुखांबुजौ अन्योन्यालिंगनपरौ शंखपंकजधारि
णौ॥५॥ विशालदृत्नवर्षाभ्यां शंखाभ्यां भूर्द्धिलांछितौ॥ शंखासनसमासीनौ विश्वसंकल्पकल्प
कौ॥६॥ तुंदिलं कंबुकनिधिं वसुधारां घनस्तनीं॥ वामतः पंकजनिधिं प्रियया सहितं यजे त्वा
सिंदूरभौ भुजाश्लिष्टौ रत्नपद्मोत्पलान्वितौ॥ निःसरद्रत्नवर्षाभ्यां पद्माभ्यां मूर्द्धिलांछितौ॥८॥
पद्मासनसमासीनौ विश्वसंकल्पकल्पकौ॥ तुंदिलं पंकजनिधिं तन्वीं वसुमतीमपि॥९॥ प
लाशपाटलच्छायं रमणीयं रतिप्रियं॥ पुंड्रेक्षुचापपुष्पेषुमंतं वंदे मनोभवं॥१०॥ प्रपद्ये प्रीति
दयितं पूर्णेंदुसदृशं विभुं॥ वसंतं नंदनोद्याने वसंतं ततोत्सवं॥११॥ पाशांकुशाफलांभोज

35

पाणिपाटलतुंदिलं ॥ वीरं विघ्नेश्वरं वंदे गजवक्त्रं त्रिलोचनं ॥१२॥ कपालशूलौ बिभ्राणं क-
पालं कंकालविग्रहं ॥ तीक्ष्णं त्र्यक्षं समर्चामि क्षेत्रेशं क्षतविद्विषं ॥१३॥ वराभयकरां सौम्यां सो-
मकोटिसमप्रभां ॥ भजे गंगां महादेव्याः पार्श्वे रक्ततरंगिणीं ॥१४॥ वामपार्श्वसंस्थितां परदे-
व्याः सत्तरंगिणीं ॥ वराभयकरां वंदे कालिंदीं कालविग्रहां ॥१५॥ भर्तारं जगतां वंदे शंखचक्र-
गदांबुजं ॥ बिभ्राणं गरुडारूढं धातारं हेमविग्रहं ॥१६॥ रक्तं रक्तारविंदस्थं वराभयकमंडलुं ॥
हंसारूढं विधातारं वंदेऽक्षस्रक्समन्वितं ॥१७॥ सिंहारूढां श्यामलांगीं खड्गखेटकधारिणीं ॥
ऊर्ध्वस्थां देहलीं वंदे पश्चिमास्यासुरक्षिणीं ॥१८॥ पाशाभयधरं वंदे पूर्तो दुस्स्वप्नाद्यवीं ॥
वरुणं मकरारूढं द्वारे श्रीपारदेवते ॥१९॥ करकलितकपालः कुंडली दंडपाणिस्तरुणति-
मिरनीलो व्यालयज्ञोपवीती ॥ क्रमसमयसपर्याविघ्नविध्वंसहेतुर्जयति बटुकनाथः सि-
द्धिदः साधकानां ॥२०॥ धूम्रवर्णो गदाहस्तः कुबेरो नरवाहनः ॥ सौम्यद्वाराधिपः पायात्परदे- ॥३५॥

व्याघ्रनेश्वरः ॥२१॥ ध्यालेच्चग्रजटाधरं त्रिनयनं नीलांजनाद्रिप्रभं दोर्दंडात्तगदाकपालमरुणास्त्रग्वस्त्रगंधोज्वलं ॥ घंटाघुर्घुरमेखलाध्वनिमिलद्धुंकारभीमं विभुं वंदे हंसितसर्पकुंडलधरं तं क्षेत्रपालं सदा ॥२२॥ सितो गजास्यः परशुं दंतपाशौ त्रिशूलकं ॥ भुजैश्चतुर्भिर्बिभ्राणो मूषकोपरिसंस्थितः ॥२३॥ पूर्वद्वाराधिपः शोकः परदे व्याघ्रनेश्वरः ॥ सुपीतकः ॥ वज्रहस्तः सहस्राक्षः पायादैरावतः स्थितः ॥२४॥ गणेशः श्यामवर्णश्च चतुर्बाहुं दिगंबरं ॥ वामदक्षोर्ध्वबाहुभ्यां पाशांकुशधरं तथा ॥२५॥ दक्षिणाधः करे तौ च मधुपूर्णकपालकं ॥ दध्यानं वामहस्तेन स्थाम दन मंदिरे ॥२६॥ स्पृशन्वामांगसंस्थायाः रक्तायाः दक्षपाणिना ॥ आत्मयोन्यस्तलिंगं च वामेन पाणिना ॥२७॥ दधतः शुंडया योनिं जिघ्रन्ध्यात्वा प्रपूजयेत् ॥ नीलांजनचयप्रख्यं यमं महिषवाहनं ॥२८॥ दंडमंडितदोर्दंडं दक्षद्वाराधिपं भजे ॥ ॥ अथ मंचस्थ देवता ध्यानं ॥

36

अक्षस्रक्पुस्तकाभीतीर्दधानां बहुभिर्वरैः। त्रिलोचनां स्मरेद्देवीं सर्वशुक्लां सरस्वतीं
॥२९॥ पद्मद्वयवराभीतिभास्वत्पाणिचतुष्टयां॥ निर्दग्धहेमगौराङ्गीं महालक्ष्मीं त्रि
लोचनां॥३०॥ वरांकुशौ पाशमभीतिमूलोकरैर्दधानां भवभावमूलं॥ घनाघनौघप्र
भदेहकान्तिं मायां त्रिनेत्रां मनिशं स्मरामि॥३१॥ शंखचक्रधनुर्बाणांश्च धारयंती त्रिलो
चनां॥ दूर्वादलनिभां वंदे दुर्गां दुर्गतिनाशिनीं॥३२॥ कपालं खेटकं खड्गं त्रिशूलं
बिभ्रती करैः॥ भिन्नाञ्जनचयप्रख्यां भद्रकालीं नमाम्यहं॥३३॥ शक्तिं स्वस्ति
कमुद्राभीहस्तां चंद्रसमप्रभां॥ त्रिनेत्रां संस्मरेद्देवीं स्वस्तिं स्वस्तिकरीं परां॥३४॥
रक्तोत्पलद्वंद्ववराभयानि करैर्वहंती स्मितशोभिवक्त्रा॥ रक्तां त्रिनेत्रामरुणाम्बरा
ढ्यां स्वाहां भजे देवगणाभिवंद्यां॥३५॥ शालिकल्पलतीशाङ्कबाणपाणिचतुष्ट
याज्वलत्काञ्चनवर्णाभा शुभं कुर्याच्छुभंकरी।३६॥ पाशांकुशौ वराभीतीर्बिभ्रती ॥३६॥

मरुणप्रभां॥ त्रिनेत्रां मातरं वंदे गौरीं रक्तांबरोज्ज्वलां॥७७॥ नाघुसलवराभीतिर्बि
भ्रतीं कांचनप्रभां॥ मातरं दिव्यरत्नांगीं लोकधात्रीं नमाम्यहं॥७८॥ श्वेतां श्वेतांबरां
श्वेतभूषणास्रग्विलेपनां॥ पद्मद्वयवरादर्शकरां वागीश्वरीं भजे॥७९॥ इति श्रीप
रदेवतायां मंडपद्वाराधिदेवतानां ध्यानं॥ इत्थं द्वारदेवताः ध्यायन्पूजयेदिति॥
श्रीविद्यानंदनाथेन शिवयोः प्रियसूनुना॥ श्रीविद्यानंदनाथेन विरचिते सौभाग्य
रत्नाकरे द्वितीयस्तरंगः॥२॥ ॥ततो मंडपांतः प्रविश्य वस्त्रेण द्वारमाच्छाद्य घंटा
वादनपूर्वकं पंचगव्यार्घतोयाभ्यामस्त्रमंत्रेण मंडपांतः प्रोक्ष्य नानावर्णरजश्चि
त्रैः पुष्पमालावितानाद्यैर्मंडपमलंकृत्य सलाक्षासिंदूरादिभिर्भित्तिस्तंभादिकमरुणी
कृत्य वेदीपरितश्चित्रस्थापितैः प्रदीपानुप्रज्वाल्य कालागुर्वादिभिर्धूपयित्वा तदभावे
तादृशं यथालाभं ततो मंडपस्य नैर्ऋतिकोणे॥ ॐ वास्तुपुरुषाय नमः॥ ॐ वास्त्वधीश्वराय

37

श्रेमतो नमः॥ ईशान भागे॥ ४ कुलनाथ पादुकां पूजयामि॥ ४२ क्षवर्णोद्धारौ दंष्ट्रा शक्ति
सहित श्रीद्वीपनाथ पादुकां पू॰ इति द्वीपनाथं संपूज्य॥ अस्मिन् क्षेत्रे द्वीपनाथ निर्विघ्नं
सिद्धिहेतवे॥ श्रीचक्रक्रमपूजार्थमनुज्ञां दीयतां मम॥ १॥ इति द्वीपनाथात् प्रार्थ्य॥
ततः पश्चिमादिद्वारचतुष्टये मध्ये च॥ दूतयैर्बाश्रीपादुकां पूजयामि॥ ४ (पूर्वोक्त विपरी)
तं क्रमेत्॥ फलकायां वटे भित्तौ स्थापयेन्न कदाचन॥ स्थापितं यदि मोहेन लोभेनाज्ञानतोपि वा॥
कुलं क्लिनमपस्ं च निर्मूलयति सर्वथेति॥ तथा लक्षसागरे॥ वंगे थसीसके लोहेन कर्तव्यं
कदाचनेति॥ श्रीचक्रस्य पीठमानं द्रव्य प्रमाणं चाह॥ कुलमूलावतारे॥ अग्निरंगुलविस्ता
रं प्राकूप्रसकू दक्षिणोत्तरां पलप्रमाणं कर्तव्यमर्चापीठं मनोहरं॥ यवार्धा चैवकुर्वीत
चतुरस्रं समं ततः॥ तस्मिन् पीठे च निर्माणं श्रीचक्रस्य तु कारयेत्॥ इति॥ लक्षसागरे॥
(अग्निरंगुलं हेमस्य रजतस्य तथैव च॥ ताम्रस्य पूर्वसंख्यैव माणिक्या द्वौ यथेच्छया॥) ॥३९॥

सुदर्यं बाश्री॥४ सुस्वं बाश्री०४ विरूपां बाश्री०४ विमलां बाश्री०४ अंतर्यं बाश्री०४ बदर्यं बाश्री०४ पुरं दर्यं बाश्री० इति द्वारस्य वामदक्षिणयोर्द्वंद्वं संपूज्य॥ मध्ये ४ पुष्पमर्दिन्यं बाश्री० इति पूजयेत्॥ ततः तीक्ष्णं दंष्ट्र महाकाय कल्पांत दहनोपम॥ भैरवाय नमस्तुभ्यं मनुज्ञां दातुमर्हसि॥१॥ इति पठित्वा भैरवात्साम्मादाय अः पूजितिपूज्या वेदीं गत्वा॥ सिरसि ४ मेरुपृष्ठ ऋषये नमः॥ मुखे ४ सुतलाय छंदसे नमः॥ हृदये ४ पृथिव्यै देवतायै नमः इति विन्यस्य पृथिवी प्रार्थने विनियोगः॥ इति कृतांजलिरुक्त्वा ४ पृथ्वी त्वया धृता लोका देवि त्वं विष्णुनाधृता॥ त्वं च धारय मां देवि पवित्रं कुरु चासनं॥१॥ इति पृथिवीं प्रार्थ्य॥ जपस्थानं मूलमंत्रेण वीक्ष्यास्त्रेण प्रोक्ष्यास्त्रेणैव कुशैः त्रिः संताड्य कवचमंत्रेणाभ्युक्ष्य वक्ष्यमाणां तां पीठपूजां क्रमेण ४ मंमंडूकाय नमः॥ इत्यादिकालाग्निरुद्रान्तं वेदिकायां संपूज्य॥ तस्यां वेदिकायां यथोक्तमासनस्यासनस्थाने आस्तीर्य तदस्त्रेण प्रोक्ष्य ४ ह्रीं आधारशक्ति

कमलासनाय नमः ॥ इत्यासनं संपूज्य तस्यासनस्याग्नेयादिकोणेषु गं गणपतये नमः ॥४
दुं दुर्गायै नमः ॥४ सं सरस्वत्यै नमः ॥४ क्षें क्षेत्रपालाय नमः । इति संपूज्य तत्र प्राङ्मुखः
38 पद्मासनेनोपविश्य रक्तगंधांबरस्रगाभरणभूषितस्तांबूलापूरितमुखः कर्पूरम
गनाभिसुवासितांबरोस्यांगः प्रमुदितचित्तः शिवोहमिति विभावयन् स्वशिरसि पूर्वो
क्तं मातृकांबुजं ध्यात्वा गुरूपदेशविधिना स्वपुरतः समभूतले निर्मितसौधादिस्थंडिले
सिंदूरादिना वक्ष्यमाणं श्रीचक्रमुद्धरेत् ॥ अथवा स्वर्णादिपट्टे निर्मितं वक्ष्यमाणविधि
ना प्रतिष्ठितं चंदनादिपीठे पुरतः संस्थाप्य वक्ष्यमाणसमष्टियोगिनीमंत्रेण पुष्पांजलिं
ष्टा क्षिपेत् ॥ तत्प्रतिष्ठाप्रकारस्तु श्रीतंत्रराजे ॥ ॥ चक्रे देव्यां तथा शिष्ये प्रतिष्ठा त्रिविधो
च्यते ॥ सा च तत्र द्विविधा कार्या संप्रदायानुरोधिना ॥१॥ चक्रे पूजा चक्रे देव्या देवि मूर्तौ तत्र
द्विधा प्रतिष्ठाविधिस्तेन पूर्णाभिषिक्तेन गुरुतः प्राप्तानुज्ञेन । तदुक्तं तंत्रराजे ॥ गुर्वनु ३८

ऽनामृते मोहाज्ञो भाग्यकुरुते यदि॥ स पुत्रदारो निधनं प्राप्नुवन्ति रयं त्रजेत्॥२॥ तस्मात्पूर्णा
३९ भिषेकेन प्रात्यानुष्ठितः समाचरेत्॥ इति॥ एवं विधेन क्रियमाणायां प्रतिष्ठायां कालविशेष
स्तत्रैव॥ स्थिरे शुभग्रहाधिपतेऽनुकूले गुणशालिनि मूहूर्ते कारयेत् पक्षपूर्णायां वा शुभो
दये॥१॥ अक्षरत्रयसंपातदिने पूर्णादिनत्रये॥ प्रोक्तेषु पंचस्वन्येषु सर्वदा वा शुभोदये
॥२॥ पूर्णायां पौर्णमास्यां॥ अक्षरत्रयसंपातदिने एकस्यैवाक्षरस्य दिनाक्षरत्वेनोदया
क्षरत्वेन च स्थितिर्यस्मिन् दिने॥ अन्येषु पंचपर्वसु गुरोर्जन्मदिन विद्याप्राप्तिदिन स्वज
न्मदिन दर्शगुरुमरणदिनेष्विति॥ पूर्णायां विशेषमाह॥ पक्षेति॥ पूर्वोक्तलक्षणायुतदि
नासिद्धौ पूर्णायामेव स्वात्मनः श्वासस्य शुभोदये पक्षांतरमाह॥ सर्वदा वा शुभोदय इति॥
तत्र तत्त्वविदा कृतात्मसाक्षात्कारेण प्रोक्ततिथिवारादिकं सर्वमनवेक्ष्य स्वात्मनः श्वासस्य
शुभोदय एवेसर्थः॥ कुर्यादित्ययं पक्षः सिद्धविषयः॥ नान्यैः कार्यः॥ कुर्यात्प्रतिष्ठां सिद्धा

त्मानस्वल्पोक्तानगर्वितइतितत्रैवोक्तत्वात्॥तत्रापिसंप्रदायानुरोधिनाविदितत्त्वम
पिनिस्सनैमितिकोपास्तिनिरतेन॥तत्रादौश्रीचक्राधिकरणानि।श्रीरुद्रयामले॥ततः
कुंकुमसिंदूरैः कार्ययंत्रंतुयोगिना॥सौवर्णेरजतेताम्रेस्फाटिकेवैद्रुमेतथा॥चक्रेय
39 थोक्तविधिनापूज्यादेवीनरोत्तमैरिति॥तथाचतंत्रराजे॥रत्नैर्हेममनिरूपैर्वाताम्रेदृष
दिचक्रमात्॥कृत्वाचक्रस्यनिर्माणंस्थापयेत्पूजयेदपि॥लक्ष्मीकांतयशःपुत्रधनारोग्या
दिसिद्धये॥इषदिगउक्तौशिलायां॥गउक्तीभववपाषाणेस्वर्णेरजतताम्रयोरितिदक्षिणा
मूर्तिसंहितावचनात्॥अथधातुविशेषपूजाकालसंख्याविशेषमाह॥रत्नसागरे॥याव
ज्जीवंसुवर्णेस्याद्रूप्येद्वाविंशतिःप्रिये।ताम्रेद्वादशकंवर्षंतदर्द्धंभूर्जपत्रके॥इति॥सारसं
ग्रहे॥ताम्रेद्वादकंवर्षंस्फाटिकादौतुसर्वदा॥तेषांमध्येस्फाटिकंतुसर्वसिद्धिप्रदंभवेत्॥
श्रीचक्रेमिलितेशेषः।अथाद्धिकरणविशेषफलविशेषमाह॥लक्षसागरे॥भूमौसिं ॥३९॥

द्रररजसाररचितं सर्वकामदं॥ सुवर्णरचितं यंत्रं सर्वराजवशीकरं॥ रजतेन कृतं यंत्रमा
युरारोग्यकामदं॥ ताम्रेतु रचितं यंत्रं सर्वैश्वर्यप्रदं मतं॥ यंत्रं हि स्फाटिके दद्विमनोभिल
षितप्रदं॥ माणिक्यलिखितं यंत्रं राज्यदं मुक्तिदं पतं॥ गोमेदरचितं यंत्रं सर्वैश्वर्यप्रदं मतं॥
कृत्तमरकते यंत्रं सर्वशत्रुविनाशनं॥ लोहत्रयोद्भवं यंत्रं सर्वसिद्धिकरं मतं॥ श्रीदेव्यु
वाच॥ लोहत्रयोद्भवं यंत्रं कथं कार्यं महेश्वर॥ तन्मे वद स्वरूपयापघहृतवल्लु
भो॥ श्रीईश्वर उवाच॥ भागादशसुवर्णस्य रजतस्य च षोडश॥ ताम्रस्य रविभागेन पी
ठं कुर्यान्मनोहरं॥ तस्मिन्पीठे तु निर्माणं श्रीचक्रस्य तु कारयेत्॥ शांतिदं पुष्टिदं प्रोक्तं
सर्वशत्रुनिबर्हणं॥ आयुरारोग्यजनकं कांतिदं पुष्टिदं मतमिति॥ अथ चक्रस्य प्रस्तार
भेदेन त्रैविध्यं तत्रैव॥ त्रैविध्यं शृणु चक्रस्य भूप्रस्तारोर्ध्वमेरुकं॥ पातालवासिनां देवि
प्रस्तारो निम्न रेखकः॥ ऊर्ध्वरेखं महेशानि मर्त्यलोकनिवासिनां॥ स्वर्गलोकाधिवासिनां

यंत्रराट् मेरुसंज्ञकः॥ भूपुरं तु समारभ्य बैंदवांतं महेश्वरि॥ क्रमात्समुन्नतं सर्वं मे
रुरूपं मयोदितं॥ समोर्ध्वरेखं नवकमूर्ध्वरेखं प्रकीर्तितं॥ निम्नरेखा समायोगाद्भू
प्रस्तारो प्रस्तारो मयोदितः॥ यंत्रराजस्वरूपं ते मयास्नेहात्प्रकाशितं॥ गोपनीयं त्व
या भद्रे स्वगुह्यमिव संततमि॥ अथैतत्प्रस्तारत्रयस्य फलानि प्रस्तारीतरं च तंत्रराजे॥
40 चतुरस्रे समारभ्य नव चक्राण्यनुक्रमात्॥ उन्नतोन्नतमामध्याच्छ्यं कैस्यान्निधनं धनं॥
त्रित्रिक्रमादुन्नतं तं तद्व्रजेल्लक्ष्मियं लभेत्॥ एकद्वित्रिक्रमोन्नामं श्रियै कीर्त्यै च कल्पते॥
नवानि समरूपाणि सर्वाभीष्टार्थसिद्धये॥ तथा कुलमूलावतारे॥ उच्छ्रितं क्रम
शो देवि वित्तश्रीर्जायते ततो मृतिः॥ भूचक्रं षोडशारं चाप्यष्टारं च समं भवेत्॥ शेषमुन्न
तमीशानि चार्थाप्य प्रजदं भवेत्॥ चतुरस्रं समं देवि षोडशारादि बिंदुकं॥ मिथः स
मुन्नतं देवि श्रियै कीर्त्यै च कल्पते॥ चतुरस्रं समारभ्य बिंदुतं समरेखकं॥ तथा श्रीः ॥४०॥

कीर्तिरारोग्यमरतायोपकल्पते॥इति॥अथ श्रीचक्राधिकरणे निषिद्धधातून् अन्या
निनिषिद्धाधिकरणानिचाह॥तंत्रराजे॥सीसकास्यादिषु पुनःपूर्वोक्तं विपरीत
कृत्॥फलकायां पटे भित्तौ स्थापयेत्तकदाचन॥स्थापिते यदि मोहेन
लोभेनाज्ञानतो पि वा॥कुलं वित्तमपत्यं च निर्मूलयति सर्वथेति॥
तथा लक्षसागरे॥वंगे च सीसके लोहे न कर्तव्यं कदाचनेति॥श्रीच
क्रस्य पीठमानं द्रव्यप्रमाणं चाह॥कुलमूलावतारे॥अग्निरंगुल
विस्तारं श्वाङ्कुप्रश्चक दक्षिणोत्तरं॥पलप्रमाणं कर्त्तव्यमर्चापीठं मनो
हरं॥यवार्ज्ञाश्चांप्रकुर्वीत चतुरस्त्रं समंततः॥तस्मिन् पीठे च नि

र्माणं श्रीचक्रस्य तु कारयेत्॥ सौत्रामणि तंत्रे॥ रत्नु रेखा म
वेल्लक्ष्मी वक्र रेखा दरिद्रता॥ अग्निरंगुल विस्तारो यवार्द्धेनो
च्छ्रितिर्भवेत्॥ इति॥ लक्ष्म सागरे॥ अग्निरंगुलं हेमस्य
41 रजतस्य तथैव च॥ ताम्रस्य पूर्वसंख्ये वमाणि दो य
थेच्छया॥

॥४१॥

अग्निरंगुलविस्तारमितिहेमस्येति च दिव्यत्वात्॥ अंगुलविस्तारायामित्यर्थः॥ पलंविं
शत्युत्तरत्रिशतगुंजापरिमितं॥ आदिशब्देन पुष्पनीलादयो रत्नविशेषा उच्यन्ते॥ अंगुल
विस्तारस्तु मानांतरांगुलमानेन॥ वेदिकापीठशिबिकारथादीनां विधिः पुनः॥ मानांतरांगुले
नैव भवेन्नान्येन केन चेदिति॥ महाकपिलपंचरात्रवचनात्॥ श्रीचक्राधिकरणस्य पीठ
शब्दवाच्यत्वात् पीठशब्दप्रतिपादकवचनानि तु प्रागेव लिखितानि॥ मानांतरांगुललक्ष
णं कपिलपंचरात्र एव॥ विन्यस्तैस्तिर्यगष्टाभिर्यवैर्मानांतरांगुलं॥ शालिभिर्वा त्रिगुन्य
स्तैस्त्रिभिर्मानांतरं भवेदिति॥ ॥ अथैतत्प्रतिष्ठाप्रकारः॥ तंत्रराजे॥ क्षौद्राज्यदु
ग्धैः प्रथमं नारिकेलांभसा ततः॥ अभिषेच्याथ तोयेन क्वथितेनाक्षरौषधैः॥ आवाह्या
भ्यर्च्य तल्लग्ने चक्रे संस्थाप्य पूजयेत्॥ नित्यान्त्वाप्तिकालोक्त्य विधयाभ्यर्च्य ताः क्रमात्॥
स्पृशन्जपेत्कराग्रेण श्रीचक्रं पूजयेदपि॥ एवं दिनत्रयं कृत्वा ततो नित्यक्रमं भजेत्॥ गंधैः

पुष्पैर्नवैर्धूपैर्दीपैर्नैवेद्यतर्पणैः ॥ त्रिरात्रं पूजयेद्देवीं योगिभिः समं ॥ एवं देवीप्रतिष्ठायां क्रमः
सान्निध्यकारकं इति ॥ ॥ अथैतत्प्रयोगः ॥ तत्र यथोक्तमानेन निर्मिते चक्रे स्वर्णादिधातुनि
र्मितं चेदम्लरसेन शुद्धं प्रक्षालितं वेदोक्तविधिना कृताग्न्युत्तारणं चक्रं चित्पात्रे संस्थाप्य
42 तत्राग्रे दीक्षाप्रकरणे वक्ष्यमाणशुभमासपक्षर्क्षतिथिवारकरणमुहूर्त्तविशिष्टे साधकस्य
चंद्रताराद्यनुकूले दिवसे स्थिरलग्ने मध्वाज्यदुग्धनारिकेलजलैः प्रथक्पृथगभिषिच्य
सुगंधसलिलेनाप्यभिषिंच पंचाशदक्षरैर्बधिकाथजलेनाप्यभिषिंच्य पुनः सुगंधजलैः
प्रक्षाल्य पूर्ववद्द्वारपूजादिपीठपूजां तत्कृत्वा तस्मिन्पीठे तच्चक्रं संस्थाप्य तथैव पीठमंत्रां
तं संपूज्य तस्मिंश्चक्रे देवीमावाह्य तद्दिननित्याविद्यया विद्यातृतीयकूटेन मूलविद्यया
च प्रत्येकं त्रित्रिवारमभ्यर्च्य यथोक्तविधिनांगावरणपूजां विधाय पूर्वोक्तपूर्णाबद्धत्रिं
शदुत्तरसत्पशताधिकविंशतिसहस्रसंख्याभिः कालनित्याविद्याभिश्चक्रं स्पृशन्नभि
मंत्र्य पुनः श्रीचक्रपूजाक्रमेण संपूज्य धूपदीपादिनानाविधभोज्यैर्देवीं शक्तिसामयिका ॥ ॥

स्वतथैवसंपूज्य संतर्प्य प्रणम्य विसृजेत्। दिनत्रयं देवीं न विसृजेद्॥ प्रत्यहं त्रिसंध्यं
कमार्चनं च कुर्यात्। इति प्रतिष्ठिते चक्रे नित्यार्चनादि कुर्यादिति। मूर्त्तिप्रतिष्ठायाम
प्येष एव विधिर्ज्ञेयः॥ तत्र स्थिरायां विसर्जनं नास्तीति विशेषः॥ इति चक्रराजसमु
द्धरस्य वामार्गे वक्ष्यमाणविधिना सर्वभूतबलिं दत्वा बलिस्थानादुत्तरतः पक्षि
राजं ध्यायेत्तद्यथा॥ अष्टापदं पक्षतिमूलराजद्वज्राकुरं हाटकपक्षकूटं॥ हेमा
गमंगीकृतपद्मरागं चंचूपुटोल्लासिमुखारविंदं॥१ सूर्यानलेंदुद्युतिराजमानं
नेत्रत्रयोल्लासितपद्मरागं॥ नीलाश्मरीत्नाखिलरोमसंघं रीतोभुखंडोज्वलितो
त्तमांगं॥ रविप्रभाहिद्वंद्वबद्धोत्तमकपिशजटाभारसंचारिगंगाभंगाक्रांतोत्तमांगानुक्रम
गलितपृषत्संगहारामिरामं॥ अग्रोघन्नागवध्यक्रमघटितपटप्राग्रथिपंचाग्रुलोग्रेतपु
ण्यग्रथिं बाहुद्वंद्वभुजगयुगोल्लासिमालाभिरामं अक्ष्णोसंबद्धवैश्याहिपदयुगललसं

च्चैर्द्रतीव्रांभुलीलाघंटाटोपाट्टकुलोशादेशाकपतिकुलं वैरिसंघैकपालं॥पाशाकारांस्सलो
लद्वेषलेकुलेभं वासीविषाघोशभोगस्फूर्जत्फूत्कारघोरं खुरपुटनिकरक्षणास्सर्वसंहा
तं४ भक्षयंतं पक्षिरूपं मन्त्राणां वैरिसंचयं॥शलभं साल्वं रूपं च ध्यायेदेकाग्रमानसः॥५॥
इति शलभरूपं शिवं ध्यात्वा ४ ॐ ऐं ह्रीं श्रीं ॐ नमो भगवते शलभसाल्वाय पक्षिराजाय मम
43 शत्रून्नाशय नाशय घे घे हूं फट् स्वाहा॥श्रीशलभरुद्र श्रीपादुकां पूजयामि॥शलभस्य वा
मभागे शलभसदृशीमेव शैलभी ध्यात्वा॥४ ॐ नमो भगवति शलभि शाल्वि पक्षिराज्ञि म
म शत्रुन्नाशय नाशय घे घे हूं फट् स्वाहा श्रीशलभीदेवी श्रीपादुकां पूजयामीति शलभ
मिथुनं संपूज्य॥चक्रस्य पूर्वदिशि॥कल्पांतार्कप्रकाशं त्रिभुवनमखिलं तेजसा पूरयंतं
रक्ताक्षं पिंगकेशं रिपुकुलभयदं भीमदंष्ट्राट्टहासं॥चक्रं शंखं गदाब्जे पृथुतरमुसलं चा
पपाशांकुशान्स्वैर्बिभ्राणं दोर्भिराद्यं मनसि मुररिपुं भावयेच्चक्रसंज्ञं॥दक्षापूर्वयो ॥४१॥

राघेत दा घघः स्थयोरन्येत दा घघस्थयोरपरेत दा घधः स्थयोरित्तरे इत्सायुधध्यानं ॥
॥ इति श्री सुदर्शनं ध्यात्वा ॥ ॐ सहस्रार हूं फट् श्री सुदर्शनायनमः ॥ इति संपूज्य ॥ तद
क्षिणस्यां दिशि सजलघनसमानं भीमदंष्ट्रं त्रिनेत्रं भुजगधरमघोरं रक्तवस्त्रांगरागं ॥
परशुडमरुखड्गान्खेटकं बाणचापौ त्रिशिखनरकपाले बिभ्रतं भावयामि ॥ १ दक्षा
घूर्ध्वयोराघेत दा घधः स्थयोरन्येत दा घधः स्थयोरपरेत दा घधः स्थयोरितरे इत्सायु
धध्यानं ॥ इत्यघोररूपं रुद्रं ध्यात्वा ॥ ॐ ह्रीं स्फुर २ प्रस्फुर २ घोर घोरतर तनुरूप चट २
प्रचट २ कह २ वम २ बंध २ घातय २ हूं फट् अघोररुद्राय नमः ॥ इत्यघोररुद्रं संपूज्य ॥ प
श्चिमे ॥ सौवर्णाम्बुजमध्यगां त्रिनयनां सौदामिनीसन्निभां शंखं चक्र वराभयानि दधती
मिन्दोः कलां बिभ्रतीं ॥ ग्रैवेयांगदहारकुंडलधरामाखंडलाद्यैः स्तुतां ध्यायेद्विंध्यनि
वासिनीं शशिमुखीं पार्श्वस्थ पंचाननां ॥ १ ॥ वामोर्ध्वकरमारभ्य वामाधः करांतमायुध

ध्यानं॥ इति श्रीदुर्गाध्यानम्॥ ४ उत्तिष्ठ पुरुषि किं स्वपिषि भयं मे समुपस्थितं॥ यदि शक्यमश
शक्यं वा तन्मे भगवति शमय स्वाहा॥ अत्र वक्ष्यमाणसमये विद्यामेवं स्मरेत्। श्रीदुर्गायै
नम इति संपूज्य॥ ४ स्वदक्षिणभागे गंधपुष्पादिपूजोपकरणं निधाय। ४ ह्रां ह्रीं ह्रूं फट्
इति मंत्रं स्मरन्नाराचमुद्रयादिव्यदृष्ट्या च पुष्पादिकं विलोक्य वामभागस्थं जलपूर्ण
44 कुंभं ४ आं इति वामहस्तेन स्पृष्ट्वा ४ क्रौं इति दक्षिणकराग्रेण कुंभस्थजलं स्पृष्ट्वा ४
रं इति दीपशिखां स्पृशेत्। ततः करं प्रक्षाल्य वामे ४ ऐं गुरुभ्यो नमः। दक्षिणे ४ गं
गणपतये नमः। अग्रे ४ श्रीपरदेवतायै नमः इति कृतांजलिः प्रणम्य मूर्ध्नि संघट्टमुद्रां
विधाय॥ ४ हस्रौं हसक्षमलवयरां हसक्षमलवयरूं हसक्षमलवयरीं ह्सौं हसक्ष
मलवयरूं श्रीपरपावकसर्वाराध्यसर्वमूर्द्धपुरनाथसर्वगुरुस्वयंगुरुश्रीगुरुनाथ
रहसक्षमलवयरूं हस्रौं हसक्षमलवयरीं हसक्षमलवयरूं हसक्षमलवयरां श्री ॥४४॥

शंभु गुरू ह्स्रौं ४८ श्री अमुकानंदनाथ अमुकीदेव्यंबाश्रीपादुकां पूजयामीति स्व
शिरसि श्री गुरूपादुकां विन्यस्य पुनरनया एवंविधया गंधाक्षतकुसुमैः संपूज्य गं
धादिपंचमुद्राः प्रदर्शयन नमोस्तु गुरूभ्य इत्यादिना नमस्कारमुद्रया प्रणम्य॥४ ऐं
आंसौः इति करशुद्धिविधया सुगंधद्रव्यमर्द्दनेन करौ सुरभीकृत्य ४ हस्त्रैं इति मं
त्रेण सुगंधपुष्पाण्यादाय मर्द्दयित्वा वामकरेण ४ रों निर्गुरुध्य व्य आघ्राय ४ ॐ हौः
ते सर्वे विलयं यान्तु ये मां हिंसन्ति हिंसकाः॥ मृत्युरोगभयक्लेशाः पतन्तु रिपुमस्तके॥ इति
पठित्वा नाराचमुद्रया तत्पुष्पमुत्तरस्यां दिशि दूरे क्षिपेत्॥ ततः पुनः करशुद्धिविधया क
रावन्योन्यमर्द्दनेन संशोध्य। मध्यमयोः ४ ऐं नमः अनामिकयोः ४ क्लीं नमः कनिष्ठिकयोः ४
सौः नमः॥ अंगुष्ठयोः ४ ऐं नमः तर्जन्योः ४ क्लीं नमः करतलकाष्ठयोः। ४ सौः नमः। इति विन्य
स्य। ४ ऐं क्लीं सौः नमस्त्रिपुरसुंदरि मां रक्ष रक्ष इति मंत्रेण मूर्द्धादि चरणांतं त्रिर्व्यापकं विन्य

स्य पुनरेतदुच्चार्य पदूर्ध्वोर्ध्वं तालत्रयं तर्जन्यंगुष्ठोत्थशब्दैर्दद्याद्दिग्बंधनं त्रिर्भूलीकारयोर्व्य
त्यस्तयोः करयोः स्वमूर्धानं परितस्त्रिर्भ्रामणेन बहिःप्राकारत्रयं च कृत्वा मूलविद्यया प्रा
णायामत्रयं कृत्वा प्रणवद्वादशावृत्त्या नाडीशुद्धिं विधाय भूतशुद्धिं कुर्यात्॥ तद्यथा पादादि
45 जानुपर्यंतं पृथ्वीस्थानं चतुरस्रं वज्रलांछितं पीतवर्णं ब्रह्मदैवत्यं निवृत्तिकलाधिष्ठि
तं लं बीजयुक्तं चिंतयेत्॥ जान्वादिनाभिपर्यंतं अपां स्थानमर्द्धचंद्राकारं शुक्लवर्णं शृं
गद्वये पद्मलांछितं विष्णुदैवत्यं प्रतिष्ठाकलाधिष्ठितं वं बीजयुक्तं ध्यात्वा नाभ्यादिकंठ
पर्यंतं वह्निमंडलं स्वस्तिकोपेतं त्रिकोणाकारं रक्तवर्णं रुद्रदैवत्यं विद्याकलाधिष्ठितं रं बी
३१ जयुक्तं ध्या~~त्वा~~ कंठादिभ्रूमध्यपर्यंतं वायुमंडलं षट्कोणाकारं षट्बिंदुलांछितं
वृत्तोपेतं धूम्रवर्णं ईश्वरदैवत्यं शांतिकलाधिष्ठितं यं बीजयुक्तं विचिंत्य भ्रूमध्यादि ब्रह्म
रंध्रपर्यंतं आकाशस्थानं वृत्ताकारं ध्वजलांछितं धूम्रवर्णं सदाशिवदैवत्यं शांत्यतीत ॥४५॥

कलाधिष्ठितं हं बीजयुक्तं ध्यात्वा ॥ तत्र पंचमूतमये देहे । धर्मकंदसमुद्भूते ज्ञाननाल
कमैश्वर्याष्टदलोपेतपरं वैराग्यकर्णिकं स्वहृदयारविंदं विभाव्य तत्कर्णिकायां जीवा
त्मानमाराग्रमात्रं प्रदीपकलिकाभासुरमनादिमलेसंवृत्तं परचिद्रूपं संचिंत्य योनि
मुद्रां बध्वा प्रागुक्तरूपेणा मूलाधारात्कुंडलिनीमुत्थाप्य सुषुम्णावर्त्मना मूलाधाराद्य
नाहतांतचक्रस्थवर्णान्वर्णाधिदेवताग्रसंतीं हृदयकमलमानीय तया कवलीकृते जी
वात्मानं ध्यायन्सुषुम्णावर्त्मना विशुध्यादिचक्रस्थवर्णान्वर्णाधिदेवताग्रसंतीं ब्रह्मरं
ध्रं नीत्वा तत्रस्थितसहस्रदलकमलकर्णिकामध्यवर्तिनी परमात्मज्योतिषि सर्वव
र्णवर्णाधिदेवताकदंबकं जीवात्मानं४ हंसः इति मंत्रेण संयोज्य अस्त्रेण रक्षां कृत्वा कुं
डलिनीं स्वस्थानमानीय तत्वसंहारं कुर्यात् ॥ तद्यथा ॥ तत्र पृथिवीस्थाने पादेंद्रियगमन
क्रियागतव्यगंधघ्राणपृथिवीब्रह्मनिवृत्तिसमानवायून्संस्मरन्४ ॐ ह्रां ब्रह्मणे पृथि

४९ व्यधिपतये निवृत्तिकलात्मने हूं फट् स्वाहा ॥ इति मंत्रेण तान्सर्वान्कुंडलिनी द्वाराऽ-
पां मध्ये संहरेत् ॥ ततोऽपां स्थाने हस्तादान दातव्य रस रसना जल विष्णु प्रतिष्ठोदाना-
न्संचिंत्य ४ ॐ ह्रीं विष्णवे जलाधिपतये प्रतिष्ठाकलात्मने हूं फट् स्वाहा ॥ इति मंत्रेण तान्
सर्वान्कुंडलिनी द्वारा वह्नितत्वे संहरेत् ॥ ततो वाह्निस्थाने पायु विसर्ग विसर्जनीय रूप
46 चक्षुर्वह्नि रुद्र विद्याख्यानान्संस्मृत्य ४ ॐ हूं रुद्राय तेजोधिपतये विद्याकलात्मने हूं
फट् स्वाहा ॥ इति मंत्रेण तान्सर्वान् वायुमंडले संहरेत् ॥ ततो वायुस्थाने उपस्थानंदत
द्विषय स्पर्श स्पृष्टव्य वायवीश्वर शांत्यपानान्संस्मृत्य ४ ॐ ह्रैं ईश्वराय वाय्वधिपतये
शांतिकलात्मने हूं फट् स्वाहा ॥ इति मंत्रेण तान्सर्वान् आकाशस्थाने संहरेत् ॥ ततः ॥४९॥
ऽपाकाशस्थाने वाग्वदन वक्तव्य शब्द श्रोत्राकाश सदाशिव शांत्यतीत प्राणान्संस्मृ-
त्य ४ ॐ ह्रौं सदाशिवायाकाशाधिपतये शांत्यतीतकलात्मने हूं फट् स्वाहा ॥ इति मंत्रेण

तान् सर्वान् कुंडलिसंहृत्य तां बिंदुशक्तौ बिंदुशक्तिं नादशक्तौ नादशक्तिं परशक्तौ प्रण
वेन संहृत्य ॥ ४ ॐ ह्रीं ह्रूं फट् स्वाहा । इति तां परशक्तिं पूर्वोक्ते परमात्मनि संयोज्य पृथिव्या
दीनि भूतानि क्रमेण स्वस्वकारणे एवं पंचमहाभूतानि परे तत्वे एकीभूतानि विचिंत्य ॥
केवलशरीरे वामकुक्षौ पापपुरूषं संचिंतयेत् ॥ तद्यथा ॥ वामकुक्षिस्थितं पापपुरूषं
कज्जलप्रभं ब्रह्महत्याशिरः स्कंधे स्वर्णस्तेयभुजद्वयं ॥ सुरापानहृदयुक्तं गुरुतल्प
कटिद्वयं ॥ तत्संसर्गपदद्वंद्वमंगप्रत्यंगपातकं ॥ उपपातकरोमाणं रक्तश्मश्रुविलो
चनं ॥ खड्गचर्मधरं क्रुद्धं कुक्षौ पापं विचिंतयेत् ॥ इति पापपुरूषं विचिंत्य वामनासारं
ध्रे स्मायं बीजेन द्वात्रिंशद्वारमावर्तनेन सह वायुमापूर्य नाभिस्थषट्कोणाकारे वायु
मंडले संयोज्य तत्र यमिति वायुबीजं धूम्रवर्णं संचिंत्य कुंभकेन यंबीजं चतुःषष्टिवारमा

॥४७॥

वर्त्तयन् तदुत्थितेन महावायुना सह पापपुरुषं स्वशरीरं संशोष्य यं वायुबीजं षोडशवार
मावर्त्तनं तं वायुं दक्षिणनासया चिरेच्य॥ रमिति बीजेन ३२ आवर्त्तनेन दक्षिणनासया
वायुमापूर्य मूलाधारे संयोज्य तत्रस्थवह्निमंडले रं वह्निबीजं रक्तवर्णं विचिंत्य कुंभकेन
रमिति बीजं ६४ वारमावर्तयंस्तदुत्थितेन महावह्निना सह पापपुरुषं स्वदेहं दग्ध्वा पाप
पुरुषभस्मना सह रं वह्निबीजं १६ वारमावर्तयन् तं वायुं वामनासया विरेच्य॥ पुनर्वाम
नासया ३२ आवृत्तेन वं बीजेन सह वायुमापूर्य ब्रह्मरंध्रे संयोज्य तत्रस्थितचंद्रमंड
ले वमिति अमृतबीजं शुक्लवर्णं संचिंत्य कुंभकेन ६४ आवर्तयन् वं बीजं तन्निःसृतामृतधार
या स्वदेहभस्म संसिच्य वं बीजं षोडशवारं आवर्तयन् तं वायुं दक्षिणनासया विरेच्य॥
पुनर्दक्षिणनासया लं बीजेन ३२ आवर्तनेन सह वायुमापूर्य मूलाधारस्थपार्थिवमंडले ४७
संयोज्य तत्र लमिति पृथ्वीबीजं पीतवर्णं संचिंत्य कुंभकेन लं बीजं ६४ वारमावर्तयन् तदु
द्भूतेन तेजसा ऽमृतप्लावितं भस्म घनीकृत्य लं बीजं १६ मावर्तयन् वामनासया तं वायुं विरेच्य॥

47

पुनर्वामनासया ह्रींबीजेन ३२ वृत्तेन सहवायुमापूर्य मूलाधारस्थ बींदुमध्ये मायाबीजं
स्फुरत्बालार्कवर्त्तिसंचितस्त कुंभकेन मायाबीजं ६४ मावर्त्तयन्तेन करचरणाद्यवयव
समेतं स्वदेहं निष्पंत्र विभाव्य मायाबीजं १६ मावर्तयन्तं वायुं दक्षिणनासया विरेच
येदिति स्थूलशरीरं निष्पाद्य सूक्ष्मशरीरं निष्पादयेत्॥ तद्यथा॥ तत्र पूर्वोक्त सह
स्रारकमलेस्थ परमात्मनः सकाशात्सकलजगत्सृष्टिस्रष्टा विजृंभित परब्रह्मस्वरू
रूपिणीं परशक्तिं ४ ॐ ह्रीं नमः इति परमात्मनः सकाशात्स्वस्थानमानीय ततो नाद
शक्तिं ततो बिंदुशक्तिं प्रणवेन स्रष्टा बिंदुशक्तेः सकाशात्सकलजगत्सृष्टिहेतुभूतां
कुंडलिनीं प्रणवेन निःसार्य ततः ४ ॐ ह्रौं सदाशिवायाकाशाधिपतये शांत्यतीतक
लात्मने नमः इति प्राणशांत्यतीत सदाशिवाकाशश्रोत्रशब्द वक्तव्य वदन वीच आका
शस्थाने स्थापयेत्॥ ततेआकाशमंडलान्त ४ ॐ ह्रैं ईश्वरायवाय्वधिपतये शांति

॥४८॥ क्लीत्मनेनम इति मंत्रेणापानशांति ईश्वरवायुस्पृश्य स्पर्शतद्विषयानंदोपस्थान्वा
युस्थाने स्थापयेत्॥ ततः ४ ॐ ह्रूं रुद्राय तेजोधिपतये विद्याकलात्मनेनम इति मंत्रेण
व्यानविद्यारुद्रतेजश्चक्षूरूपविसर्जनीयविसर्गपायून्अग्निस्थाने स्थापयेत्॥ ततः ४
ॐ ह्रीं विष्णवे जलाधिपतये प्रतिष्ठाकलात्मनेनम इति मंत्रेणोदानप्रतिष्ठाविष्णुजल
रसनारसदातव्यादानहस्तानपां स्थाने स्थापयेत्॥ ततः ४ ॐ ह्रां ब्रह्मणे पृथिव्यधिप
तये निवृत्तिकलात्मनेनम इति मंत्रेण समाननिवृत्तिब्रह्मपृथिवीघ्राणगंतव्यग
मनक्रियापादेंद्रियाणि पृथिवीस्थाने स्थापयेत्॥ ततः प्रणवेन कुंडलिनीं स्वस्थाने
स्थापयित्वा नादशक्तिबिंदुशक्तिपरसक्तीनां प्रणवेन स्वदेहेव्याप्तिं विभाव्य ब्रह्मरंध्र
स्थपरमात्मनः सकाशात्कुंडलिन्या जीवात्मानं संहृतवर्णवर्णाधिदेवतासहितमाक्षा
दिचक्रेषु तत्तद्दलस्थितवर्णाधिदेवताः स्थापयन् हृदयकमलमानीय सोहमिति मंत्रेण ४८

हृदयकमले जीवात्मानं स्थापयित्वा कुंडलिनीं सुषुम्णामार्गेण मणिपूरकादिचक्रे
षु तत्तद्वर्णवर्णाधिदेवताः स्थापयन् मूलाधारं नीत्वा तत्रैव स्थापयेत् ॥ ततः स्वशरीरं
निरस्तसकलकलुषं तेजोरूपं देवताराधनयोग्यं विभाव्य इति भूतशुद्धिः ॥ भूतशु
द्धिं विहाय तेन हस्तपूजाभिचारवत् ॥ विपरीतफलं दद्यादभक्त्याचार्चनं तथा ॥ प्राण
प्रतिष्ठां कुर्यात् ॥ सा यथा ॥ शिरसि ४ ब्रह्मविष्णुशिवेभ्यो ऋषिभ्यो नमः ॥ मुखे ४ ऋ
ग्यजुःसामाथर्वछंदोभ्यो नमः ॥ हृदये ४ पराप्राणशक्त्यै देवतायै नमः ॥ गुह्ये ४ आं बी
जाय नमः ॥ पादयोः ४ ह्रीं शक्तये नमः ॥ नाभौ ४ क्रों कीलकाय नमः ॥ इति विन्यस्य मम
प्राणप्रतिष्ठार्थे विनियोग इति कृतांजलिर्वदेत् ॥ ४ ॐ आं ह्रीं क्रों अं कं ४ आकाशवा
य्वग्निसलिलपृथिव्यात्मने आं हृदयाय नमः ॥ ४ ॐ आं ह्रीं क्रों ङं चं ४ शब्दस्पर्श
रूपरसगंधात्मने ई शिरसे स्वाहा ॥ ४ ॐ आं ह्रीं क्रों उं टं ४ श्रोत्रत्वक्चक्षुर्जिह्वाघ्राण

॥४९॥ 49
त्मने ऊं शिखायै वषट् ॥४॥ ॐ आं ह्रीं क्रों ऐं तं४ वाक्पाणिपादपायूपस्थात्मने ऐं कव
चाय हुं ॥४॥ ॐ आं ह्रीं क्रों ओं पं४ वचनादानगमनविसर्गानंदात्मने ओं नेत्रत्रया
य वौषट् ॥४॥ ॐ आं ह्रीं क्रों अं यं१ मनोबुद्ध्यहंकारचित्तात्मने अः अस्त्राय फट् ॥
इति मंत्रोनं गुष्ठादितली तं विन्यस्य हृदयादिषडंगेष्वपि तौ विन्यस्य ॥ ततो नाभ्या
दिपादद्वयांतं४ आं नमः । हृदयादिनाभ्यंतं४ ह्रीं नमः । मूर्द्धादिहृदयांतं४ क्रों नमः । त
तो हृदयकमलमध्ये४ यं त्वगात्मने नमः । पूर्वदले४ रं असृगात्मने नमः । पश्चि
मदले४ लं मांसात्मने नमः । आग्नेयदले४ वं मेदात्मने नमः । वायव्यदले४ शं अस्थ्या
त्मने नमः । ईशानदले४ षं मज्जात्मने नमः । नैर्ऋतिदले सं४ शुक्रात्मने नमः । उत्त
रदले४ हं प्राणात्मने नमः । दक्षिणदले४ लं जीवात्मने नमः । पुनः कर्णिकायां४
क्षं परमात्मने नमः ॥ इति विन्यसेत् ॥ ततो ध्यानं । रत्नाब्धिपोतारुणपद्मसंस्थां पाशां ४९

कुशा विक्षुशरान् सबाणान् ॥ भूलेकपालं दधती कराब्जैर् रक्तां त्रिनेत्रां प्रणमामि देवी
॥१॥ इति ध्यात्वा हृदि हस्तं निधाय ॥४ ॐ आं ह्रीं क्रों यं रं लं वं शं षं सं हौं हंसः सोहं म
म प्राणा इह प्राणाः ४ ॐ आं १४ मम जीव इह स्थितः ४ ॐ आं १४ मम सर्वेन्द्रियाणि ४ ॐ आं १४
मम वाङ्मनश्चक्षुःश्रोत्रघ्राणप्राणाः इहैवागत्य सुखं चिरं तिष्ठन्तु स्वाहा ॥ इति
प्राणप्रतिष्ठां त्रिर्जपित्वा निजवपुर्ज्योतिर्मयं ध्यायेदिति प्राणप्रतिष्ठाविधिः ॥ ॐ
इति मन्त्रं १६ जपेत् हृदये हस्तं निधाय ॥ श्रीविद्यानन्दनाथेन शिवयोः प्रियसूनुना ॥
कृते सौभाग्यरत्नाब्धौ तरंगोऽगात् तृतीयकः ॥१॥ ॥ इति श्रीसच्चिदानन्दनाथ
चरणारविन्दद्वन्द्वान्तेवासिना श्रीश्रीविद्यानन्दनाथेन विरचिते सौभाग्यरत्नाकरे तृ
तीयस्तरंगः ॥३॥ ॥ अथ मातृकान्यासः ॥ स चात्र विद्यायां श्रु । द्रुककलामूर्तिप्रपं
चयागभेदाच्चतुर्विधः ॥ श्रुत्यादयो प्यस्यां विद्यायां त्रयोदश विधाः ॥ श्रुत्यो बिंदुयु

॥५०॥ तोविसर्गयुक्तो विंदुविसर्गयुक्तो हृल्लेखाद्यो लक्ष्म्याद्यः कामबीजाद्यो मायाश्री
कामबीजाद्यो बाला संपुटितः परा संपुटितः श्रीविद्यान्वितो हंसादिकपरमहंसा
दिकश्चेति॥ कलायुक्तोपि द्विविधः॥ तारोक्षकलान्यासस्तेजस्त्रितयोऽथ कलामातृ
कान्यासश्चेति॥ मूर्तिन्यासोपि द्विविधः॥ केशवादि श्रीकंठादिभेदात्॥ चतुर्थः प्रपंच
यागः॥ तत्रादौ मातृकावर्णैः प्राणायामत्रयं कृत्वा न्यासं समारभेत्॥ तत्र स्वरैः पूरकः
पंचवर्गैः कुंभकः यादिभि रेचकः॥ इति मातृका प्राणायामः॥ इत्थं प्राणायामत्रयं कृ
त्वा न्यासं कुर्यात्॥ तत्राथ प्रथमं शुद्धमातृकान्यासः॥ ॐ अस्य श्रीशुद्धमातृकान्या
सस्य· ब्रह्मा ऋषिः गायत्री छंदः श्रीमातृका सरस्वती देवता· हलो बीजानि· स्वराः ५०
शक्तयः अव्यक्तं कीलकं मम श्रीविद्यांगत्वे न्यासे विनियोगः॥ इति कृतांजलिः॥ ऋ
ष्यादिकं स्मृत्वा मूर्द्धादिषु विन्यसेत्॥ तद्यथा॥ शिरसि ४ ब्रह्मणे ऋषये नमः॥ मुखे ४

50

गायत्रीछंदसेनमः॥ हृदये४ श्रीमातृकासरस्वत्यैदेवतायैनमः॥ गुह्ये४ हल्भ्योबी
जेभ्योनमः॥ पादयोः४ स्वरेभ्यः शक्तिभ्योनमः॥ नाभौ४ अव्यक्तायकीलकायनमः॥
इतिविन्यस्य॥ मम श्रीविद्यांगत्वेन्यासेविनियोगइतिसर्वांगेव्याप्य कृतांजलिर्वदेत॥
ततः दक्षकरतले अं नमः॥ तत्पृष्ठे आं नमः॥ दक्षकरमेइंनमः॥ दक्षिणांगुष्ठमार
भ्यवामांगुष्ठावधिदशस्वंगुलिषु ईकाराद्योकारांतान् १० विन्यस्य. वामकरमंते
तत्पृष्ठतत्तलेषु औकारादिविसर्गांतं न्यसेत्॥ अयंसंहारन्यासः॥ दक्षकरतला
दिवामकरतलांतसविसर्गान्स्वरान्न्यसेत्॥ अयंसृष्टिन्यासः॥ वामकनिष्ठादि
तलांतमष्टौस्वरान् ल्कारा॥ दीन् बिंदुविसर्गसहितान्विन्यस्य. दक्षकरतला
दितत्कनिष्ठांतमकारादिऋकारांतानष्टौस्वरान् बिंदुविसर्गयुक्तान्न्यसेदिति
स्थितिन्यासः॥ इतिमातृकास्वरान्विन्यस्य. तकारादीन् शांतान् वामकनिष्ठामूला

51

दितदंगुष्ठाग्रपर्यंतेषु पंचदशस्थानेषु विन्यस्य दक्षांगुष्ठादितत्कनिष्ठाग्रांतेषु का
दितान् तान् विन्यस्य करद्वयेप्यंगुष्ठादिकनिष्ठांतेयुगपद्देवषादिक्षांतान् पंचवर्णा
न् व्यापकत्वेन न्यसेत् ॥ इति मातृकाक्षरैः करशुद्धिं विधाय ॥ ॐ ऐं ह्रीं श्रीं अं कं खं
गं घं ङं आं हृदयाय नमः ॥४ इं चं ४ ईं शिरसे स्वाहा ॥४ उं टं ४ ऊं शिखायै वषट् ॥४
एं तं ४ ऐं कवचाय हुं ॥४ ओं पं ४ औं नेत्रत्रयाय वौषट् ॥४ अं यं ९ अः अस्त्राय फट् ॥
इति षडंगमंत्रान् अंगुष्ठादितलांतं करयोर्विन्यस्य हृदयादिषडंगेषु विन्यसेत् ॥
ततो ध्यानं ॥ तत्र प्रथमं सूक्ष्मरूपं ध्यात्वा तन्मात्रकां न्यसेत् ॥ तद्यथा ॥ व्योमेन्द्वीर
सनार्णकर्णिकमचां द्वंद्वैः स्फुरत्केसरं पत्रांतर्गतपंचवर्गयशाक्षार्णादित्रिवर्गक्रमात् ॥
आशास्वश्रिषु लांतलांगलिमुजा क्षोणीपुरेणावृतं वर्णाब्जं शिरसि स्थितं विषगद
प्रध्वंसि मृंजयं ॥१॥ इति ब्रह्मरंध्रे वर्णारविंदं ध्यात्वा ॥ मूलाधारध्वनिं भुत्वा प्रबुद्धा

॥५१॥

शक्तिकुंडली ज्वलत्पावकसंकाशा सूक्ष्मतेजःस्वरूपिणी ॥ मूलाधाराच्छिरःपद्मं स्पृशं
ती विद्युदाकृतिः ॥ तयास्पृष्टं शिरःपद्मादमृतौघस्वरूपिणः ॥ निर्गतान्मातृकावर्णान्
सुषुम्णावर्त्मना तनौ ॥ व्यापयित्वा स्थितान्सर्वानेवं ध्यात्वा [illegible] मुखाग्र विन्यसेत् ॥ इति सू
क्ष्मरूपं ध्यात्वा विन्यसेत् ॥ तत्र विशुद्धौ षोडशदलकमलमूर्ध्वमुखं ध्यात्वा तद्दलेषु प्रागादि
प्रादक्षिण्येन ४ अं नमः ॥ ४ अः नमः ॥ एवं षोडश स्वरान्न्यसेत् ॥ ततो हृदयानाहतचक्रे द्वा
दशदलकमलं ध्यात्वा तथैव ककारादिठकारांतान्द्वादश वर्णान्प्रणववर्जितारादिनमो
तान्प्रादक्षिण्येन न्यसेत् ॥ ततो लिंगनाभौ मणिपूरकं चक्रं दशदलकमलं ध्यात्वा तद्दलेषु
डकारादिफकारांतान्दशवर्णान्पूर्ववन्न्यसेत् ॥ ततो लिंगमूले स्वाधिष्ठानचक्रं षट्दल
कमलं ध्यात्वा तद्दलेषु प्राग्वत् बकारादिलकारांतान्षट्वर्णान्न्यसेत् ॥ ततो मूलाधारे
चतुर्दलकमलं ध्यात्वा तद्दलेषु वकारादिसकारांतान्चतुरो वर्णान्पूर्ववन्न्यसेत् ॥ ततो

॥५२॥ भ्रूमध्ये आज्ञाचक्रं द्विदलकमलं ध्यात्वा तद्दलयोर्हक्षौ पूर्ववन्न्यसेत्॥ इत्थं तर्मातृकान्या
सं विधाय बहिर्मातृकान्यासं कुर्यात्॥ इति अंतर्मातृकान्यासः॥ बहिर्न्यासो यथा॥
तत्र ध्यानं॥ तद्यथा॥ पंचाशद्वर्णभेदैर्विहितवदनदोःपादयुक्कुक्षिवक्षोदेहां भास्वत्
कपर्दाकलितशशिकलामिंदुकुंदावदातां॥ अक्षस्रक्कुंभचिंतालिखितवरकरां त्र्यक्ष
णां पद्मसंस्थामच्छाकल्पामतुच्छस्तनजघनभरां भारतीं तां नमामि॥१॥ दक्षोर्ध्वकरमा
रभ्य दक्षाधःकरपर्यंतं आयुधध्यानं॥ चिंतालिखितं पुस्तकं॥ इति प्रागुक्तवर्णारविंदे ध्या
त्वा न्यसेत्॥ तत्रादौ॥ ह्स्रौः अं आं इत्यादि समस्तमातृकामुच्चार्य ह्स्रौः नमः। मुखे इति मू
र्द्धादिपादांतं त्रिव्यापकं विन्यस्य। ॐ ऐं ह्रीं श्रीं इति बीजानि न्यासादौ सर्वत्र ज्ञेयानि॥ शि
रसि ४ अं नमः। मुखवृत्ते ४ आं नमः। दक्षनेत्रे ४ इं नमः। वामनेत्रे ४ ईं नमः। दक्षकर्णे ४
उं नमः। वामकर्णे ४ ऊं नमः। दक्षनासायां ४ ऋं नमः। वामनासायां ४ ॠं नमः। दक्षकपोले ४

52

३ खं नमः। दक्षमणिबंधे ४ गं नमः। दक्षांगुलिमूले ४ घं नमः। दक्षांगुल्यग्रे ४ ङं नमः। ए वं वामबाहुमूलकूर्प

लृं नमः। वामकपोले लॄं नमः। उत्तरोष्ठे ४ एं नमः। अधरोष्ठे ४ ऐं नमः। ऊर्ध्वदंतपङ्क्तौ ४ ओं नमः। अधोदंतपंक्तौ ४ औं नमः। शिरसि ४ अं नमः। जिह्वायां ४ अः नमः। दक्षबाहु

मूले ४ कं नमः। दक्षकफोणौ मणिबंधांगुलिमूलाग्रेषु चवर्गं न्यसेत्॥ (दक्षवामपार्श्वपृ

(ष्ठनाभिजठरे) ततो दक्षोरुमूले जानुगुल्फांगुलिमूलाग्रेषु टवर्गं न्यसेत्। ततः वामोरु

मूले जानुगुल्फांगुलिमूलाग्रेषु तवर्गं न्यसेत्॥ दक्षवामदक्षवामपार्श्वपृष्ठनाभिज

ठरेषु पवर्गं न्यसेत्। ततो हृदयदक्षांसककुद्वामांसेषु यवर्गं न्यसेत्। ततो हृदादिपाणिद्वये

हृदादिपादद्वये हृदादिना भौ हृदादि ब्रह्मरंध्रेषु शवर्गं न्यसेत्। इति श्रुद्धमातृकान्यासः।

बिं श्रुद्धं इंदुयुतं विसर्गसहितं हल्लेखया लंकृतं बालासंपुटितं तथैव परया श्री विद्यालं

कृतं॥ आरोहादवरोहतः त्रातमयं न्यासं पुनर्हंसयोर्यो जानाति स एव सर्व जगतां सृ

ष्टिस्थितिध्वंसकृत्॥१॥ अत्र श्रुद्धोपि बिंदुयुक्तत्वं वर्णानां वीर्ययोजनार्थमिति सं

तौ ३

५३

प्रदायः॥ अथ बिंदुयुक्तमातृकान्यासः। तत्र ऋष्यादिकं प्राग्वत्॥ ध्यानेपरं विशेषः। तद्यथा
अक्षस्रजं हरिणपोतमुदग्रटंकं विद्यांकरैरविरतं दधतीं त्रिनेत्रां॥ अर्धेंदुमौलिमरुणामर
विंदवासां वर्णेश्वरीं प्रणमत स्तनभारनम्रां ॥१॥ दक्षाधःकरमारभ्य वामाधःकरपर्यं
तमायुधध्यानं। विद्यां पुस्तकं टंकं आयुधविशेषः। इति वर्णारविंदं ध्यात्वा न्यसेत्॥ तद्यथा।
हृदयादिब्रह्मरंध्रांतं ४ क्षं नमः हृदयादिनाभ्यंतं ४ लं नमः इत्यादि। शिरसि ४ अं नमः इसंतं
संहारक्रमेण तत्तत्स्थानेषु न्यसेत्। इति बिंदुमातृकान्यासः॥ अथ विसर्गमातृकान्यासः।
तत्र ऋष्यादि ध्यानांतं शुद्धमातृकावद्देवि। न्यासे वर्णेषु विसर्गान्वितत्व विशेषः। इति विसर्गमा
तृकान्यासः। अबिंदुविसर्गमातृकान्यासः। तत्रापि ऋष्यादिकं शुद्धमातृकावद्देव। ध्यानेपर
विशेषः। तथा सिंदूरकांतिममिताभरणां त्रिनेत्रां विद्याक्षसूत्रमृगपोतवरां दधानां॥ पार्श्व
स्थितां भगवतीमपि कांचनाभां ध्यायेत्करां[illegible]ब्जधृतपुस्तकवर्णमालां॥१॥ वामाधः ॥५२॥

53

करमारभ्य वामोर्ध्वकरपर्यंतं आयुधध्यानं शिवस्य। शक्तेस्तु वामादिकरद्वये। इति ध्या
त्वा न्यसेत्॥ तद्यथा। दक्षिणगुल्फे ४ डं: नमः। अंगुलिमूले ४ ढं: नमः। इत्यादि प्रणवत्रिता
रादि ४ क्षं: नमः। इत्यंतं शुद्धमातृकास्थाने एवं विन्यस्य। ४ अं: नमः। इत्यादि ४ ठं: नमः। इत्यं
तं मूर्द्धादि दक्षिणजान्वंतं शुद्धमातृकास्थाने एवं न्यसेत्। इति स्थितिरूपो बिंदुविसर्गमा
तृकान्यासः। अथ हल्लेखादिमातृकान्यासः। तत्र शक्तिः ऋषिः गायत्री छंदः। हल्लेखास्वरूपि
णी मातृका सरस्वती देवता॥ इति ऋष्यादिकं स्मृत्वा विन्यस्य। ४ अं कं ४ आं ह्रां हृदयाय नमः। ४
इं चं ४ ईं ह्रीं शिरसे स्वाहा। ४ उं टं ४ ऊं ह्रूं शिखायै वषट्। ४ एं तं ४ ऐं ह्रैं कवचाय हुं॥ ४ ओं पं ४ औं
ह्रौं नेत्रत्रयाय वौषट्। ४ अं यं ४ अः ह्रः अस्त्राय फट्। इति करषडंगन्यासः। ततो ध्यानं।
उद्यत्कोटिदिवाकरप्रतिभया चंद्रार्कबिंबस्तनीबद्धार्द्धेंदुकिरीटहाररसनामंजीरसंशो
भिता॥ बिभ्राणा करपंकजैर्जपवटीं पाशांकुशौ पुस्तकं दिश्यान्नो जगदीश्वरी त्रिनयना पद्मे

निषण्णां सुखं ॥१॥ दक्षाधःकरमारभ्य वामाधःकरपर्यंतं आयुधध्यानं ॥ इति वर्णाशिविं
दं ध्यात्वा ४ ह्रीं अं नमः । इत्यादि क्षाकारांतान् वर्णान् स्वक्रमात्कां स्थानेषु न्यसेत् ॥ इति ह्रीं
स्वा मातृकान्यासः । अथ श्रीबीजादिमातृकान्यासः । तत्रास्य गुरुऋषिः गायत्री छंदः मातृम
54 या लक्ष्मीर्देवता न्यासे विनियोगः इति ऋष्यादिकं स्मृत्वा यथाविधि विन्यस्य ४ श्रां कं ४
श्रां श्रीं हृदयाय नमः इत्यादि षड्दीर्घयुक्तश्रीबीजांतैः षड्वर्गैः करषडंगन्यासं विधाय
ध्यायेत् । विद्युद्दामसमप्रभां हिमगिरिप्रख्यैश्चतुर्भिर्गजैः शुंडादंडसमुद्धृतामृतघ
जैं० टैरासिच्यमानामिमां ॥ बिभ्राणां करपंकजैः [illegible]पि वटीपद्मद्वयं पुस्तकं भास्वद्रत्नसमु
ज्ज्वलां कुचनतां ध्याये ज्जगत्स्वामिनीं ॥१॥ दक्षाधःकरमारभ्य वामाधःकरपर्यंतमायु
धध्यानं ॥ इति ध्यात्वा ४ श्रीं अं नमः इत्यादि क्षांतान् वर्णान् स्वक्रमात्कास्थाने न्यसेत् ।
इति श्रीबिजादिमातृकान्यासः । अथ कामबीजादिमातृकान्यासः । तत्रसंमोहन

ऋषिः गायत्री छंदः मातृकामयी संमोहिनी देवता न्यासे विनियोगः। इति विन्यस्य।
षट्दीर्घयुक्तकामबीजाभ्यां तैः षडूवर्गैः प्राग्वत् करषडंगन्यासं विधाय ध्यायेत्।। बाल
र्ककोटिरुचिरां स्फटिकाक्षमालां कोदंडमिषुं जपितं स्मरपंचबाणान्।। विद्यां च ह
स्तकमलैर्दधतीं त्रिनेत्रां ध्यायेत्समस्तजननीं नवचंद्रचूडां।।१।। वामाधः करमाद्य
दक्षाधः करपर्यंतमायुधध्यानं। चकारादक्षमालापुस्तकयोर्व्यत्ययो बोधव्यः।
इति ध्यात्वा ४ क्लीं अं नमः। ४ क्लीं आं नमः। एवं क्षां तं मातृकास्थानेषु न्यसेत्। इति का
मबीजादिमातृकान्यासः।। अथ त्रिबीजादिमातृकान्यासः। तत्र महासंमोहनऋ
षिः गायत्री छंदः मातृकामयी महासंमोहिनी देवता। न्यासे विनियोगः। इति विन्य
स्य द्विरुक्तत्रिबीजाभ्यां तैः षडूवर्गैः प्राग्वत्करषडंगन्यासं विधाय ध्यायेत्।। ध्यायेयम
क्षवलयेक्षुशरासपाशपद्मदर्पयांकुशशरान्वपुस्तकं च।। आबिभ्रतीं निजकरै

॥५५॥ ररुणाकुचार्तसिंमोहिनींत्रिनयनांनवचंद्रचूडां॥१॥वामाधःकरमारभ्यदक्षाधः
करपर्यंतमायुधध्यानं॥अत्रापिचकारात्पूर्ववद्व्यत्ययोबोधव्यः॥इतिध्यानं॥४ह्रीं
श्रींक्लींअंनमः।४ह्रींश्रींक्लींआंनमः।इत्यादिक्षांतांन्यसेत्॥इतित्रिबीजादिमातृका
न्यासः।अथवालींसंपुटितमातृकान्यासः।तत्रदक्षिणामूर्तिर्ऋषिःगायत्रीछंदःबा
लारूपिणीमातृकासरस्वतीदेवता।इतिऋष्यादिकंसंस्मृत्योविन्यस्यकरांगन्यासं
कुर्यात्॥तद्यथा॥४अंकं४आंऐंहृदयायनमः।४इंचं४ईंक्लींशिरसेस्वाहा।४उंटं४
ऊंसौःशिखायैवषट्।४ऐंतं४ऐंसौःकवचायहुं।४ओंपं४औंक्लींनेत्रत्रयायवौषट्
।४अंयं१अःऐंअस्त्रायफट्।इतिकरांगन्यासंविधायध्यात्।तद्यथा।मुक्तासेखरे
कुंडलांगदमणिग्रैवेयहारोर्मिकांविद्योतद्वलयादिकंकणत्कटीसूत्रस्फुरन्नू
पुरांमाणिक्यैरवंधुरस्तनभरांभिंदोःकलांबिभ्रतींपाशांकुशपुस्तकाक्षवे ॥५५॥

55

लयान्दक्षोर्ध्वबाहोरिति॥१॥ पूर्णेन्दुप्रतिमप्रसन्नवदनां नेत्रत्रयोद्भासितामिं
दुक्षीरधवलक्षौमगात्रविलसन्माल्यानुलेपांबरां॥ पंचाशल्लिपिविजृंभिताखिलज
गद्वाग्देवतादेवतां मूलाधारसमुद्गतां भगवतीं वर्णाम्बुजे चिंतयेत्॥२॥ इति वर्णा
रविं[redacted]ध्यात्वा न्यसेत्॥ तद्यथा॥४ ऐं क्लीं सौः अं सौः क्लीं ऐं नमः।४ ऐं क्लीं सौः आं
सौः क्लीं ऐं नमः एवं क्षान्तान् वर्णान् बालासंपुटितान् भूमातृकास्थानेषु विन्यसेत्॥ इति बा
लासंपुटितमातृकान्यासः॥ अथ परासंपुटितमातृकान्यासः। तत्र ब्रह्मा ऋषिः गायत्री छं
दः परारूपिणी मातृका सरस्वती देवता न्यासे विनियोगः।४ अं कं४ आं सां हृदयाय नमः।४
इं चं४ ईं सीं शिरसे स्वाहा।४ उं टं।४ ऊं सं शिखायै वषट्। एवं करषडंगं कृत्वा ध्यायेत्॥ तद्यथा। अ
कलेकरशीर्षाकामांत्यक्षां चंद्रकलावतीं मुद्रापुस्तकसद्बाहुं प्रणमामि परां कलां॥१॥
इति वरविंदे ध्यात्वा न्यसेत्। तद्यथा४ सौः अं सौः नम४ सौः आं सौः नमः। एवं क्षांतं मा

56

त्रिकास्थाने षुन्यसेत्॥ इति परासंपुटितमातृकान्यासः॥ अथ श्रीविद्यायुक्तमातृकान्यासः।
तत्र दक्षिणामूर्तिर्ऋषिः गायत्री छंदः श्रीमातृकासुंदरी देवता। इति ऋष्यादिकं स्मृत्वा
विन्यस्य करांगन्यासं कुर्यात्॥ तद्यथा। ओं ऐं ह्रीं श्रीं अं कं ४ प्रथमकूटमूच्चार्य आं हृदयाय
नमः। ४ द्वितीयकूटं इं शिरसे स्वाहा। ४ उं टं ४ तृतीयकूटं ऊं शिखायै वषट्। ४ एं तं ४ प्रथम
कूटं ऐं कवचाय हुं। ४ ओं पं द्वितीयकूटं औं नेत्रत्रयाय वौषट्। ४ अं यं ९ तृतीयकूटं अः अस्त्रा
य फट्। ततो ध्यानं। आरक्ताभां त्रिनेत्रां मणिमुकुटवतीं रत्नताटंकरम्यां हस्तांभोजैः
सपाशांकुशमदनधनुः सायकैर्विस्फुरंतीं॥ आपिनोत्तुंगवक्षोरुहतटविलुग
तारहारोज्वलांगीं ध्यायेदंभोरुहस्थामरुणनिवसनामीश्वरीमीश्वराणां॥ १॥ वामा
द्यूर्ध्वयोराद्यतदाद्यधःस्तयोरन्यरसायुध ध्यानं। इति वर्णान् रविंदे ध्यात्वा न्यसेत्॥ ॥५६॥
तद्यथा। ४ मूलविद्यामुच्चार्य अं नमः। एवं प्रणवत्रितारश्रीविद्यादिर्नमोंतान् आकारादि

क्षकारांतान्वर्णान्मातृकास्थानेषु न्यसेत्॥ इति श्रीविद्यामातृकान्यासः। अथ हंसमा
तृकान्यासः। तत्र ब्रह्मा ऋषिः गायत्री छंदः हरगौ स्वरूपिणी मातृका सरस्वती देवता॥ इति
ऋष्यादिकं स्मृत्वा विन्यस्य करांगन्यासं कुर्यात्॥ ४ अं कं ४ आं हां सां हृदयाय ४ इं चं ४ ईं हिं सं
शिरसे ४ उं टं ४ ऊं हूं सूं शिखायै वषट्॥ ४ एं तं ४ ऐं हैं सैं कवचाय हुं॥ ४ ओं पं ४ औं हौं सौं
नेत्रत्र ४ अं यं ९ अः हः सः अस्त्राय फट् इति विन्यस्य ततो ध्यानं॥ उद्यद्भानुस्फुरिततडि
दाकारमर्द्धांबिकेशं पाशाभीतिवरदपरशुं संदधानं कराब्जैः॥ दिव्याकल्पैर्नवम
णिमयैः शोभितं विश्वमूलं सौम्याग्नेयं वपुरवतु न श्चंद्रचूडं त्रिनेत्रं॥१॥ वामोर्ध्वादि
दक्षोर्ध्वकरपर्यंतमायुधध्यानं॥ इति ध्यात्वा न्यसेत्॥ ४ हंसः अं नमः। एवं क्षांतं मातृ
कास्थानेषु न्यसेत्॥ इति हंसमातृकान्यासः॥ अथ परमहंसमातृकान्यासः। तत्र परम
हंस ऋषिः गायत्री छंदः परमात्मस्वरूपिणी मातृका सरस्वती देवता। इति ऋष्यादिकं

57

स्मृत्वाविन्याकरांगन्यासंकुर्यात्॥४ॐअंकं४आंॐहृदयाय॰४ॐइंचं४ईंॐशिरसे
स्वाहा॥४ॐउंटं४ऊंॐशिखायैवषट्॥४ॐएंतं४ऐंओंकवचायहुं॥४ओंओंपं४औं
ओंनेत्रत्रय॰४ओंअंयं९अःओंअस्त्रायफट्।इतिविन्यस्य।ततोध्यानं।श्रीमत्परात्ममनु
जन्मितवर्णरूपांमानेरगम्यपरवीपरिस्थीयमानं॥विद्याक्षसूत्रकलशान्दधतींचमु
द्रांध्यायेत्समस्तजननींशिवदांत्रिनेत्रां॥१॥वामाधःकरयोरधोर्ध्वयोरन्य
इत्यायुधध्यानं।मुद्रांज्ञानमुद्रां।इतिध्यात्वान्यसेत्॥४सोहंहंसंनमः४सोहंलोनमःएव
मकारान्तान्वर्णान्पूर्ववत्संहाररीत्यान्यसेत्।इतिपरमहंसमातृकान्यासः।इतित्रयो
दशविधन्यासः।अथप्रणवोत्थकलामातृकान्यासः।तत्रप्रजापतिऋषिःगायत्री
छंदःकलामयीमातृकासरस्वतीदेवताइतिऋष्यादिकंस्मृत्वान्यसेत्।ममश्रीविद्यां
गत्वेन्यासेविनियोगः।ततःकरांगन्यासंकुर्यात्॥४अंॐआंहृदयाय॰४इंॐईंशिरसे॰ ॥५७॥

एवं करांगन्यासं कुर्यात् ततो ध्यानं ॥ हस्तैः पद्मं रथांगं गुणमथ हरितं पुस्तकं वर्णमालां
टंकं शुभ्रं कपालं दरममृतलसद्धेमकुंभं वहंतां ॥ मुक्ताविद्युत्पयोदस्फटिकनवजपा
बंधुरैः पंचवक्त्रैस्त्र्यक्षैर्वक्षोजनम्रां सकलशशिनिभां शारदां तां नमामि ॥१॥ वामाध
धः करयोराद्येतदाघूर्ध्वयोरपरे तदाघूर्ध्वयोरितरे तदाघूर्ध्वयोरन्यो इत्यायुधध्यानं ॥
दरः शंखः गुणः पाशः इति वर्णारविंदे ध्यात्वा न्यसेत् । तद्यथा । ओं ऐं ह्रीं श्रीं ओं अं निवृ
त्तिकलायै नमः ।४ ओं आं प्रतिष्ठाकलायै नमः ।४ ओं इं विद्याकलायै ४ ओं ईं शांतिकला
यै नमः ।४ उं इंधिकाकलायै ४ ओं ऊं दीपिकाकलायै नमः ४ ओं ऋं रेचिकाकलायै नमः ४
ओं ॠं मोचिकाकलायै ४ ओं लृं पराकलायै ४ ओं ॡं सूक्ष्माकलायै ४ ओं एं सूक्ष्मा
मृताकलायै ४ ओं ऐं ज्ञानामृताकलायै नमः ।४ ओं ओं आप्यायिनीकलायै ४ ओं औं व्या
पिनीकलायै ४ ओं अं व्योमरूपिणीकलायै ४ ओं अः अनंताकलायै ४ विद्युर्योनिमिति
जपेत् ४ ओं १६ मुक्तिमुक्तिप्रदा नादजा च्यनंतकलाख्यो नमः इति मुखे व्यापकं ॥४ ओं कं

सृष्टिकलायै ४ ओं खं ऋद्धिकलायै ४ ओं गं स्मृतिकलौ ओं घं मेधाकलायै ४ ओं ङं कां
तिकलायै ४ ओं चं लक्ष्मीक ४ ओं छं द्युतिक ४ ओं जं स्थिराक ४ ओं झं स्थितिक० ४ ओं
ञं सिद्धिकलायै० ४ हंसः शुचिषदिति जपेत् सृष्टिप्रदाकारप्रभव ब्रह्मकलाभ्यो
नमः। इति भुजयोर्व्यापकं ॥४ ओं टं जराक० ४ ओं ठं पालिनीक० ४ ओं डं शांतिक० ४ ओं
ढं ऐश्वर्यीक० ४ ओं णं रतिक० ४ ओं तं कामिकाक० ४ ओं थं वरदाक० ४ ओं दं ह्लादिनी
क० ४ ओं धं प्रीतिक० ४ ओं नं दीर्घाक० ४ प्रतद्विष्णुस्तवते इति जपेत् ॥४ टं ५ तं ५ स्थिति
प्रदोकारप्रभव विष्णुकलाभ्यो नमः इति पादयोर्व्यापकं न्यसेत् ॥४ ओं पं तीक्ष्णाक० ४
ओं फं रौद्रीक० ४ ओं बं भयाक० ४ ओं भं निद्राकला० ४ ओं मं तंद्राकला० ४ ओं यं क्षुधाक० ४
ओं रं क्रोधिनीक० ४ ओं लं क्रियाक० ४ ओं वं उत्कारीकला० ४ ओं शं मृत्युरूपाक० ४ त्र्यंबकं
यजामहे इति जपेत् ॥४ पं ५ यं ५ संहृतिप्रदमकारप्रभव रुद्रकलाभ्यो नमः इति हृदयादि

मध्येव्यापकं न्यसेत्॥४ ओं बं पीताकला०४ ओं सं श्वेताक०४ ओं हं अरुणाकला०४ ओं लं
असिताकला०४ ओं क्षं अनंताकला०४ तत्सवितुरितिजपित्वा॥४ बंपतिरोधानप्रद बिं
दुप्रभवेशानकलाभ्यो नमः इति सर्वांगे व्यापकं॥ इति शुद्धमातृकास्थानेषु न्यसेत्॥ इति
प्रणवकलामातृकान्यासः॥ अत्र नादात्मनः सदाशिवात्संभूताः स्वरजाः कलाः श्वेताः॥
अक्षस्रक्पुस्तकपाशकपालकरा ध्येयाः॥ कचवर्गकला अकाराद्भूसणोद्भूताः पीताः।
अक्षस्रक्पंकजाभयकमंडलुकरा ध्येयाः॥ टवर्गजाः उकाराद्विष्णोरुत्पन्नाः श्यामाः।
अभयशंखचक्रवरहस्ता ध्येयाः। पयवर्गजाः मकाराद्रुद्रादुत्पन्नाः शरच्चंद्रनिभाः।
अभयशूलकपालवरहस्ताः ध्येयाः॥ षादिपंचवर्णजा ईश्वरादिंदोरुत्पन्ना रक्ताः।
अभयहरिणटंकवरहस्ता ध्येयाः॥ इति तारोत्थकलामातृकाध्येयान्यस्तव्याश्च॥ अथा
ष्टत्रिंशत्कलामातृकान्यासः। तत्र सोमसूर्याग्नयः ऋषयः अनुष्टुप्त्रिष्टुप्त्रिष्टुप्पंक्तयः

॥५९॥

छंदः सि। अष्टत्रिंशत्कलारूपिणी मातृकादेवता। श्रीविद्यांगत्वे न्यासे विनियोगः। इति
ऋष्यादिकं स्मृत्वा विन्यस्य ॥४ स्वरैर्हृत् ।४ पंचवर्गैः शिरः ।४ यादिभिः शिखा पुनः ।४ स्वरैः
कवचं ।४ पंचवर्गैर्नेत्रं ।४ यादिभिरस्त्रं । इति करषडंगन्यासं विधाय ध्यायेत् ॥ तद्यथा ॥
चंद्रसूर्याग्निसंकाशां वक्त्रदेहपदद्वयां ॥ सुधाढ्यकलशं पद्मं स्वस्तिकं च वरं करैः ॥१॥
दधानां चिंतयेद्देवीं पद्मस्थां परमेश्वरीं ॥ त्रिनेत्रां रक्तवसनां दिव्याभरणभूषितां ॥२॥
इति ध्यात्वा न्यासं कुर्यात् ॥ तत्र ।४ अं अमृताकलायै नमः ।४ आं मानदाक०४ इं पूषाक०४
ईं तुष्टिक०४ उं पुष्टिकली०४ ऊं रतिकली०४ ऋं धृतिक०४ ॠं शशिनीकला०४ लृं चंद्रि
काकली०४ ॡं कांतिक०४ एं ज्योत्स्नाकली०४ ऐं श्रीकली०४ ओं प्रीतिक०४ औं अंगदाक०
४ अं पूर्णाकली०४ अः पूर्णामृताकलायै नमः ॥ इति षोडशकलाः षोडशस्थानेषु
न्यसेत् ॥ ततः ॥४ कं भं तपिनीकलायै नमः ।४ खं बं तापिनीक०४ गं फं धूम्राक०४ घं पं

59

॥५९॥

मरीचीक०४ उं नं ज्वालिनीक०४ चं धं रुचिक०४ छं दं सुषुम्णाक०४ जं थं भोगदाक०४ झं तं विश्वा
कला०४ ञं णं बोधिनीक०४ टं ढं धारिणीक०४ ठं डं क्षमाक० इति दक्षिणबाहुमूलादि दक्षि
णजान्वंतं मातृकास्थानेषु न्यसेत्॥ ततः १४ यं धूम्रार्चिकलायै नमः॥ ४ रं उष्माक०४ लं ज्वलि
नीक०४ वं ज्वालिनीक०४ शं विस्फुलिंगिनीक०४ षं सुश्रीक०४ सं सुरूपाकला०४ हं कपिलाक
ला०४ ळं हव्यवाहक०४ क्षं कव्यवाहकलायै नमः। इति दक्षिणगुल्फादि वामपादांतं मूर्द्धस
र्वांगे च न्यसेत्॥ एताः श्वेतपीतारुणावराभयकराः सर्वाभरणभूषिता युवतयो ध्येयाः॥ ॥
इत्यष्टत्रिंशत्कलाः मातृकाश्चाष्टत्रिंशत्स्थानेषु न्यसेत्॥ श्रीविद्यानंदनाथेन शिवयोः प्रिय
सूनुना॥ कृते सौभाग्यरत्नाब्धौ तरंगोऽगाच्चतुर्थकः॥ ॥ इति श्रीसच्चिदानंदनाथेश्वरचार
विंदद्वंद्वांतेवासिना श्रीश्रीविद्यानंदनाथेन विरचिते सौभाग्यरत्नाकरे चतुर्थस्तरंगः॥४॥
॥ अथ मूर्तिमातृकान्यासः॥ तत्रादौ केशवादिमातृकान्यासः॥ ~~रिभियोगमा॥ इति ध्यात्वा~~ कं

60

तत्र ओं साध्यनारायणऋषिर्गायत्री छंदः श्रीलक्ष्मीनारायणो देवता। मम श्रीविद्यां
गत्वेन्यासे विनियोगः॥ इति ऋष्यादिकं स्मृत्वा विन्यस्य करषडंगन्यासं कुर्यात्॥ तद्यथा॥
ओं ऐं ह्रीं श्रीं ओं श्रीं ओं नमो नारायणाय हंसः सोहं अं कं ४ आं ह्रीं हंसः सोहं ओं नमो ना
रायणाय क्रुद्धोल्काय स्वाहा श्रां देव्यै हृदयाय नमः॥१॥ ओं ऐं ह्रीं श्रीं ओं श्रीं ओं नमो नाराय
णाय हंसः सोहं इं चं ४ ईं ह्रीं हंसः सोहं ॐ नमो नारायणाय महोल्काय स्वाहा श्रीं पद्मिन्यै सि
रसे स्वाहा॥२॥ ४ ॐ १३ उं टं ४ ऊं ह्रीं १२ वीरोल्काय स्वाहा श्रूं विष्णुपत्न्यै शिखायै वषट्॥ ४
ॐ १३ एं तं ४ ऐं ह्रीं १२ विद्युदुल्काय स्वाहा श्रैं वरदायै कवचाय हुं॥ ४ ॐ १३ ॐ पं ४ औं ह्रीं १२
सहस्रोल्काय स्वाहा श्रौं कमलरूपायै नेत्रत्रयाय वौषट्॥५॥ ४ ॐ १३ अं यं ४ अः ह्रीं १२
अनंतोल्काय स्वाहा श्रः शूलिन्यै अस्त्राय फट्॥६॥ इति षडंगमंत्रानंगुष्ठादितलां
तं करयोर्विन्यस्य हृदयादि षडंगेष्वपि न्यसेत्॥ ततो ध्यानं॥ विद्यारविंदमुकुरामृत ॥५०॥

ॐ भप्पकौमोदकीदरसुदर्शनश्रीभिहस्तं॥ सौदामिनीमुंदिरकांतिविभाभिलक्ष्मी
नारायणात्मकमखंडितमात्ममूर्तेः॥१॥ वपुरितिशेषः॥ वामाधःकरमारभ्य दक्षाधः
करपर्यंतं आयुधध्यानं॥ मुकरादर्पणः॥ इति ध्यात्वा न्यसेत्॥ तद्यथा ॐ ऐं ह्रीं श्रीं ह्रीं
श्रीं क्लीं अं क्लीं श्रीं ह्रीं केशवाय कीर्त्यै नमः॥१॥ ह्रीं श्रीं क्लीं आं क्लीं श्रीं ह्रीं नारायणाय कांत्यै नमः॥१
इं ३ माधवाय तुष्ट्यै नमः॥१ ईं ३ गोविंदाय पुष्ट्यै॰१ उं ३ विष्णवे धृत्यै नमः॥१ ऊं ३ मधुसू
दनाय शांत्यै न॰१ ऋं ३ त्रिविक्रमाय क्रियायै नमः॥१ ॠं ३ वामनाय दयायै नमः॥१ लृं ३
श्रीधराय मेधायै नम॰१ ॡं ३ हृषीकेशाय हर्षायै॰१ एं ३ पद्मनाभाय श्रद्धायै॰१ ऐं ३
दामोदराय लज्जायै॰१ ओं ३ वासुदेवाय लक्ष्म्यै॰१ औं ३ संकर्षणाय सरस्वत्यै॰१ अं ३ प्रद्यु
म्नाय प्रीत्यै॰१ अः ३ अनिरुद्धाय रत्यै॰१ कं ३ चक्रिणे जयायै॰१ खं ३ गदिने दुर्गायै॰१ गं ३
शार्ङ्गिणे प्रभायै नमः॥१ घं ३ खड्गिने सत्यायै॰१ ङं ३ शंखिने चंडायै॰१ चं ३ हलिने वाण्यै॰१

७ वं ३ मेहात्मने बालाय सूक्ष्मायै १७ शं ३ अस्यात्मने वृषघ्नाय संध्यायै ·१७ षं ३ मन्त्रात्मने वृषाय प्रसायै ·
१७

॥५१॥ छं ३ मुसलिने विलासिन्यै नमः १७ जं ३ शूलिने विजयायै ·१७ झं ३ पाशिने विरजायै नमः १७
ञं ३ अंकुशिने विश्वायै ·१७ टं ३ मुकुंदाय विनदायै नमः १७ ठं ३ नंदजाय सुनंदायै ·१७ डं ३
नंदिने स्मृत्यै ·१७ ढं ३ नराय ऋध्यै ·१७ णं ३ नरकाजिते समृध्यै ·१७ तं ३ हरये शुध्यै नमः १७
61 थं ३ कृष्णाय भुक्त्यै ·१७ दं ३ सत्याय बुध्यै ·१७ धं ३ सात्वताय मत्यै ·१७ नं ३ शौरये क्षमायै ·१७
पं ३ शूराय रमायै ·१७ फं ३ जनार्दनाय उमायै ·१७ बं ३ भूधराय क्लेदिन्यै ·१७ भं ३ विश्वमूर्
त्तये क्लिन्नायै ·१७ मं ३ वैकुण्ठाय वसुदायै ·१७ यं ३ त्वगात्मने पुरुषोत्तमाय वसुधायै ·१७ रं ३
असृगात्मने बलिने परायै ·१७ लं ३ मांसात्मने बलानुजाय परायणायै ·१७ सं ३ शुक्रात्मने
हंसाय प्रभायै ·१७ हं ३ प्राणात्मने वराहाय निशायै ·१७ लं ३ शक्त्यात्मने विमलाय अमोघा
यै ·१७ क्षं ३ परमात्मने नृसिंहाय विद्युतायै नमः॥ एता मूर्त्तिंशत्केयो मातृकास्थाने पुन्यस्त
व्याः॥ केशवाद्या इमे शामाश्चक्रेश खलसत्कराः॥ शाक्तय स्तु प्रियाः केषु निषण्णाः सस्मि ॥५१॥

ता न नाः॥ विधुद्रुमसमानांग्यः पंकजोभयवाहवः। इति ध्येयाः॥ इति केशवादिमातृका
न्यासः॥ अथ श्रीकंठादिमातृकान्यासः। तत्र दक्षिणामूर्तिऋषिर्गायत्री छंदः श्री अर्ध
नारीश्वरी देवता। श्रीविद्यांगत्वेन्यासे विनियोगः। इति ऋष्यादिकं स्पृष्ट्वा विन्यस्य कर
षडंगन्यासं कुर्यात्। तद्यथा ४ अं कं ४ आं हस्रौं हृदयाय नमः ४ इं चं ४ ईं हस्रौं शिरसे ४ उं टं ४
ऊं हस्रौं शिखायै ४ एं तं ४ ऐं हस्रैं कवचाय ४ ओं पं ४ औं हस्रौं नेत्रत्रयाय वौ ४ अं यं
अः हस्रः अस्त्राय फट्॥ इति षडंगमंत्रानंगुष्ठादितलांतं विन्यस्य हृदयादिषु विष
डंगेषु विन्यसेत्॥ ततो ध्यानं॥ बंधूककांचननिभं रुचिराक्षमालां पाशांकुशौ च वरदं निज
बाहुदंडैः॥ बिभ्राणमिंदुशकलाभरणं त्रिनेत्रमर्द्धांबिकेशमनिशं वपुराश्रयामः॥१॥
दक्षाधःकरमारभ्य दक्षोर्ध्वकरपर्यंतमायुधध्यानं॥ इति ध्यात्वा न्यसेत्॥ तद्यथा॥ ४ ह
स्रौः अं श्रीकंठेशाय पूर्णोदर्यै नमः। ४ हस्रौः आं अनंतेशाय विरजायै ४ हस्रौः [redacted]

62

ईं सूक्ष्मेशाय शाल्मल्यै ०४ ह्स्रौः ईं त्रिमूर्तीशाय लोलाक्ष्यै ०४ ह्स्रौः उं अमरेशाय वर्तु-
लाक्ष्यै ०४ ह्स्रौः ऊं ऊर्ध्वीशाय दीर्घघोणायै ०४ ह्स्रौः ऋं भारभूतीशाय दीर्घमुख्यै ०४ ह्स्रौः
ॠं अतिथीशाय गोमुख्यै ०४ ह्स्रौः लृं स्थाणवीशाशाय दीर्घजिह्वायै ०४ ह्स्रौः लॄं हरेशाय कु-
ण्डोदर्यै नमः ०४ ह्स्रौः एं झिण्टीशाय ऊर्ध्वकेश्यै ०४ ह्स्रौः ऐं भौतिकेशाय विकृतमुख्यै ०४ ह्स्रौः
ओं सद्योजातेशाय ज्वालामुख्यै ०४ ह्स्रौः औं अनुग्रहेशाय उल्कामुख्यै नमः ४ ह्स्रौः
अं अक्रूरेशाय श्रीमुख्यै ०४ ह्स्रौः अः महासेनेशाय विद्यामुख्यै ०४ ह्स्रौः कं क्रोधीशाय म-
हाकाल्यै ०४ ह्स्रौः खं चण्डेशाय सरस्वत्यै ०४ ह्स्रौः गं पञ्चान्तकेशाय सर्वसिद्धिगौर्यै ०४
ह्स्रौः घं शिवोत्तमेशाय त्रैलोक्यविद्यायै ०४ ह्स्रौः ङं एकरुद्रेशाय मन्त्रशक्त्यै ०४ ह्स्रौः
चं कूर्मेशाय आत्मशक्त्यै ०४ ह्स्रौः छं एकनेत्रेशाय भूतमात्रे ०४ ह्स्रौः जं चतुराननेशाय
लम्बोदर्यै ०४ ह्स्रौः झं अजेशाय द्राविण्यै ०४ ह्स्रौः ञं सर्वेशाय नागर्यै ०४ ह्स्रौः टं सोमेशाय

खेचर्यै०४ हस्रौः ठं लीं गलीशाय मंजर्यै०४ हस्रौः डं दारुकेशाय रूपिण्यै०४ हस्रौः ढं अर्द्ध
नारीश्वराय वीरिण्यै०४ हस्रौः णं उमाकान्तेशाय काकोदर्यै०४ हस्रौः तं आषाढीशाय पूत
नायै०४ हस्रौः थं दंडीशाय भद्रकाल्यै०४ हस्रौः दं अत्रीशाय योगिन्यै नं०४ हस्रौः धं मीने
शाय शंखिन्यै०४ हस्रौः नं मेषेशाय गर्जिन्यै०४ हस्रौः पं लोहितेशाय कालरात्र्यै०४ हस्रौः
फं शिखीशाय कूर्दिन्यै०४ हस्रौः बं छगलंडेशाय कपर्दिन्यै०४ हस्रौः भं द्विरंडेशाय वज्रा
यै०४ हस्रौः मं महाकालेशाय जयायै०४ हस्रौः यं त्वगात्मने वालीशाय सुमुख्यै०४ हस्रौः
रं असृगात्मने भुजंगेशाय रेवत्यै०४ हस्रौः लं मांसात्मने पिनाकीशाय माधव्यै०४ हस्रौः
वं मेदात्मने खड्गीशाय वारुण्यै०४ हस्रौः शं अस्थ्यात्मने बकेशाय वायव्यै०४ हस्रौः
षं मज्जात्मने श्वेतेशाय रक्षोविदारिण्यै०४ हस्रौः सं शुक्रात्मने भृग्वीशाय सहजा
यै०४ हस्रौः हं प्राणात्मने लकुलीशाय महालक्ष्म्यै०४ हस्रौः लं शक्त्यात्मने शिवेशाय व्या

५ दिकरषडंगन्यासपूर्वकमष्टधा जपित्वा ततो गणपतिबीजं तथैव न्यासध्यानपूर्वकं चतुश्चत्वारिं
शद्वारं जपित्वा ततो न्यासपूर्वकं गणपमंत्रमेकवारमावर्त्य पुनर्गणपतिमालामंत्रं चतुर्वारमावर्त्य ततो ऋष्या ५
पिन्यै ०४ हस्त्रौः क्ष्मं परमात्मने संवर्तेशाय महामायायै नमः॥ इति मातृकास्थानेषु
न्यसेत्॥ अत्र रुद्राः स्मृता रक्ताध्वतभ्रलकपालकाः॥ शक्त्यो रुद्रपीठस्थाः सिंदूरा
रुणविग्रहाः॥१॥ रक्तोत्पलकपालाभ्याममलेकृतकरांबुजाः॥ इति मूर्तिशक्तीनां ध्यानं॥
इति श्रीकंठमातृकान्यासः॥ अथ प्रपंचयागमातृकान्यासः॥ तत्र प्रथमं महाग
॥६३॥ णपतिमंत्रं ऋष्यादिन्यासध्यानपूर्वकं पूर्वोक्तां शुद्धमातृकां त्रिवारं विन्यस्य ततः स
त्पग्रहा विन्यस्य ततः प्रपंचयागमंत्रस्य ऋष्यादिकरषडंगन्यासान्विन्यस्य ध्यानपूर्व
कं प्रपंचयागमातृकां संहाररसृष्टिमार्गेण न्यसेत्॥ इति क्रमः। तत्र महागणपतिमंत्र
स्य गणकऋषिः निवृत् गायत्री छंदः श्रीमहागणपतिर्देवता प्रपंचयागांगत्वे जपे
विनियोगः। इति ऋष्यादिकं स्मृत्वा विन्यस्य करषडंगन्यासं कुर्यात्॥ तद्यथा ०४ ओं गां ॥६३॥
हृदयाय ०४ श्रीं गीं शिरसे ०४ ह्रीं गूं शिखायै ०४ क्लीं गैं कवचाय ०४ ग्लौं गौं नेत्र ०४ गं गः अस्त्राय फट्

इति मंत्रैः करांगन्यासं कृत्वा ध्यानं कुर्यात्। तद्यथा॥ हस्तीन्द्राननमिंदुचूडमरुणच्छायं त्रिनेत्रं
रसादाश्लिष्टं प्रियया सपद्मकरया स्वांकस्थया संततं॥ बीजापूरगदाधनुस्त्रिशिखयुक्च
क्रोब्जपाशोत्पलव्रीह्यग्रस्वविषाणरत्नकलशान्हस्तैर्वहंतं भजे॥१॥ गंडभित्ति
गलद्दानपूरलोलसमानसान्॥ द्विरेफान्कर्णतालाभ्यां वारयंतं मुहुर्मुहुः॥२॥ कराग्रधृ
तमाणिक्यकुंभवक्त्रविनिःसृतैः। रत्नवर्षैः प्रीणयंतं साधकान्मदविह्वलान्॥३॥ माणिक्य
मुकुटोपेतं रत्नाभरणभूषितं। युगपत्सेवितं देवैरसुरैश्च मुहुर्मुहुः॥४॥ वामधःक
रमारभ्य दथाधःकरपर्यंतमायुधध्यानं। रत्नकलशं शुंडाग्रे। त्रिशिखं त्रिशूलं।
इति महागणपतिं सांगावरणं ध्यात्वा। ॐ श्रीं ह्रीं क्लीं ग्लौं गं गणपतये वरवरद सर्व
जनं मे वशमानय स्वाहा। इति मंत्रमष्टधा जपित्वा। गणपतिबीजस्य गणक ऋषिः
निचृत् छंदः। विघ्नेश्वरो देवता। पंचयागांगत्वे बीजजपे विनियोगः। इति ऋष्यादिकं

॥६४॥ स्मृत्वा विन्यस्य ४ गां ४ गीं रसादिना करषडंगन्यासं विधाय । ध्यानं । सिंदूराभं त्रिनेत्रं
पृथुतरजठरं हस्तपद्मैर्दधानं दंतं पाशांकुशेष्टान्युरुकरविलसद्बीजपूराभि-
रामं ॥ बालेंदुद्योतिमौलिं करिपतिवदनं दानपूरार्द्रगंडं भोगींद्राबद्धभूषं भजत
गणपतिं रक्तवस्त्रांगरागं ॥१॥ वामाधःकरमारभ्य दक्षाधःकरपर्यंतं आयुध-
ध्यानं । इष्टो वरः । उरुकरः शुंडादंडः । इति ध्यात्वा गणपतिं बीजं चतुश्चत्वारि-
शत्सहस्रं जपित्वा ॥ ४ ॐ गणानां नमः शिरसि । अलिके ४ त्वा नमः वदने ४ गणपतिं
नमः दक्षकर्णे । हवामहे नमः वामकर्णे । ४ कविं नमः आस्ये । ४ कवीनां नमः गले ४
मुपमश्रवस्तमं नमः अंसयोः ४ ज्येष्ठराजं नमः हृदि ४ ब्रह्मणां नमः नाभौ ४ ब्र-
ह्मणः नमः गुह्ये ४ पते नमः दक्षजानौ ४ आ न नमः वामजानौ ॥ ४ नः नमः दक्षोरौ ४ शृ- ६४
ण्वन् नमः वामोरौ । ४ ऊतिभिर्नमः पृष्ठे ४ सीद नमः ककुदि ४ सादनं नमः ॥ इति विन्यस्य ॥

ओं गणानां त्वा गणपतिं हवामहे कविं कवीनां मुपमश्रवस्तमं ॥ जेष्ठराजं ब्रह्मणां ब्रह्मण
स्पत आनृश्व एवन्नूतिभिः सीदसादनं ॥१॥ इति ऋचं एकवारं जपित्वा ॥ गणपतिमा
लो मंत्रं जपेत् ॥ ह्रीं क्रों ओं नमः सर्व विघ्नाधिपाय सर्वार्थसिद्धिदाय सर्व दुःख प्रशम
नाय ऐं ह्यें हि भगवन् सर्वान् वादय २ स्तंभय २ ह्रीं गं गां नमः स्वाहा क्रों ह्रीं इति माली
मंत्रं चतुरावृत्तिर्जपित्वा ततः पूर्वोक्तां षुड्कमातृकां कृष्यादि कर षडंगन्यास ध्यानपू
र्वकं वारत्रयं षुड्कमातृकास्थाने विन्यस्य ॥ मुखे ४ अं १५ आदित्यायनमः ॥ दक्षिनबाहु
मूलाद्यग्रांतं ४ यं ३ सोमायनमः । वामबाहु मूलाद्यग्रांतं ४ कं ४ भौमायनमः । दक्षिणो
रु मूलादि पादाग्रांतं ४ चं ४ शुक्रायनमः । वामोरु मूलादि पादाग्रांतं ४ टं ४ बुधायनमः । ज
ठरे ४ तं ४ ब्रहस्पतयेनमः । हृदये ४ पं ४ शनैश्चरायनमः । इति सम्यग्हाचि विन्यस्य ॥ ततः
प्रपंचयाग मंत्रस्य ब्रह्माऋषिः गायत्रीछंदः सकलपदार्थानुगतपरिपूर्णस्वप्रकाश

सच्चिदानंदपरंज्योतिःपरमात्मादेवताश्रीविद्यांगत्वेनपंचयागमातृकान्यासेविनि
योगः। इतिऋष्यादिकंस्मृत्वाविन्यस्य। ४ ॐ ह्रीं अं कं ४ ओं स्वाहा हृदयाय॰ ४ ॐ ह्रीं इं चं ४
ईं सोऽहं सिरसे स्वाहा। ४ ॐ ह्रीं उं टं ४ ऊं हंसः शिखायै वषट् ४ ओं ह्रीं एं तं ४ ऐं ह्रीं कवचा
य हुं। ४ ओं ह्रीं ओं पं ४ औं नेत्रत्रयाय वौषट्। ४ ओं ह्रीं अं यं ९ अः हरिहरास्त्राय फट्॰
इतिकरषडंगन्यासंविधायध्यानंकुर्यात्। तद्यथा॥ तारा पंचमनुभिः परिचीयमाने
मानेरगम्यमनिशंजगदेकमूले॥ सच्चित्समस्तगमनेश्वरमच्युतंतंतेजःपरंभजत
सांद्रसुधांबुराशिं॥१ इतिसकलप्रपंचातिरिक्तःसर्वसाक्षीनिरतिशयानंदचिद्वि
लासाविनाभूतःपरिपूर्णसच्चिदानंदोहमितिस्वात्मानंध्यात्वाश्रीपरदेवतापरात्म
निवहौतत्तत्स्थानयुक्तान्वर्णान्जुहोमि॰ इतिधियास्वस्मिन्वर्णान्जुहुयात्॥ तद्यथा॥ ४
ॐ ह्रीं क्षं हंसः सोहं स्वाहा। ४ ॐ ह्रीं लं हंसः सोहं स्वाहा। ४ ॐ ह्रीं हं हंसः सोहं स्वाहा। इत्यादि ४

65

ॐ ह्रीं क्षं हं सः सोहं स्वाहा।०२ सादि ४ ॐ ह्रीं क्षं हं सः सोहं स्वाहा २ इत्येतं मातृकास्थाने
षु विन्यसेत्॥ इति प्रपंचयागमातृकान्यासः॥ अथ भूतलिपिन्यासः। तत्रास्या भूत
लिपिमंत्रस्य। दक्षिणामूर्तिऋषिः गायत्री छंदः भूतलिपिसरस्वती देवता। श्रीवि
द्यांगत्वे भूतलिपिन्यासे विनियोगः। इति ऋष्यादिकं स्मृत्वा विन्यस्य ४ हं यं रं वं लं
हृदयाय नमः। ४ उं कं खं घं गं शिरसे स्वाहा। ४ ऋं चं छं झं जं शिखायै वषट्। ४ लृं टं ठं
ढं डं कवचाय हुं। ४ नं तं थं धं दं नेत्रत्रयाय वौषट्। ४ मं पं फं भं बं अस्त्राय फट् इति मंत्रैः
करषडंगन्यासं विधाय ध्यायेत्। तद्यथा॥ चिद्बीजं बिंदुनादाङ्कुशिखं विश्वंभराक्षरैः॥
शाखासमूहैः सकलदिशासु सुविजृंभितं॥१॥ जलवर्णदलत्रातेनाच्छादितजग
त्त्रयं॥ हेशानुवर्णांकुरैश्च संदीप्तं सुरभूतहं॥२॥ रत्नांकुरै रिवर्णभूपवनाक्षरशो
भितैः॥ कुसुमैर्दीर्घवर्यैश्च स्वकीयतनुसच्छ्रियं॥३॥ वियदक्षरसद्रूपैः फलै रान

॥६६॥ तमुत्तमं॥ सर्वभूताश्रयं नित्यं परामृतमधुद्रवैः॥४॥ सिंचितं परमेशानी देवी वागीश्व
री शुभां॥ निगमागमसंकूलसमुन्नेति सुशोभितं॥५॥ त्रिवर्गात्मकछाया समाश्रि
त जगत्त्रयं॥ यमाश्रित्य मुनीन्द्रौघाः वांछितार्थान्प्रपेदिरे॥६॥ एवंभूतार्णवृक्षस्य मूले
त्वक्षरपंकजे॥ वागीश्वरीं स्मरेन्नित्यं सकलेष्टफलप्रदां॥७॥ कुंदाभासामुरुकुचघटो
66 शोभिचंद्रार्धमौलिं हस्तांभोजैर्वरजपवटीपुस्तकं पुंकपाले॥ बिभ्राणां तामधुमदलल
सद्विकूलोयुग्मनेत्रां देवीं ध्यायेल्लिपिमयतनुं यौवनश्रीमनोज्ञां॥८॥ दक्षाधः करमार शोह
भ्य वामाधः करपर्यंतं आयुधध्याने॥ इति ध्यात्वा न्यसेत्॥ तत्र प्रथमं संहारन्यासः॥
संहारे च तथा सृष्टिं स्थितिं न्यासं समाचरेत्॥ इति कुलार्णवे॥ तत्र गले। क्षों ऐं ह्रीं श्रीं लं
नमः। हृदि ४ कं नमः। ४ नाभौ ऊं नमः। स्वाधिष्ठाने ४ इं नमः। मूलाधारे ४ अं नमः। द्वाद
शांते ४ औं नमः। वात्यां ४ ओं नमः। नादे ४ ऐं नमः। बिंदौ ४ एं नमः लंबिकायां॥ नामोतरं ॥६६॥

चोरकूपे॥४लं नमः। वामकर्णे॥४वं नमः। दक्षकर्णे॥४रं-मुखे।४यं-।मूर्ध्नि४हं न-।दक्ष
मणिबंधे।४गं-।-अंगुलिमूले४घं न-।कूर्परे४खं-।बाहुमूले।४कं-।-अंगुल्यग्रे४ङं-न-।
वाममणिबंधे४ञं-।-अंगुलिमूले४झं-।कूर्परे४छं-।बाहुमूले४चं-।-अंगुल्यग्रे४ञं-।
दक्षपादगुल्फे४ङं नमः।-अंगुलिमूले४ढं-।जानुनि४ठं-।ऊरुमूले४टं-।-अंगुल्यग्रे४णं-।
वामगुल्फे४दं-।-अंगुलिमूले४धं-।जानुनि४थं-।ऊरुमूले४तं-।पादाग्रे४नं।पृष्ठे४बं-।नाभौ४
मं-।वामपार्श्वे४फं-।दक्षे४वं-।उदरे४मं-।मध्ये४सं-।हृदये४षं-।गुह्ये४शं-।इति संहार
न्यासः॥अथ सृष्टिन्यासः।तत्र मूलाधारे४अः नमः।एवं-स्वाधिष्ठाने४ईः नमः।नाभौ४ऊः।
हृदि४ॠः।गले४ॡः।बिंदौ४एः।नादे४ऐः नमः शक्त्यां४ओः।द्वादशांते४औः।मूर्ध्नि४हः
नमः।मुखे४यः नमः।दक्षकर्णे४रः नमः।वामे४वः नः।चूडायां४लः।दक्षकराङ्गुल्यग्रे४
ङः नमः।बाहुमूले४कः।मध्ये४खः।-अंगुलिमूले४घः।मणिबंधे४गः।वामकराङ्गुल्यग्रे४

॥६७॥ ञः। बाहुमूले ४ चः। मध्ये ४ छः। अंगुलिमूले ४ सः। मणिबंधे ४ जः। दक्षपादाग्रे ४ णः। ऊरु
मूले ४ टः। जानुनि ४ ठः। अंगुलिमूले ४ डः। गुल्फे ४ ढः। वामपादाग्रे ४ नः। ऊरुमूले ४ तः।। जा
नुनि ४ थः। अंगुलिमूले ४ धः। गुल्फे ४ दः। उदरे ४ मः। दक्षपार्श्वे ४ पः। वामे ४ फः। नाभौ ४ भः।
पृष्ठे ४ बः। मूलाधारे ४ शः। हृदि ४ षः। भ्रूमध्ये ४ सः नमः। इति ऋषिन्यासः।। अथ स्थिति
67 न्यासः।। तत्र मूलाधारे ४ लं नमः। एवं स्वाधिष्ठाने ४ इः नमः। हृदि ४ ऋं। गले ४ ऌं। ना
भौ ४ उं। बिंदौ ४ एं। नादे ४ ऐं। द्वादशांते ४ ओं। शीर्षे ४ औं। ब्रह्मरंध्रे ४ हं। मुखे ४ यं।
वामकर्णे ४ वं। चूडाधः ४ लं। दक्षकर्णे ४ रं। दक्षकरांगुल्यग्रे ४ ङं। बाहुमूले ४ कं। अंगु
लिमूले ४ घं। मणिबंधे ४ गं। कूर्परे ४ खं। वामकरांगुल्यग्रे ४ ञं। वामबाहुमूले ४ चं।
अंगुलिमूले ४ सं। मणिबंधे ४ जं। मध्ये ४ छं। दक्षपादांगुल्यग्रे ४ णं। दक्षोरुमूले ४ टं।
अंगुलिमूले ४ ढं। गुल्फे ४ डं। जानुनि ४ ठं। वामपादांगुल्यग्रे ४ नं। वामोरुमूले ४ तं। ॥६७॥

अंगुलिमूले ४ धंः। गुल्फे ४ दंः। जानुनि ४ धंः। उदरे ४ मंः। दक्षपार्श्वे ४ वंः। नाभौ ४
मंः। पृष्ठे ४ वंः। वामपार्श्वे ४ कंः। हृदि ४ बंः। भ्रूमध्ये ४ संः। गुह्ये ४ शंः नमः॥ इति स्थितिन्यासः॥
॥ इति मूलतलिपिमातृकान्यासः॥ अथ षट्त्रिंशत्तत्वन्यासः॥ तत्रे जान्वादिपादपर्यंतं ४
क्षं पृथिवीतत्वात्मने श्रीमहात्रिपुरसुंदर्यै नमः। नाभ्यादिजान्वंतं ४ लं अप्तत्वात्मने
श्री०। कंठादिनाभ्यंतं ४ हं तेजस्तत्वात्मने श्री०। भ्रूमध्यादिकंठांतं ४ सं वायुतत्वात्म
ने श्री०। मूर्द्धादिभ्रूमध्यांतं ४ षं आकाशतत्वात्मने श्री०। पुनर्जान्वादिपादांतं ४ शं गंधत
त्वात्मने श्री०। नाभ्यादिजान्वंतं ४ वं रसतत्वात्मने श्री०। कंठादिनाभ्यंतं ४ लं रूपतत्वात्म
ने श्री०। भ्रूमध्यादिकंठांतं ४ रं स्पर्शतत्वात्मने श्री०। मूर्धादि भ्रूमध्यांतं ४ यं श
ब्द तत्वात्मने श्री०। गुह्ये ४ मं उपस्थतत्वात्मने श्री०। गुदे ४ भं पायुतत्वात्मने श्री०।

पादयोः ४ बं पादतत्वात्मने श्री० पाण्योः ४ फं पाणितत्वात्मने श्री० मुखे ४ पं वाक्तत्वात्मने श्री०
नासिकयोः ४ नं घ्राणतत्वात्मने श्री० जिह्वायां ४ धं जिह्वातत्वात्मने श्री० चक्षुषोः ४ दं चक्षुस्तत्वात्मने
श्री० सर्वांगे ४ थं त्वक्तत्वात्मने श्री० श्रोत्रयोः ४ तं श्रोत्रतत्वात्मने श्री० मनसि ४ णं मनस्तत्वात्मने
श्री० हृदि ४ ढं बुद्धितत्वात्मने श्री० हृदि ४ डं अहंकारतत्वात्मने श्री० सर्वांगे ४ ठं प्रकृतितत्वा
श्री० सर्वांगे ४ टं पुरुषतत्वात्मने श्री० सर्वांगे ४ ञं नियतितत्वात्मने श्री० सर्वांगे ४ झं कालतत्वात्म
नेश्री० हृदि ४ जं रागतत्वात्मने श्री० हृदि ४ छं विद्यातत्वात्मने श्री० हृदि ४ चं कलातत्वात्मने श्री०
हृदि ४ ङं मायातत्वात्मने श्री० हृदि ४ घं शुद्धविद्यातत्वात्मने श्री० मुखे ४ गं ईश्वरतत्वात्म
नेश्री० शिरसि ४ खं सदाशिवतत्वात्मने श्री० मूलाधारे ४ कं शक्तितत्वात्मने श्री० ब्रह्मरंध्रे ४
अं शिवतत्वात्मने श्री महात्रिपुरसुंदर्यै नमः॥ इति षट्त्रिंशत्तत्वन्यासः॥ श्रीविद्यानंदना
थेन शिवयोः प्रियसूनुना॥ कृते सौभाग्यरत्नाब्धौ तरंगः पंचमो मंगलं ॥१॥ इति श्रीसौ

दानंदनाथचरणारविंदद्वंद्वांतेवासिनाश्रीश्रीविद्यानंदनाथेनविरचितेसौभाग्यरत्ना
करेपंचमस्तरंगः॥ ॥५॥ अथमूलमंत्रन्यासःसचास्यांविद्यायांत्रिविधः॥षोढाश्री
चक्रकरशुध्यादिभेदात्॥षोढान्यासोपिद्विविधः॥पूर्वोत्तरभेदात्॥उत्तरोपित्रिविधः॥
महाषोढान्यासोबीजषोढान्यासोमालिन्यादिषोढान्यासश्चेति॥तत्रपूर्वषोढान्यासः
सर्वाम्नायविषयः॥उत्तरषोढान्यासस्तूर्ध्वाम्नायविषयः॥श्रीचक्रन्यासोपित्रिविधः॥सं
हारसृष्टिस्थितिभेदात्॥करशुध्यादिन्यासोपिबहुतरः॥रतिकामपंचाशत्त्रिपुरादीनां
न्यासविशेषाणांतत्रैवादिपदेनसंग्रहीतत्वात्॥तत्रादौपूर्वषोढान्यासः॥तत्रदक्षिणा
मूर्तिर्ऋषिः॥गायत्रीछंदः॥श्रीमातृकागणेशग्रहनक्षत्रयोगिनीराशिपीठमातृका
रूपिणीश्रीत्रिपुरसुंदरीदेवता॥श्रीविद्यांगत्वेन्यासेविनियोगः॥इतिऋष्यादिकंस्म
त्वाविन्यस्यकरषडंगन्यासंकुर्यात्॥तद्यथा॥ओंऐंह्रींश्रींअंकं४आंऐंहृदयायनमः॥४

॥६५॥ इं चं ४ ईं क्लीं शिरसे स्वाहा । ४ उं टं ४ ऊं सौः शिखायै वषट् । ४ एं तं ४ ऐं ऐं कवचाय हुं । ४ ओं पं ४
औं क्लीं नेत्रत्रयाय वौषट् । ४ अं यं ९ अः सौः अस्त्राय फट् । इति मंत्रानं गुष्ठादि तलांतं क
रयोर्विन्यस्य हृदयादि षडंगेषु विन्यसेत् । ततो ध्यानं । उद्यत्सूर्यसहस्राभां पीनो
न्नतपयोधरां ॥ रक्तमाल्यांबरालेपां रक्तभूषणभूषितां ॥ १ ॥ पाशांकुशौ धनुर्बाणान्भा
स्वत्पाणिचतुष्टयां ॥ लसत्त्रेत्रत्रयां स्वर्णमुकुटोद्भासिचंद्रिकां ॥ २ ॥ गणेशग्रहनक्षत्र
योगिनीराशिरूपिणीं ॥ देवीं पीठमयीं ध्यायेन्मातृकासुंदरीं परां ॥ ३ ॥ वामो धूर्ध्व
योराद्येरस्या पुष्पे ध्यानं । इति समष्टिरूपेण परमानंदघनां ध्यात्वा अस्य श्रीगणेश
न्यासस्य गणक ऋषिः निचृद्गायत्री छंदः श्रीगणेशो देवता । न्यासे विनियोगः । ओं गां
श्रां त्र्यानंदाय हृत् श्रीं गीं मुखेंद्राय शिरः । ह्रीं गुं राजचंद्राय शिखा । क्लीं गैं मदोत्कटाय क ॥६१॥
वचाय हुं । ग्लौं गौं प्रमोदाय नेत्रा । गं गः सर्वमंत्रात्मने आमोदाय अस्त्राय । इति षडंगं विन्य

69

स्य गणेशादिरूपं ध्यायेत्। तद्यथा॥ तरुणादित्यसंकाशान् गजवक्त्रांस्त्रिलोचनान्॥
पाशांकुशवराभीतिकरान् शक्तिसमन्वितान्॥१॥ तास्तु सिंदूरवर्णाभाः सर्वालंकार
शोभिताः॥ एकहस्तधृतांभोजाऽइतरालिंगितप्रियाः॥२॥ वामोर्ध्वकरमारभ्य इति आ
युधध्यानं॥ शक्तीनां वामकरे कमलं दक्षिणकरेण प्रियालिंगनमिति ध्यात्वान्यसेत्।
तद्यथा। ओं ऐं ह्रीं श्रीं गं अं विघ्नेश्वराय नेश्रीयै नमः।४ गं आं विघ्नराजाय ह्रियै नमः।४
गं इं विनायकाय तुष्ट्यै न०।४ गं ईं शिवोत्तमाय शांत्यै।४ गं उं विघ्नकृते पुष्ट्यै०।४ गं ऊं विघ्न
हर्त्रे सरस्वत्यै।४ गं ऋं विघ्नराजाय रत्यै।४ गं ॠं गणनायकाय मेधायै।४ गं लृं एकदंताय
कांत्यै।४ गं लॄं द्विदंताय कामिन्यै।४ गं एं गजवक्त्राय मोहिन्यै।४ गं ऐं निरंजनाय जटायै।४
गं ओं कपर्दिने तीव्रायै।४ गं औं दीर्घवक्त्राय ज्वालिन्यै०।४ गं अं शंकुकर्णाय नंदायै।४
गं अः वृषभध्वजाय सुरसायै।४ गं कं गणनाथाय कामरूपिण्यै।४ गं खं गजेंद्राय उग्रा
यै।४ गं गं शूर्पकर्णाय जयिन्यै।४ गं घं त्रिनेत्राय सत्यायै।४ गं ङं लंबोदराय विघ्नेश्यै।४

॥७०॥ गं चं महानादाय सुरूपिण्यै।४ गं छं चतुर्मूर्त्तये कामदायै।न।४ गं जं सदाशिवाय मदविह्व-
लायै।४ गं झं आमोदाय विकरायै।४ गं ञं चतुर्मुखाय धूम्रायै।४ गं टं सुमुखाय भ्रू-
त्यै।४ गं ठं प्रमोदाय भ्रूमध्यै।४ गं डं एकपादाय सत्यै।४ गं ढं द्विजिह्वाय परमायै।४ गं णं
शूराय मन्तुष्ट्यै।४ गं तं वीराय मकरध्वजायै।४ गं थं षण्मुखाय निकर्णायै।४ गं दं वर-
70 दाय भृकुट्यै।४ गं धं वामदेवाय लज्जायै।४ गं नं वक्रतुण्डाय दीर्घघोणायै।४ गं पं द्वि-
रण्डाय धनुर्धरायै।४ गं फं सेनान्ये यामिन्यै न।४ गं बं ग्रामण्ये रात्र्यै न।४ गं भं मत्ताय चन्द्रि-
कायै।४ गं मं विमत्ताय शशिप्रभायै।४ गं यं मत्तवाहनाय लोलायै।४ गं वं वृषकेतवे
शिवायै।४ गं सं भक्षप्रियाय दुर्गायै।४ गं हं मेघनादाय कालिकायै।४ गं लं गणपत-
ये कालजिह्वायै।४ गं क्षं गणेशाय विघ्नहारिण्यै नमः। इति मातृकास्थानेषु न्यसेत्। ॥७०॥
इति गणेशन्यासः॥ अथ ग्रहन्यासः॥ तत्र ध्यानं॥ रक्तं श्वेतं तथा रक्तं श्यामं पीतं च
पाण्डुरं।

कं ठे४ तं ४ पीताय बृहस्पतये पीतशांकर्यंबायै॰। हृदि४ टं॰४ पांडुराय शुक्राय पांडुज्ञानन रूपांबायै॰।६

धूम्रकृष्णछायकृष्णधूम्रंधुम्रधूम्रंविचिंतयेत्॥१॥रविमुख्यान्कामरूपान्सर्वाभरणाभूषितान्॥वामोरून्यस्तहस्तांश्च दक्षहस्तवरप्रदान्॥२॥शक्त्यो पितथाध्येयावराभयकरांबुजाः॥स्वस्वप्रियांकनिलयाः सर्वाभरणभूषिताः॥३॥इतिध्यात्वान्यसेत्॥हृदयाधस्तात्॥ओं ऐं ह्रीं श्रीं अं१५रक्तवर्णसूर्याय रक्तवर्णरेणुकांबायै नमः॥क्रमध्ये४ यं॰३श्वेतवर्णचंद्राय श्वेतामृतांबायै॰।नेत्रत्रये।४कं॰४ रक्तवर्णमंगलाय रक्तवर्णधामांबायै॰।हृदयस्योपरि।४चं॰४श्यामाय बुधाय श्यामज्ञानरूपांबायै॰।नाभौ४पं४धूम्रकृष्णायशनैश्चराय धूम्रकृष्णशक्त्यंबायै॰।मुखे४शं॰३कृष्णधूम्राय राहवे कृष्णधूम्रकृष्णांबायै॰।पादयोः४लं क्षं धूम्रधूम्राय केतवे धूम्रांबायै नमः।इतिग्रहन्यासः॥

अथ नक्षत्रन्यासः। तत्रध्यानं।ज्वलत्कालाग्निसंकाशावरदाभयपाणयः॥नतिपाण्योश्विनीमुख्याः सर्वाभरणाभूषिताः॥१॥दक्षाधःकरयोर्वराभयेऊर्ध्वयोर्नतिमुद्रे॰।इत्यपु

॥७१॥ घध्याने॥ इति ध्यात्वा न्यसेत्। तद्यथा ललाटे ४ अं आं अश्विन्यै नमः। दक्षनेत्रे ४ इं
भरण्यै। वामनेत्रे ४ ईं उं ऊं कृत्तिकायै। दक्षकर्णे ४ ऋं ॠं लृं ॡं रोहिण्यै। वामक
र्णे ४ एं मृगशिरसे। दक्षनासायां ४ ऐं आर्द्रायै। वामनासायां ४ ओं औं पुनर्वसवे।
कंठे ४ कं पुष्यायै। दक्षस्कंधे ४ खं गं आश्लेषायै। वामस्कंधे ४ घं ङं मघायै। दक्षक
71 फोणौ ४ चं पूर्वफाल्गुन्यै। वामकफोणौ ४ छं जं उत्तराफाल्गुन्यै। दक्षमणिबंधे ४
झं ञं हस्तायै। वाममणिबंधे ४ टं ठं चित्रायै। दक्षस्तने ४ डं स्वात्यै। वामहस्तेये ४
ढं णं विशाखायै॥ नाभौ ४ तं थं दं अनुराधायै नमः॥ दक्षकुक्ष्यां ४ धं ज्येष्ठायै। वामकुक्ष्यां ४
नं पं फं मूलायै नमः॥ दक्षोरौ ४ बं पूर्वाषाढायै। वामोरौ ४ उत्तराषाढायै। दक्षजा
नुनि ४ मं श्रवणायै। वामजानुनि ४ यं रं धनिष्ठायै। दक्षजंघायां ४ शतभिषायै नमः।
वामजंघायां ४ वं शं पूर्वभाद्रपदायै। दक्षपादे ४ षं सं हं उत्तराभाद्रपदायै। वामपादे ४

लं क्षं ॐ अः रेवत्यै नमः ॥ इति नक्षत्रन्यासः ॥ अथ महायोगिनीन्यासः ॥ तत्र विशु
द्धौ षोडशदलकमलकर्णिकायां त्वक्धातुदेवतां डाकिनीं ध्यायेत् ॥ तद्यथा ॥ रक्तां रक्त
त्रिनेत्रां पशुजनभयदां खट्वाङ्गखड्गहस्तां वामे खेटं दधानां चषकमपि सुरापूरितं चै
कवक्त्रां ॥ अत्युग्रासुग्रदंष्ट्रामरिकुलमथिनीं पायसान्नैकसक्तां कण्ठस्थाने ऽमृताद्यैः
परिवृतवपुषं भावये डाकिनीं तां ॥१ दक्षोर्ध्वाधः शूलखट्वाङ्गे वामोर्ध्वाधः खेटचष
के रसायुधध्यानं ॥ इति ध्यात्वा न्यसेत् ॥४ डां डीं डूं डैं डौं डः डमलवरयूं डाकिनि मां र
क्ष रक्ष मम त्वग्धातुं रक्ष रक्ष सर्वसत्ववशंकरि देवि आगच्छ आगच्छ इमां पूजां गृह्ण
गृह्ण ऐं घोरे देवि ह्रीं सः परमघोरे हूं घोररूपे एह्येहि नमश्चामुण्डे डरलकसहैं श्रीमहा
त्रिपुरसुन्दरि देवि वरदे विच्चे ॥५ विशुद्धपीठस्थे विशुद्धे डाकिनि विशुद्धनाथदेवयुग्म
श्रीपादुकां पूजयामि नमः ॥ इति मनसा कर्णिकायां विन्यस्य तद्बाह्यादि परितस्तासां वरणा

॥७२॥ क्षरशक्तीर्न्यसेत्॥ तद्यथा॥ ४ अं अमृतायै नमः आं आकर्षिण्यै ४ इं इंद्राविण्यै ४ ईं ईशान्यै
नमः ४ उं उमायै ४ ऊं ऊर्ध्वकेशिन्यै ४ ऋं ऋद्धिदायै ४ ॠं ॠषायै ४ लृं लृकारायै ४ लॄं लॄषा
यै न० ४ एं एकपादायै ४ ऐं ऐश्वर्यायै । त्मिकायै ४ ओं ओंकारात्मिकायै ४ औं औषधात्मि
कायै ४ अं अंबिकायै ४ अः अक्षरात्मिकायै नमः॥ इति प्रादक्षिण्येन न्यसेत्॥ एताः शक्ति
72 यो डाकिनीवद्ध्येयाः॥ ततोऽनाहते द्वादशदलकमलकर्णिकायां रक्तधातुदेवतां राकिणीं
सावरणां ध्यात्वा न्यसेत्॥ तद्यथा॥ श्यामां शूलीज्वहस्तां डमरुकसहितां तीक्ष्णचक्रं व
हन्तीं व्याप्यास्यां रक्तत्रिनेत्रां भ्रुकुटिवलिलसद्दंष्ट्रदंतप्रभाभिः॥ दीप्तास्यां देवदेवीं हृदय
कमलगां रक्तधात्वैकनाथां भुक्तान्नेषु प्रसक्तां मधुमदमुदितां चिंतयेद्राकिणीं तां॥ दक्षाधः
करमारभ्य दक्षोर्ध्वकरपर्यंतमायुधध्यानं॥ इति ध्यात्वा तन्मन्त्रे कर्णिकायां न्यसेत्॥ तद्य
था॥ ४ रां रीं रूं रैं रौं रः॥ रमलवरयूं राकिणि मां रक्ष रक्ष मम रक्तधातुं रक्ष रक्ष सर्वसत्व ॥७२॥

वशंकरि देवि ब्रह्मा गच्छ२ स्मां पूजां गृह्ण२ ऐं घोरे देवि ह्रीं सः परमघोरे हूं घोररूपे एह्येहि
नमश्चामुंडे उरलेफसहें श्रीमहात्रिपुरसुंदरि देवि वरदे विच्चे कं ११ = अनाहतपाठस्थे
अनाहतराकिणि = अनाहतनाथदेवयुग्म श्रीपादुकां पूजयामि नमः ॥ इति मनसा सं
पूज्य कर्णिकायां विन्यस्य दलेषु परितस्तत्तावद्वर्णाक्षरदेवतान्यसेत् ॥ तद्यथा ॥ ४
कं कालरात्र्यै नमः ॥ ४ खं खातीतायै ॥ ४ गं गायत्र्यै नमः ॥ ४ घं घंटाधारिण्यै नमः ॥ ४ ङं ङार्ण
त्मिकायै ॥ ४ चं चामुंडायै ॥ ४ छं छायायै ॥ ४ जं जयायै ॥ झं झंकारिण्यै ॥ ४ ञं ञार्णात्मिका
यै ॥ ४ टं टंकहस्तायै ॥ ४ ठं ठंकारिण्यै ॥ डं डं ॥ इति द्वादशदलेषु विन्यस्यैतां राकिनीं वध्येयाः ॥
ततो मणिपूरे दशदलकमले मांसधातुदेवतां लाकिनीं सावरणां ध्यात्वा न्यसेत् तद्यथा ॥ रू
द्मां देवीं त्रिवक्त्रां त्रिनयनलसितां दंष्ट्रिणीमुग्ररूपां वज्रं शक्तिं च दंडाभयवरदसानू
दक्षवामे दधानां ॥ ध्यात्वा नाभिस्थपद्मे दशदलविलसत्कर्णिकेलाकिनीं तां मांसस्थां

थं स्थान देव्यै ।४ दं दाक्षायिण्यै न ।४ धं धात्र्यै ।४ नं नंदायै ।४ पं पार्वत्यै नमः। फं फट्कारिण्यै नमः॥

॥७३॥ गौडभक्तोत्सुकहृदयवतीं विन्यसेत्साधकेंद्रः॥१ दक्षाधूर्ध्वयोरायेत दाधधःस्थयो

रन्येत दाधधःस्थयोरपरे रसायुधध्याने॥ इति ध्यात्वान्यसेत्॥४ लां लीं लूं लैं लौं लः

लमलवरयूं लकिनी मां रक्ष रक्ष मम मांसधातुं रक्ष रक्ष सर्वसत्ववशंकरि देवि आगच्छ

२ मां पूजां गृह्ण गृह्ण ऐं घोरे देवि ह्रीं सः परमघोरे हूं घोररूपे एह्येहि नमश्चामुंडे डरल

कसहैं श्रीमहात्रिपुरसुंदरि देवि वरदे विच्चे डं। १ मणिपूरकपीठस्थे मणिपूरकलाकि

नि मपूरकनाथदेवयुग्मश्रीपादुकां पूजयामि नमः॥ इति कर्णिकायां मनसा संपूज्य वि

न्यस्य परितस्तद्दलवरणाक्षरदेवतान्यसेत्॥४ डं डामर्यै नमः॥४ ढं ढंकारिण्यै ।४ णं णाका

रिण्यै ॥४ तं तामस्यै नमः॥ इति न्यसेत्॥ एता लकिनीवत् ध्येयाः॥ ततः स्वाधिष्ठाने षट् ॥७३॥

दलकमलकर्णिकायां मेदोधातुदेवतां काकिनीं सावरणां ध्यात्वान्यसेत्॥ तद्यथा॥ स्वा

धिष्ठानाख्यपद्मे रसदललसिते वेदवक्त्रां त्रिनेत्रां पीतांभां धारयंतीं त्रिशिखगुणकपाला

मयान्यात्तगर्वां॥ मेदोधातुप्रतिष्ठामलिमदमुदितांबंधिनीसादिवीतांदध्यान्नेसक्तचि
त्तामभिमतफलदांकाकिनीभावयेत्तां॥१॥दक्षोर्ध्वंकरमारभ्यदक्षाधःकरपर्यंतंमायु
धध्यानं॥इतिध्यात्वान्यसेत्॥४कांकींकूंकैंकौंकःकमलेवरयुंकाकिनिमांरक्षरममेदो
धातुंरक्षरसर्वसत्ववशंकरिदेविआगछरइमांपूजांगृह्णरऐंघोरेदेविह्रींसःपरमघोरेहूं
घोररूपेएह्येहिनमश्चामुंडेडरलकसहैंश्रीमहात्रिपुरसुंदरिदेविवरदेविच्चेबंपस्वाधि
ष्ठानपीठस्थेस्वाधिष्ठानकाकिनिस्वाधिष्ठाननाथदेवयुगमश्रीपादुकांपूजयामिनमः॥इति
कर्णिकायांमनसासंपूज्यविन्यस्यपरितस्तद्दलेषुपरिवाराक्षरदेवतान्यसेत्॥४बंबंधि
न्येनमः।४भंभद्रकाल्यै।४मंमहामायायैन।४यंयशस्विन्यै।४रंरमायै।४लंलंबोष्ठ्यै।४
इतिविन्यस्यैताःकाकिनीवन्नेध्येयाः॥ततोमूलाधारेचतुर्दलकमलेकर्णिकायांअ
स्थिधातुदेवतांसाकिनींध्यात्वान्यसेत्॥तद्यथा॥देवींज्योतिःस्वरूपांत्रिनयनविलसत्पं

॥७४॥ चैव क्रां सुदंष्ट्रां हस्तैर्भोजे क्षाचापं स्वाणिमुपिदधतीं पुस्तकं ज्ञानमुद्रां ॥ मूलाधारस्थपद्मे निखिलपशु
जनोन्मादिनीमस्थिसंस्थां मुद्गान्नेप्रीतियुक्तां मधुमदमुदितां चिंतयेत्साकिनीं तां ॥१॥ वामाधू
र्ध्वयोरायेतत्त घधस्थयोरन्ये इक्षायुधध्यानं ॥ अत्रेक्षुचापग्रहणात्तत्रैव पुष्पबाणानपि
ध्यायेत् ॥ धनुर्बाणयोरत्यंतसाहचर्यात् ॥ इति ध्यात्वा तत्कर्णिकायां न्यसेत् ॥४ सां सीं सूं
सैं सौं सः स्मत्वरयूं साकिनी मां रक्ष रक्ष मम अस्थिधातुं रक्ष रक्ष सर्वसत्ववशंकरि देवि आ
गच्छ२ इमां पूजां गृह्ण२ ऐं घोरे देवि ह्रीं सः परमघोरे ह्रूं घोररूपे एह्येहि नमश्चामुंडे डर
लकसहैं श्रीमहात्रिपुरसुंदरि देवि वरदे विच्चे वं३ मूलाधारपीठस्थे मूलाधारसाकि
नि मूलाधारनाथदेवयुग्मश्रीपादुकां पूजयामि नमः ॥ इति तत्कर्णिकायां मनसा सं
पूज्य विन्यस्य तद्दलेषु परितस्तत्परिवाराक्षरदेवता न्यसेत् ४ वं वरदायै नमः ।४ शं श
शिन्यै नमः ।४ षं षंढायै ।४ सं सरस्वत्यै नमः ॥ इति विन्यस्यैताः साकिनीवत् ध्येयाः ॥
॥७४॥

ततो भ्रू मध्ये आज्ञाचक्रे मज्जाधातु देवतां हाकिनीं ध्यात्वा न्यसेत्॥ तद्यथा॥ भ्रूमध्ये बिं
दुपद्मे द्विदलसुलसिते शुक्लवर्णां करा (ब्जै) र्बिभ्राणां ज्ञानमुद्रां डमरुकसहितामक्षमा
लां कपालं॥ षड्वक्त्रां मज्जुसंस्थां त्रिनयनलसितां हंसवसादियुक्तां हारिद्रान्नैकसक्तां ✓ चिंतां
सकलसुरनुतां हाकिनीं भावयेत्तां॥१ दक्षाधूर्ध्वयोराद्येतद्वाद्यघयस्ययोरन्ये इसा
युध ध्यानं॥ इति ध्यात्वा न्यसेत्॥४ हां हीं हूं हैं हौं हः हमलवरयूं हाकिनि मां रक्ष र
मम मज्जाधातुं रक्ष रक्ष सर्वसत्त्ववशंकरि देवि आगच्छ २ इमां पूजां गृह्ण २ ऐं घोरे देवि
ह्रीं सः परमघोरे हूं घोररूपे एह्येहि नमश्चामुंडे डरलकसहैं श्रीमहात्रिपुरसुंदरि देवि
वरदे विच्चे हं क्षं आज्ञापीठस्थे आज्ञा हाकिनि आज्ञानाथ देवयुग्म श्रीपादुकां पूज
यामि नमः॥ इति तद्दलकर्णिकायां मनसा संपूज्य विन्यस्य। तद्दलयोः।४ हं हं सवसैं
नमः।४ क्षं क्षमावसैं।॥ इति विन्यस्य हाकिनीवत् ध्येयाः॥ ततो ब्रह्मरंध्रे सहस्रदले

॥१५॥ कमले कर्णिकायां शुक्र धातु देवतां सावरणां याकिनीं ध्यात्वा न्यसेत्॥ मुंड व्योमस्थ पद्मे
सकल दलयुते याकिनी भैरवी तां यक्षिण्यां रव्यां समस्तायुधलसित करां सर्व वर्णां
समष्टी॥ उद्दीनां सर्वचक्रां सकल सुखकरीं सर्व धातुस्वरूपां सर्वान्ने सक्तचित्तां पर
शिवरसिकां भावयेत्सर्वरूपां॥१॥ इति ध्यात्वा तन्मंत्रं कर्णिकायां न्यसेत्॥४यां
यीं यूं यैं यौं यः यमलवरयूं याकिनि मां रक्ष२ मम शुक्रादि सर्व धातून् रक्ष२ सर्वस
त्त्व वशं करि देवि आगच्छ२ इमां पूजां गृह्ण२ ऐं घोरे ह्रूं विह्रों सः परम घोरे हूं घोररूपे
एह्येहि नमश्चामुंडे डरलकसहें श्रीमहात्रिपुरसुंदरि देवि वरदे विच्चे आदिक्षां ॥१५॥
तं ५१ ब्रह्मरंध्रपीठस्थे ब्रह्मरंध्र याकिनि ब्रह्मरंध्रनाथ देव श्री पादुकां पूजयामि नमः।
इति तत्कर्णिकायां मनसा संपूज्य विन्यस्य परितः पंचाशद्वर्ण देवताः न्यसेत्॥ तद्यथा॥४
अं अमृतायै नमः॥४ आं आकर्षिण्यै नमः॥४ इं इंद्राण्यै नमः॥४ ईं ईशान्यै नमः॥४ उं उमायै नमः॥४

75

उं ऊर्ध्वकेश्यै नमः ॥४ ऋं ऋद्धिदायै नमः ॥४ ॠं ॠहषायै नमः ॥४ लृं लृकारायै नमः ॥४ लॄं
लॄषायै नमः ॥४ एं एकपादायै नमः ॥४ ऐं ऐश्वर्यात्मिकायै नमः ॥४ ओं ओंकारात्मिकायै न
मः ॥४ औं औंषधात्मिकायै नमः ॥४ अं अम्बिकायै नमः ॥४ अः अक्षरात्मिकायै नमः ॥४
कं कालरात्र्यै नमः ॥४ खं खातीतायै नमः ॥४ गं गायत्र्यै नमः ॥४ घं घण्टाधारिण्यै नमः ॥४
ङं ङार्णात्मिकायै नमः ॥४ चं चामुण्डायै नमः ॥४ छं छायायै नमः ॥४ जं जयायै नमः ॥४ झं झं
कारिण्यै नमः ॥४ ञं ञार्णात्मिकायै नमः ॥४ टं टंकहस्तायै नमः ॥४ ठं ठंकारिण्यै नमः ॥४
डं डामर्यै नमः ॥४ ढं ढंकारिण्यै नमः ॥४ णं णकारिण्यै नमः ॥४ तं तामस्यै नमः ॥४
थं स्थानदेव्यै नमः ॥४ दं दक्षायण्यै नमः ॥४ धं धात्र्यै नमः ॥४ नं नन्दायै नमः ॥४ पं पार्व
त्यै ॰ ॥४ फं फट्कारिण्यै नमः ॥४ बं बंधिन्यै ॰ ॥४ भं भद्रकाल्यै ॰ ॥४ मं महामायायै ॰ ॥४ यं यश
स्विन्यै ॰ ॥४ रं रमायै नमः ॥४ लं लंबोष्ठ्यै ॰ ॥४ वं वरदायै ॰ ॥४ शं शाकिन्यै नमः ॰ ॥४ षं षंढायै ॰ ॥४

॥७६॥ संसरस्वत्यै०।४ हंहंसवत्यै०।४ क्षंक्षमावत्यै नमः॥ इति महायोगिनीन्यासः॥ इति विन्यस्य॥
अथ राशिन्यासं कुर्यात्॥ तत्र ध्यानं॥ रक्तं श्वेतं हरिद्वर्णं पांडुं चित्रं सितं स्मरेत्॥ पिशं
गपिंगलौ बभ्रूकर्पूरारुणधूम्रकान्॥१॥ स्वस्वनामसमाकारान् तुलाकुंभौ समाकृती इ
76
ति ध्यात्वा न्यसेत्॥ दक्षिणगुल्फे ४ अंआं इंईं मेषाय नमः।४ दक्षिणजानुनि ४ उंऊं वृषाय
नमः। दक्षवृषणे ४ ऋंॠं लृंॡं मिथुनाय न०। दक्षकुक्षौ ४ एंऐं कर्कटाय नमः। दक्षस्कं
धे ४ ओंऔं सिंहाय नमः। दक्षशिरोभागे ४ अंअः शंषं संहं कन्याराशये नमः।४ वाम
शिरोभागे ४ कं ४ तुलाराशये न०। वामस्कंधे ४ चं ४ वृश्चिकराशये नमः। वामकुक्षौ ४
टं ४ धनुषे नमः। वामवृषणे ४ तं ४ मकराय नमः। वामजानुनि ४ पं ४ कुंभाय नमः।
वामगुल्फे ४ यं रंलं वं लंक्षं मीनाय नमः॥ इति राशिन्यासः॥ अथ पीठन्यासः॥ तत्र ॥७६॥
ध्यानं॥ सितासितारुणश्यामहरित्पीतान्यनुक्रमात्॥ पुनः पुनः क्रमाद्देवि पंचाशत्

स्थान संचये ॥१॥ पीठानि संस्मरेद्विद्वान् सर्वकामार्थसिद्धये ॥ इति ध्यात्वा न्यसेत् ॥४ अं
कामरूपपीठाय नमः ॥४ आं वाराणसीपीठाय नमः ॥४ इं नेपालपीठाय नमः ॥४ ईं पौण्ड्रव
र्द्धनपीठाय नमः ॥४ उं पुरस्थिरपीठाय नमः ॥४ ऊं कान्यकुब्जापीठाय नमः ॥४ ऋं पूर्णगि
रिपीठाय नमः ॥४ ॠं अर्बुदपीठाय नमः ॥४ लृं आम्रातकेश्वरपीठाय नमः ॥४ लॄं एकाम्र
पीठाय नमः ४ एं त्रिस्रोतःपीठाय ॥४ ऐं कामकोटपीठाय नमः ॥४ ओं कैलासपीठाय नमः ॥४
औं भृगुनगरपीठाय ॥४ अं केदारपीठाय ॥४ अः चंद्रपुरपीठाय ॥४ कं श्रीपुरपीठाय ॥४ खं
ओंकारपीठाय ॥४ गं जालंधरपीठाय नम ॥४ घं मालवपीठाय नमः ४ ङं कुलांतकपीठाय नमः ॥४
चं देवीकोटपीठाय ॥४ छं गोकर्णपीठाय ॥४ जं मरुतेश्वरपीठाय ॥४ झं अट्टहासपीठाय ॥४
ञं विरजपीठाय ॥४ टं राजगृहपीठाय ॥४ ठं महापथपीठाय ॥४ डं कोलगिरिपीठाय नम ॥४
ढं एलापुरपीठाय ॥४ णं कालेश्वरपीठाय ४ तं जयंतिकापीठाय ॥४ थं उज्जयिनीपीठाय न ॥४

॥७७॥ ट्रं चरित्रपुरपीठाय॰।४ घं क्षीरिकपीठाय॰।४ नं हस्तिनापुरपीठाय॰।४ वं उड्डीशपीठाय॰।४
फं प्रयागपीठाय॰।४ बं षष्ठीशपीठाय नम॰।४ मं मायापुरपीठाय न॰।४ मं जलेश्वरपीठाय॰।४
यं मलयगिरिपीठाय॰।४ रं हिरेण्यपुरपीठाय॰।४ हं महालक्ष्मीपुरपीठाय॰।४ लं उड्यानपी
ठाय॰।४ क्षं छायाछत्रपीठाय नमः॥ इति पीठन्यासः। एते पीठाः समुद्दिष्टा मातृकारूप
मास्थिताः। शुद्धमातृकास्थानेषु न्यसनीयाः। इति पूर्वषोढान्यासः। ज्ञानार्णवे। षोढान्यास
स्तु ये प्रोक्ताः सर्वत्रैवापराजिताः॥ एवं यो न्यस्तगात्रस्तु स पूज्यः सर्वयोगिभिः॥१॥ ना
स्त स्य पूजो लोकेषु पितृमातृमुखो जनः। स एव पूज्यं सर्वेषां सः स्वयं परमेश्वरः॥२॥
षोढान्यासविहीनं यं प्रणमेद्देवि पार्वति। सो चिरान्मृत्युमाप्नोति नरकं च प्रपद्यते॥३॥
षोढान्यासैर्न्यस्तमंत्री यदि कुर्यान्नमस्क्रियां॥ अपरीहार्यतः पूज्ये पित्रादौ विदधी
त तां।४। निजेष्टदेवताबुद्ध्यानतुमानुषबुद्धितः। कुर्वीम्र सा नमेद्यं सोऽचिरान्मृत्यु ॥७७॥

मवाप्नुयात्॥५॥ श्रीविद्यानंदनाथेन शिवयोः प्रियसूनुना॥ कृते सौभाग्यरत्नाख्ये व
ष्ठ तरंगकः॥६॥ इति श्रीसच्चिदानंदनाथचरणारविंदद्वंद्वांतेवासिना श्रीश्रीविद्या
नंदनाथेन विरचिते सौभाग्यरत्नाकरे षष्ठस्तरंगः॥६॥ अथ योगपीठन्यासः॥१ श्रीवि
द्यया प्राणायामत्रयं कृत्वा योगपीठन्यासं कुर्यात्॥ तत्र प्राणायामविधिस्तु विहितपद्मास
नो मूलाधारार्पितचित्तवृत्तिर्मूलविद्यां स्मरन् ईडया वायुमापूर्य मूलाधारं प्रापय्यांगु
ष्ठानामीकाभ्यां नासापुटौ विधृत्य तं वायुं कुंभयित्वा कुंभकसमये देवीं स्मरन् मूल
विद्यां यथाशक्ति जपित्वा पिंगलया शनैः शनैस्तं वायुं रेचयेदित्येकः प्राणायामः॥ पुन
स्तथैव पिंगलया वायुमापूर्य तथैव कुंभयित्वा तथैव रेचयेदिति द्वितीयः॥ एवं वै परिस्येन त्रिं
शति वारं षोडश द्वादश त्रि यथाशक्ति जपादौ जपांते च प्राणायामाः कार्याः॥ अत्र सर्व
त्र प्राणायामेनैव सर्वेषां कर्मणामधिकाधिकारः॥ प्राणायामैर्विना यद्यत्कृतं कर्म तन्निरर्थकं।

॥७८॥ अतो यत्नेन कर्त्तव्याः प्राणायामाः शुभार्थिभिः ॥१६ सगस्त्य वचनेनाकरणे निंदाश्रुते रावश्य
कोयमिति प्राणायामविधिः ॥ इत्थं प्राणायामं विधाय मूलविद्याया ऋष्यादिन्यासान्कुर्यात्।
तद्यथा। शिरसि ओं ऐं ह्रीं श्रीं दक्षिणामूर्तये ऋषये नमः। मुखे ४ पंक्तिछंदसे नमः।
हृदये ४ श्री त्रिपुरसुंदर्यै देवतायै नमः। गुह्ये ४ ऐं बीजाय नमः। पादयोः ४ सौः शक्तये नमः।
नाभौ ४ क्लीं कीलकाय नमः। इति विन्यस्य। ४ ममचतुर्विधपुरुषार्थसिद्धये न्यासादौ विनि
योगः। इति कृतांजलिर्वदेत्। ततः अंगुष्ठयोः ४ ऐं हृदयाय नमः। तर्जन्योः ४ क्लीं शिरसे
स्वाहा। मध्यमयोः ४ सौः शिखायै वषट्। अनामिकयोः ४ ऐं कवचाय हुं। कनिष्ठिकयोः ४
क्लीं नेत्रत्रयाय वौषट्। करतलकरपृष्ठयोः ४ सौः अस्त्राय फट्। इति न्यस्य परिपूर्वा
दिदिक्षु ॥ ४ आं आत्मने न० ४ अं अंतरात्मने न० ४ पं परमात्मने न० ४ ह्रीं ज्ञानात्मने न०। कर्णिकाया
श्चतुर्दिक्षु मध्ये च ४ ज्ञां ज्ञानतत्त्वात्मने न० ४ मां मायातत्त्वात्मने न० ४ कं कलातत्त्वात्मने न० ४ ॥७८॥

78

विं विद्यानन्दात्मने ०४ पं पर तत्वात्मने ० इति पश्चिमादि प्रादक्षिण्येन विन्यस्य ॥ ततः
केसरेषु पूर्वादिष्व दिक्षु मध्ये च प्रादक्षिण्येन श्रीचक्राधार पीठस्य नव शक्तीर्न्यसेत् ॥
तद्यथा ॥४ दूं तयै वा श्री पा ०४ सुं दर्यै वा श्री पा ०४ सुमुख्यै वा ०४ विरूपा वा ०४ विमलो वा ०४
त्रं तयै वा ०४ ब द यै वा ०४ पुरं दर्यै वा ० मध्ये कर्णिकायां ॥४ पुष्पमर्दिन्यै वा श्री ०४ एता
वराभयधारिण्यो रक्तवर्णा ध्येयाः ॥ इति नवशक्तिर्विन्यस्य ॥४ क्लीं सर्वशक्तिकमलासना
यनमः ॥ इति व्यापकं विन्यस्य तन्मध्ये श्रीचक्रं विभाव्य ॥४ समस्त-प्रकट-गुप्त-गुप्ततर-
संप्रदाय-कुलकौल-निगर्भ-रहस्य-परापररहस्य-परापराति-रहस्य-योगिनीचक्रे श्रीपादुका
भ्यो नमः ॥ इति सर्वाङ्गे व्यापकं विन्यस्य ॥४ प्रथमकूट मुच्चार्य शारीरात्मने नमः ॥ द्वितीयकूट मुच्चार्य ४
बुध्यात्मने नमः ॥ तृतीयकूट मुच्चार्य ४ प्राणात्मने इति व्यापकत्वेन सर्वाङ्गे विन्यस्य हृदयत्रिको
णस्याग्रकोणे ४ ऐं मूलविद्याया वाग्भवकूट मुच्चार्य चतुरस्त्रपीतवर्णाय कामरूपपीठाय नमः ।

79 आग्नेयकोणे ४ क्लीं कामराजकूटमुच्चार्य अर्धचंद्रनिभश्वेतवर्णाय जालंधरपीठाय नमः ॥
ईशानकोणे ४ सौः तार्तीयकूटमुच्चार्य षट्बिंदुलांछितवृत्तधूम्रवर्णाय पूर्णगिरिपीठाय
नमः । तन्मध्यस्थबिंदौ ४ तुरीयविद्यामुच्चार्य महोड्यानपीठाय नमः ॥ इति पीठचतुष्टयं वि
न्यस्य । मध्यस्थबिंदुचक्रे ४ ह्रीं रश्मयसहस्रदलकमलाय नमः ॥ इति विन्यस्य ॥ दक्षांस
पृष्ठदक्षकर्णपृष्ठदक्षललाटभागदक्षनेत्रभागदक्षचिबुकभागहृदयत्रिकोणेषु वक्ष्य
माणषडासनानि विन्यस्य ४ अकं ३६ शिवशक्त्यादिपृथिव्यात्मने षट्त्रिंशत्तत्त्वरूपाय
श्रीमहात्रिपुरसुंदर्याः योगपीठाय नमः ॥ इति सर्वांगे व्यापकं न्यसेत ॥ ततो मूलविद्यामु
च्चार्य श्रीमन्महात्रिपुरसुंदरीश्रीपादुकां पू० । प्रतिषट्त्रिंशत्तत्त्वात्मके निजदेहमये महायो
गपीठे निजेष्टदेवतां हृदि न्यसेत ॥ इति देहमये पीठे चिंतयेत्परदेवतां ॥ इति योगपीठदे
वतान्यासः ॥ अथ श्रीचक्रन्यासः । तत्र मूलविद्यायाः एवं व्याप्यादिकरषडंगन्यासान् कृ- ॥७९॥

ता ध्यानं कुर्यात्॥ तद्यथा॥ शरीरं चिंतयेद्देवि निजं श्रीचक्ररूपकं॥ त्रिगात्राकारनिर्मुक्तं ज्वलत्का
लाग्निसंनिभं॥१॥ इति स्वशरीरं श्रीचक्ररूपं ध्यात्वा न्यसेत्॥ तद्यथा॥ दक्षपादांगुष्ठे ॐ ऐं ह्रीं श्रीं
लं इंद्राय नमः॥ दक्षजानुनि ४ रं अग्नये नमः दक्षिणपार्श्वे ४ टं यमाय०। दक्षिणांसे ४ क्षं निर्ऋतये०।
वामांसे ४ वं वरुणाय०। वामपार्श्वे ४ यं वायवे नमः। वामजानुनि ४ सं सोमाय नमः। वामपादांगुष्ठे ४
हं ईशानाय०। ब्रह्मरंध्रे ४ आं ब्रह्मणे०। मूलाधारे ४ ह्रीं अनंताय नमः। वामजानुनि ४ गं गणेशाय
नमः॥ वामांसे ४ क्षें क्षेत्रपालाय०। दक्षजानुनि ४ बं बटुकाय नमः दक्षांसे ४ यां योगिनीभ्यो नमः॥ ४
अं आं सौः त्रैलोक्यमोहनचक्राय नमः॥ इति सर्वांगे व्यापकत्वेन विन्यस्य ४ बाह्यचतुरस्ररे
खायै नमः। इति च व्यापकं विन्यस्य। दक्षांसपृष्ठे ४ अणिमासिद्ध्यै नमः॥ दक्षिणकराग्रे ४ ल
घिमासिद्ध्यै नमः। दक्षिणस्फिचि ४ महिमासिद्ध्यै०। दक्षिणपादाग्रे ४ ईशित्वसिद्ध्यै०। वामपादा
ग्रे ४ वशित्वसिद्ध्यै०। वामस्फिचि प्राकाम्यसिद्ध्यै०। वामकराग्रे ४ भुक्तिसिद्ध्यै०। वामांसपृष्ठे ४ इ
च्छासिद्ध्यै०। पृष्ठवंशे ४ प्राप्तिसिद्ध्यै नमः०। कंडाधः ४ सर्वकामसिद्ध्यै०। इति दशसिद्धिर्विन्यस्य॥ ४

॥८०॥ चतुरस्त्रमध्यरेखायै नमः। इति व्यापकं न्यस्त्वा। पादांगुष्ठद्वये ४ आंआह्लैं नमः। दक्षिणपार्श्वे ४
ईं माहेश्वर्यै नमः। मूर्ध्नि ४ ऊं कौमार्यै नमः॥ वामपार्श्वे ४ ऋं वैष्णव्यै नमः। वामजानुनि ४ लृं वारा
ह्यै। दक्षजानुनि ४ ऐं इंद्राण्यै। दक्षिणांसे ४ औं चामुंडायै। वामांसे ४ अः महालक्ष्म्यै। ततः ४
80 अं तच्चतुरस्त्ररेखायै नमः॥ इति व्यापकं कृत्वा। पादांगुष्ठद्वये ४ द्रां सर्वसंक्षोभिण्यै मुद्रा
यै। दक्षपार्श्वे ४ द्रीं सर्वविद्राविण्यै मुद्रा। मूर्ध्नि ४ क्लीं सर्वाकर्षिण्यै मुद्रा। वामपार्श्वे ४ ब्लूं सर्व
वश्यायै मु०। वामजानुनि ४ सः सर्वोन्मादिन्यै मु०। दक्षजानुनि ४ क्रों सर्वमहांकुशायै मुद्रा०॥
दक्षांसे ४ हस्खें हस्क्ल्रीं हस्त्रौः सर्वत्रिखंडायै मु०॥ वामांसे ४ हस्त्रौं सर्वबीजमुद्रायै। मूर्ध्नि ४
हस्क्रें सर्वखेचर्यै मु०॥ पादांगुष्ठद्वये ४ ऐं योनिमुद्रायै नमः। इति विन्यस्य। हृदये ४ अं आं ॥८०॥
सौः। त्रिपुराचक्रेश्वर्यै नमः। तस्या दक्षिणे ४ अणिमासिद्ध्यै। तस्या वामे ४ द्रां सर्वसंक्षोभि
णी मुद्रायै। इति विन्यस्य ४ एताः प्रकटयोगिन्यस्त्रैलोक्यमोहनचक्रे समुद्राः ससिद्धयः

दक्षगुल्फे ४ कं रसाकर्षिणीनित्याकलायै० । दक्षिणपादाग्रे ४ खं गंधाकर्षिणीनित्याकलायै० । १

सायुधाः सवाहनाः सपरिवाराः सर्वोपचारैः संपूजिताः संतुष्टाः संतु नमः । इति व्यापकं न्यसेत् । ध्याममिति सर्वसंक्षोभिणीमुद्रां प्रदर्शयेत् ॥ इति प्रथमावरणन्यासः ॥ ततः ४ ऐं क्लीं सौः सर्वाशापरिपूरकचक्राय नमः ॥ इति व्यापकं विन्यस्य । ततः षोडशदलेकमलचक्राय नमः । इति व्यापकं विन्यस्य ॥ दक्षिणकर्णपृष्ठे ४ अं कामाकर्षिणीनित्याकलायै नमः । दक्षिणांसे ४ आं बुद्ध्याकर्षिणीनित्याकलायै० । दक्षिणकूर्परे ४ इं अहंकाराकर्षिणीनित्याकलायै० । दक्षिणकरपृष्ठे ४ ईं शब्दाकर्षिणीनित्याकलायै० । दक्षिणोरौ ४ उं स्पर्शाकर्षिणीनित्याकलायै० । दक्षिणजानुनि ४ ऊं रूपाकर्षिणीनित्याकलायै० । वामपादाग्रे ४ लृं चित्ताकर्षिणीनित्याकलायै० । वामगुल्फे ४ लॄं धैर्याकर्षिणीनित्याकलायै० । वामजानुनि ४ एं स्मृत्याकर्षिणीनित्याकलायै० । वामोरौ ४ ऐं नामाकर्षिणीनित्याकलायै० । वामकरपृष्ठे ४ ओं बीजाकर्षिणीनित्याकलायै० । वामकूर्परे ४ औं आत्माकर्षिणीनित्याकलायै० ।

॥८१॥ वामांसे ४ ऊं अमृताकर्षिण्यै नित्याकलायै. वामकर्णपृष्ठे ४ अः शरीराकर्षिणी नित्याकला
यै. हृदये ४ ऐं क्लीं सौः त्रिपुरेश्वरी चक्रेश्वर्यै नमः॥ तस्याः दक्षे ४ लघिमासिद्ध्यै नमः। तस्या
वामे। ४ द्रीं विद्राविणीमुद्रायै नमः। इति विन्यस्य। ४ एताः गुप्तयोगिन्यः सर्वाशापरिपूरक
चक्रे समुद्राः ससिद्धयः सायुधाः सवाहनाः सपरिवाराः सर्वोपचारैः संपूजिताः संतुष्टाः संतु
नमः इति व्यापकं न्यसेत्। द्रां इमिति सर्वविद्राविणीमुद्रां प्रदर्शयेत्। इति द्वितीयावरण
न्यासः॥ ततः ४ ह्रीं क्लीं सौः सर्वसंक्षोभणचक्राय नमः। तत्र अष्टदलकमलाय नमः। इति
व्यापकं विन्यस्य दक्षशंखे ४ कं ४ अनंगकुसुमायै नमः। दक्षजनुनि ४ चं ४ अनंग
मेखलायै। दक्षिणोरौ ४ टं ४ अनंगमदनायै। दक्षिणगुल्फे ४ तं ४ अनंगमदनातुरायै।
वामगुल्फे ४ पं ४ अनंगरेखायै। वामोरौ ४ यं ४ अनंगवेगिन्यै नः। वामजानुनि ४ शं ४ अनंगा
कुशायै। वामशंखे ४ लं क्षं अनंगमालिन्यै नमः। हृदये ४ ह्रीं क्लीं सौः त्रिपुरसुंदरी चक्रेश्व ॥८१॥
र्यै नमः।

81

तस्याः दक्षिणे ४ महिमासिद्ध्यै नमः। तस्या वामे ४ क्लीं आकर्षिणीमुद्रायै नमः॥ इति विन्यस्य॥ ४ एताः गुप्ततरयोगिन्यः सर्वसंक्षोभणे चक्रे समुद्राः इत्यादि व्यापकं कुर्यात् क्लीमित्याकर्षिणीमुद्रां दर्शयेत्॥ इति तृतीयावरणन्यासः॥ ततः ४ हैं हक्लीं हसौः सर्वसौभाग्यदायकचक्राय नमः इति व्यापकं विन्यस्य ललाटदक्षपार्श्वे ४ कं सर्वसंक्षोभिणीशक्त्यै नमः। दक्षकपोले ४ खं सर्वविद्राविणीशक्त्यै। दक्षांसे ४ गं सर्वाकर्षिणीशक्त्यै। दक्षपार्श्वे ४ घं सर्वाह्लादिनीशक्त्यै। दक्षोरौ ४ ङं सर्वसंमोहिनीशक्त्यै। दक्षजंघायां ४ चं सर्वस्तंभिनीशक्त्यै। वामजंघायां ४ छं सर्वजंभिनीशक्त्यै। वामोरौ ४ जं सर्ववशंकरिणीशक्त्यै। वामपार्श्वे ४ झं सर्वरंजिनीशक्त्यै। वामांसे ४ ञं सर्वोन्मादनकारिणीशक्त्यै। वामकपोले ४ टं सर्वार्थसाधिनीशक्त्यै। ललाटवामपार्श्वे ४ ठं सर्वसंपत्प्रपूरिणीशक्त्यै। ललाटे ४ डं सर्वमंत्रमयीशक्त्यै। चूडायां ४ ढं सर्वद्वंद्वक्षयंकरीशक्त्यै नमः। इति विन्यस्य। हृदये ४ हैं हक्लीं हसौः त्रिपुरवासिनीचक्रेश्वर्यै नमः॥ तस्या दक्षे ४ ईशित्वसिद्ध्यै नमः। तस्या वामे ह्रौं सर्ववश्यमुद्रायै नमः। इति विन्यस्य ४ एताः संप्रदाययोगिन्यः

॥८२॥ सर्वसौभाग्यदायके चक्रे समुद्रा इत्यादि व्यापकं न्यसेत्। ब्लूं इति सर्ववश्यमुद्रां प्रदर्शयेत्॥
॥इति चतुर्थावरणन्यासः। ततः ४ हसैं हस्क्लीं हसौः सर्वार्थसाधकचक्राय नमः इति व्याप
कं विन्यस्य। ततो बहिर्दशारचक्राय नमः इति व्यापकं विन्यस्य। दक्षनेत्रे ४ णं सर्वसिद्धिप्र[illegible]दा
देव्यै नमः॥ नासामूले ४ तं सर्वसंपत्प्रदा देव्यै०। वामनेत्रे ४ थं सर्वप्रियंकरी देव्यै०। वामकुक्षे
रूपरि ४ दं सर्वमंगलकारिणी देव्यै०। वामकुक्षे रधः। ४ धं सर्वकामप्रदा देव्यै०। वामजानु
नि ४ नं सर्वदुःखविमोचिनी देव्यै०। दक्षजानुनि ४ पं सर्वमृत्युप्रशमनी देव्यै०। गुदे ४ फं सर्ववि
घ्नविनाशिनी देव्यै०। दक्षकुक्षेरधः ४ बं सर्वांगसुंदरी देव्यै०। दक्षकुक्षेरुपरि। ४ भं सर्वसौभा
ग्यदायिनी देव्यै नमः। इति विन्यस्य। हृदये ४ हसैं हस्क्लीं हसौः त्रिपुराश्रीचक्रेश्वर्यै नमः॥
तस्या दक्षे ४ वशिनीवशिन्यै नमः। तस्या वामे। ४ सः सर्वोन्मादिनीमुद्रायै नमः। इति विन्यस्य॥ ४
एताः कुलकौलयोगिन्यः सर्वार्थसाधके चक्रे समुद्राः सायुधाः सर्वोन्मादि व्यापकं कुर्यात्। सः सर्वोन्मादि दि
नीमुद्रां प्रद०। इति पंचमावरणन्यासः॥ ततः। ४ ह्रीं क्लीं ब्लें सर्वरक्षाकरचक्राय नमः॥ ततो ॥८२॥

82

तर्दशारचक्राय नमः इति व्यापकं विन्यस्य ॥ दक्षनासापुटे ४ मं सर्वज्ञादेव्यै नमः । दक्षसृक्वि
णि ४ यं सर्वशक्तिदेव्यै । दक्षस्तने ४ रं सर्वैश्वर्यप्रदादेव्यै । दक्षमुष्के ४ लं सर्वज्ञानमयी देव्यै ।
सीवन्यां ४ वं सर्वव्याधिविनाशिनी देव्यै । वाममुष्के ४ शं सर्वाधारस्वरूपादेव्यै । वामस्तने ४ षं
सर्वपापहरादेव्यै । वामसृक्विणि ४ सं सर्वानंदमयी देव्यै । वामनासापुटे ४ हं सर्वरक्षास्वरूपि
णी देव्यै । नासाग्रे ४ क्षं सर्वेप्सितफलप्रदा देव्यै नमः । इति विन्यस्य । हृदये ४ ह्रीं क्लीं ब्लें त्रिपुरा
मालिनी चक्रेश्वर्यै नमः । तस्या दक्षिणे । ४ प्राकाम्यसिद्ध्यै नमः । तस्या वामे क्रों महांकुशामुद्रा
यै । इति विन्यस्य । ४ एताः निगर्भयोगिन्यः सर्वरक्षाकरे चक्रे समुद्रास्सादि व्यापकं कुर्यात् ॥
क्रों इत्यंकुशमुद्रां प्रदर्शयेदिति षष्ठावरणन्यासः ॥ ततः ४ ह्रीं श्रीं सौः सर्वरोगहरचक्राय नमः ।
ततोऽष्टारचक्राय नमः इति व्यापकं विन्यस्य ॥ चिबुकदक्षपार्श्वे ४ अं आं १४ ब्लूं वशिनी वा
ग्देवतायै नमः । कंठदक्षभागे ४ कं ४ ब्लूं ह्रीं कामेश्वरी वाग्देवतायै । हृदयदक्षे पार्श्वे ४ अं आं १४
ब्लूं वशिनी वाग्देवतायै नमः । नाभेर्दक्षपार्श्वे ४ टं ४ ग्लूं विमला वाग्देवतायै । नाभेर्वामपार्श्वे ४

॥८३॥ तं४ ज्म्रीं अरुणा वाग्देवतायै। हृदये वामपार्श्वे४ पं४ हसल्व्यूं जयिनी वाग्देवतायै। कंठ
वामभागे४ यं३ स्मम्र्यूं सर्वेश्वरी वाग्देवतायै। चिबुकवामभागे४ शं क्ष्म्रीं कौलिनी वाग्देव
तायै नमः। इति विन्यस्य। हृदये४ ह्रीं श्रीं सौः त्रिपुरासिद्धा चक्रेश्वर्यै। तस्या दक्षे।४ मुक्तिसिद्ध्यै।
तस्या वामे४ हसरक्ष्म्रीं खेचरीमुद्रायै नमः। इति विन्यस्य।४ एता रहस्ययोगिन्यः सर्वरोगहरे
चक्रे समुद्रा इत्यादि व्यापकं विन्यस्य कुर्यात् हसरक्ष्म्रीं इति खेचरीमुद्रां प्रदर्शयेदिति सप्त
मावरणन्यासः॥ ततः अंतरालेचक्राय नमः। इति व्यापकं विन्यस्य। हृदयत्रिकोणस्य बहिर्
83 क्ष वामवामदक्षेषु४ द्रां द्रीं क्लीं ब्लूं सः। यां रां लां वां सां जंभनेभ्यः कामेश्वरकामेश्वरी बाणेभ्यो नमः।
हृदयस्याग्नेये।४ धं थं मोहनाभ्यां कामेश्वरकामेश्वरी चापाभ्यां नमः। हृदयस्य ईशानभागे।४
आं ह्रीं वशीकरणाभ्यां कामेश्वरकामेश्वरी पाशाभ्यां नमः। हृदयनैर्ऋत्ये।४ क्रों क्रों स्तंभना
भ्यां कामेश्वरकामेश्वर्यंकुशाभ्यां नमः। हृदयवायव्ये। इति विन्यस्य।४ हस्रैं हस्क्लीं हस्रौः सर्व
सिद्धिप्रदचक्राय नमः।४ त्रिकोणचक्राय नमः। इति व्यापकं विन्यस्य। त्रिकोणस्याग्रकोणे४ प्रथ
कूटमुच्चार्य अग्निचक्रे कामगिरिपीठे मित्रीशनाथात्मिके जाग्रद्दशाधिष्ठायके इच्छाशक्त्या ॥८३॥

त्मकरुद्रात्मशक्तिश्रीकामेश्वरीदेव्यै नमः। त्रिकोणस्य वामकोणे ४ द्वितीयकूटं उड्डीयार्यसूर्यचक्रे
जालंधरपीठे षष्ठीशनाथात्मिके स्वप्नदशाधिष्ठायके ध्यानशक्त्यात्मकविष्ण्वात्मशक्तिश्री
वज्रेश्वरीदेव्यै नमः। दक्षकोणे ४ तृतीयकूटमुड्डीयार्यसोमचक्रे पूर्णगिरिपीठे उड्डीशनाथात्मिके
सुषुप्तिदशाधिष्ठायके क्रियाशक्त्यात्मकब्रह्मात्मशक्तिश्रीभगमालिनीदेव्यै नमः। इति
विन्यस्य। हृदये ४ हस्रैं हसकलरीं हस्रौः त्रिपुराम्बिकाचक्रेश्वर्यै नमः। तस्या दक्षे ४ इच्छा
सिध्यै नमः। तस्या वामे ४ हसौं सर्वबीजमुद्रायै नमः। इति विन्यस्य ४ एताः परापररहस्यया
गिन्यः सर्वसिद्धिप्रदे चक्रे समुद्रा इत्यादि व्यापकं कुर्यात्। हसौं इति बिजमुद्रां प्रदर्शय
दिति अष्टावरणन्यासः॥ ततः ४ तुरीयविद्यामुद्राय सर्वानन्दमयचक्राय नमः। बिंदुचक्रा
य नमः। इति व्यापकं विन्यस्य। हृदयत्रिकोणमध्यस्य बिंदुमध्ये ४ तुरीयविद्यामुद्रार्य
ब्रह्मचक्रे महोड्याणपीठे श्रीचर्यानाथात्मिके तुर्यतुर्यातीतदशाधिष्ठायके परब्रह्मात्म

॥८४॥ शक्तिश्रीमहात्रिपुरसुंदर्यैदिव्येनमः।हृदयएव४मूलपंचदशीमुद्राचार्यश्रीमहात्रिपुर
सुंदरीचक्रेश्वर्यैनमः।तस्यादक्षे४प्राप्तिसिध्येनमः।तस्यावामे॥४ऐंयोनिमुद्रायैनमः।
इतिविन्यस्य४एषापरापरातिरहस्ययोगिनीःसर्वानंदमयेमहाचक्रेपरब्रह्मस्वरूपि
णीपरामृतशक्तिःसर्वमंत्रेश्वरीसर्वविद्येश्वरीसर्वपीठेश्वरीसर्ववीरेश्वरीसर्वयो
गेश्वरिसर्ववागीश्वरिसर्वसिद्धेश्वरीसकलजगदुत्पत्तिमातृकासचक्रासदेवता
समुद्रासिद्धिःसायुधासासनासवाहनासपरिवारासालंकारासर्वोपचारैःश्रिम
हात्रिपुरसुंदरीपरयाचापरयापरापरयाचसपर्ययापूजितास्संतुष्टास्तुनमः।इति
व्यापकंविन्यस्य।पुनर्हृदयएवमूलमुद्राचार्यसमस्तचक्रेश्वरीश्रीमहात्रिपुरसुंदर्यै
दिव्येनमः।तस्यादक्षे४सर्वकामसिध्येनमः।तस्यावामे॥४हस्त्रैंहसकलरीहस्त्रौःत्रिखंड ॥८४॥
मुद्रायैनमः।

84

इतिहृदयएवविन्यस्यऐंयोनिमुद्रांप्रदर्शयित्वाहृदयेत्रिकोणएवाग्न्यादिवामावर्तेनप्रव
त्रितारादिचतुर्थीनमोंततत्तन्नित्यानामांततत्तन्नित्याविद्यानित्याषोडशकंविन्यस्यहृदय
त्रिकोणस्यपृष्ठभागेरेखात्रयंविभाव्यतत्रपूजाप्रकरणेवक्ष्यमाणंगुरुपंक्तित्रयंविन्यसेत्।
ततोहृदयत्रिकोणस्याष्टकोणस्यचान्तरालेषुपूजाप्रकरणेवक्ष्यमाणेप्रकारेणषडंग
युवतीर्विन्यस्यबिंदुचक्रमध्येवक्ष्यमाणप्रकारेणपंचपंचकदेवताःविन्यस्यदक्षांसपृष्ठ
तत्कर्णपृष्ठतच्छंखतन्नालतद्दक्षिणनासापुटचिबुकहृदयावधिचषट्दर्शनदेवताविन्यस्य
बिंदुचक्रएववक्ष्यमाणप्रकारेणचतुःसमयदेवताःविन्यस्यतुरीयविद्ययासर्वांगव्या
पकंविन्यततोमूलविद्यामुच्चार्यमहोड्यानपीठनिलयसर्वचक्रेश्वरीध्यातपंचश्रीपंच
कोशपंचकल्पलतापंचकामदुघापंचरत्नवृंदमंडितासनसंस्थितसर्वदर्शनशोभित
षडंगयुवतीस्तुतचतुःसमयदेवतापूजितमहासौभाग्यजननमहामोक्षप्रदअन्या
न्यविवर्जितसशक्तिसच्चिदानंदपरब्रह्मश्रीमन्महात्रिपुरसुंदरीश्रीपादुकायैनमः

इति मूर्द्धादिपादपर्यंतं त्रिर्व्यापकं न्यसेत्॥ ततो ब्रह्मरंध्रे स्वगुरुपादुकां विन्यस्य मूला
धारे स्वगुरुकृतस्वनाम विन्यस्य तत्रैव महाकामकलाध्यानं कुर्यात्॥ इति संहारश्री
चक्रे न्यासः॥ अथ स्थितिश्रीचक्रे न्यासः॥ तत्र शिरसि ४ त्रिकोणं विभाव्य। ॐ ऐं ह्रीं श्रीं
तुरीयविद्यामुख्यार्या सर्वानंदमयमहाचक्राय नमः। बिंदुचक्राय नमः॥ इति व्यापकं वि
न्यस्य तत्र शिरस्त्रिकोणस्य महाबिंदौ तुरीयविद्यामुख्यार्यब्रह्मचक्रेश्वीमहोड्याणपीठे
इत्यादि पूर्ववद्विन्यस्य। चक्रमध्ये मूलविद्याख्यार्यशांभवतामेव चक्रेश्वरीं विन्यस्य तद्द
क्षिणवामपार्श्वयोः प्राप्तिसिद्धिं सर्वकामसिद्धियोनिमुद्रां त्रिखंडामुद्रां शांभवत् वि
न्यस्य ४ एघापरापराति रहस्ययोगिनीः सर्वानंदमये महाचक्रे इत्यादि शांभवत् व्या
पकं विन्यसेत् ऐं योनिमुद्रादं० इति बिंदुचक्रे न्यासः॥ ततः शिरस्त्रिकोणस्य पृष्ठभा
गे रेखात्रये विभाव्य तत्र पूजाप्रकरणं वक्ष्यमाणगुरुपंक्तित्रयं न्यस्येत् ततो मातृका
याः षोडशस्वरन्यासस्थाने षु प्रणव त्रितारादि च तुर्थीनमोंत नत्तन्नि सानामांते

85

तयातत्त्रिसाविद्यद्यानिसाषोडशकं विन्यस्य ४ ह्स्रैं ह्सक्लरीं ह्स्रौः सर्वसिद्धिप्रदचक्राय
नमः। अंतरालचक्राय नमः॥ इति व्यापकं विन्यस्य त्रिकोणाष्टकोणयोरंतरालबुध्याप्रागुक्ता
आयुधदेवसन्यसेत्तातेयथा॥ दक्षनेत्रे ४ द्रां द्रीं क्लीं ब्लूं सः जंभनेभ्यः कामेश्वरबाणेभ्यो
नमः॥ वामनेत्रे यां रां लां वां सां जंभनेभ्यः कामेश्वरीबाणेभ्यो नमः। दक्षभ्रुवि ४ धं मोहनाय
कामेश्वरचापाय नमः। वामभ्रुवि ४ धं मोहनाय कामेश्वरीचापाय नमः। दक्षकर्णे ४ आं व
शीकरणाय कामेश्वरपाशाय नमः। वामकर्णे ४ ह्रीं वशीकरणाय कामेश्वरीपाशाय नमः॥
दक्षनासायां ४ क्रों स्तंभनाय कामेश्वरांकुशाय नमः। वामनासायां ४ क्रों स्तंभनाय कामेश्वर्यं
कुशाय नमः। इत्यायुधदेवताः विन्यस्य त्रिकोणस्य कोणत्रये पूर्वोक्तकामेश्वर्यादिदेवीत्रयं प्रा
ग्वद्विन्यस्य। हृदये भाग्वत् त्रिपुरांबिकाचक्रेश्वरीं विन्यस्य तद्दक्षवामयोरिच्छासिद्धि
बीजमुद्रां च विन्यस्य ४ एताः परापररहस्ययोगिन्यः सर्वसिद्धिप्रदे चक्रे समुद्रा इत्यादि
व्यापकं कुर्यात्॥ ततः ४ ह्रीं श्रीं सौः सर्वरोगहरचक्राय नमः। अष्टारचक्राय नमः॥ इति

॥८६॥ व्यापकं विन्यस्य। शिरःपुरोभागमारभ्य मुंडमालाक्रमेण षट्सु स्थानेषु पूर्वोक्त वशिन्यादि
वाग्देवताष्टकं विन्यस्य। मणिपूरकचक्रे पूर्वोक्तां त्रिपुरासिद्धा चक्रेश्वरीं विन्यस्य तद्दक्ष
वामयोर्मुक्तिसिद्धिं खेचरीमुद्रां च विन्यस्य। ४ एताः रहस्ययोगिन्यः सर्वरोगहरे चक्रे समु
दा इत्यादि व्यापकं न्यसेत्॥२ ततः ४ ह्रीं क्लीं ब्लें सर्वरक्षाकरचक्राय नमः। इति व्यापकं विन्यस्य।
दक्षनेत्रमूलं तदपांग दक्षश्रोत्र तत्पृष्ठ चूडाकूपस्य दक्षपार्श्व वामपार्श्व वामश्रोत्रपृष्ठ वाम
श्रोत्र वामापांग वामनेत्रमूलेषु दशसु स्थानेषु प्रागुक्त सर्वज्ञादि दश शक्तिं विन्यस्य। स्वाधिष्ठा
ने चक्रे पूर्वोक्तां। त्रिपुरमालिनीं चक्रेश्वरीं विन्यस्य तद्दक्षवामयोः प्राकाम्यसिद्धिं महांकुशा
मुद्रां च प्राग्वद्विन्यस्य ४ १ ता निगर्भयोगिन्यः सर्वरक्षाकरे चक्रे समुदा इत्यादि व्यापकं न्यसेत्॥४
ततः ४ हसैं हस्क्लीं हसौः इति व्यापकं विन्यस्य। कंठे विशुद्धिचक्रे षोडशदलेषु एकस्मिन्नेकाश
क्तिः त्रये दले प्येका शक्तिः इत्येवं क्रमे सप्तमी शक्ति पर्यंतं विन्यस्य अवशिष्ट दलत्रये शेषशक्ति ॥८६॥

86

त्रयं न्यसेदिति प्रादक्षिण्येन सर्वसिद्धिप्रदादि दशशक्तीर्विन्यस्य । मूलाधारे त्रिपुराचक्रे
श्वरीं प्राग्वद्विन्यस्य तद्दक्षवामयोर्वशित्वसिद्धिमुन्मादिनीमुद्रां च प्राग्वद्विन्यस्य ४ एताः कुल
कौलयोगिन्यः सर्वार्थसाधकचक्रे समुद्रा इत्यादि व्यापकं न्यसेत् ॥४ हैं ह्क्लीं हसौः सर्वसौभा
ग्यदायकचक्राय नमः । इति व्यापकं विन्यस्य । हृदयअनाहतचक्रे द्वादशदले कमले दशदले
षु सर्वसंक्षोभण्यादि दशशक्तीर्विन्यस्य । तिमध्ये दलद्वये प्रतिं लं शक्तिद्वयं शक्तिद्वयमिति शि
ष्टशक्तिचतुष्टयं न्यसेदिति चतुर्दशशक्तीर्विन्यस्य ३ तद्वये पूर्वोक्तां त्रिपुरवासिनीचक्रे
श्वरीं प्राग्वद्विन्यस्य तद्दक्षवामयोरीशित्वसिद्धिं वश्यमुद्रां च प्राग्वद्विन्यस्य ४ एताः संप्रदाय
योगिन्यः सर्वसौभाग्यदायकचक्रे समुद्रा इत्यादि व्यापकं न्यसेत् ॥४ ततः ह्रीं क्लीं सौः सर्वसंक्षो
भणचक्राय नमः इति व्यापकं विन्यस्य । पृष्ठवंशवामपार्श्वोदरयोर्मध्ये उदरदक्षिणपार्श्वयो
(र्मध्ये दक्षिणपार्श्वपृष्ठवंशयोर्मध्ये) चतुष्टस्थानेषु पूर्वोक्तानंगकुसुमाद्याश्चतुःशक्तीः
र्विन्यस्य पृष्ठवामपार्श्वयोर्मध्ये वामपार्श्वोदरयोर्मध्ये उदरदक्षिणपार्श्वयोर्मध्ये दक्षिणपार्श्व

॥८१॥ ष्टकवंशयोर्मध्ये च स्थानचतुष्टये अनंगरेखादिचतुःशक्तीर्विन्यस्य। जानुद्वये पूर्वोक्तां त्रिपुर
सुंदरीं चक्रेश्वरीं पूर्ववद्विन्यस्य तद्दक्षवामपार्श्वयोर्महिमासिद्धिं आकर्षणीमुद्रां च विन्यस्य ४
एताः गुप्ततरयोगिन्यः सर्वसंक्षोभकरे चक्रे समुद्रा इत्यादि व्यापकं न्यसेत्॥७ ततः ४ ऐं क्लीं सौः
सर्वाशापरिपूरकचक्राय नमः इति व्यापकं विन्यस्य। स्वाधिष्ठाने षट्दलकमले स्वाग्यादि
प्रादक्षिण्येन पंचसु दलेषु प्रतिदलं शक्तित्रयं अंतिमदले त्वेकां शक्तिमिति कामाकर्षिण्या
87 दिषोडशशक्तीर्विन्यस्य। जंघयोः पूर्वोक्तां त्रिपुरेश्वरीं विन्यस्य तद्दक्षवामयोर्लघिमासिद्धिं
द्राविणीमुद्रां च विन्यस्य ४ एताः गुप्तयोगिन्यः सर्वाशापरिपूरके चक्रे समुद्रा इत्यादि
व्यापकं न्यसेत्॥८। ततः ४ अं आं सौः त्रैलोक्यमोहचक्राय नमः इति व्यापकं विन्यस्य। अंत
श्चतुरस्ररेखायै नम इति व्यापकं विन्यस्य॥ मूलाधारे चतुर्दलकमलस्य दलचतुष्टये त
दंतरालचतुष्टये च पूर्वदलेशानांतरालयोर्मध्ये पश्चिमदले नैर्ऋत्यंतरालयोर्मध्ये च पूर्व ॥८१॥

त्कःसर्वसंक्षोभण्यादिमुद्रादशकंन्यसेत्॥ततः४चतुरस्त्रमध्येरेखायैनमइतिव्यापकंवि
न्यस्य। दक्षजंघायांदिग्विदिक्क्रमेणपूर्वोक्ताब्राह्म्याद्यष्टशक्तीर्न्यसेत्॥ततः४बाह्यचतुर
स्त्ररेखायैनमइतिव्यापकंविन्यस्य।वामजंघायांदिग्विदिक्क्रमेणपूर्वोक्ताणिमादिसिध्य
ष्टकंविन्यस्य।दक्षपादेप्राप्तिसिद्धिंवामपादेसर्वकामसिद्धिंचविन्यस्य।पादद्वयेश्रीत्रिपुरा
चक्रेश्वरींविन्यस्यतद्दक्षवामयोरणिमासिद्धिसर्वसंक्षोभिणीमुद्रांचविन्यस्य४एताःप्रक
टयोगिन्यःत्रैलोक्यमोहनेचक्रेसमुद्राइत्यादिव्यापकंविन्यस्यसरश्मिकश्रीमहात्रिपुरसु
न्दर्यभेदेनस्वात्मानंध्यायेत्॥इतिसृष्टिश्रीचक्रन्यासः॥अथस्थितिश्रीचक्रन्यासः॥सच
विद्याचक्रचक्रेश्वरीसंगत्रयात्मकः॥तत्रप्रथमंसंप्रदायात्पूर्ववत्करशुद्धिविद्याअंआंसौः
करशुद्धिविद्यायतथैवतांविन्यस्यतथैवहंक्लींसौःआत्मरक्षांकृत्वान्यासमारभेत्॥तत्रा
दौत्रिविधमूलविद्यान्यासःसयथा॥मूर्द्ध्नि४प्रथमकूटंनमः।गुह्ये४द्वितीयकूटंनमः॥हृदये४
तृतीयकूटंनमः।दक्षनेत्रे४प्रथमकूं०वामनेत्रे४द्वितीयकूं०भाले४तृतीयकूं०दक्षकर्णे४

प्र० कू० वामकर्णे ४ द्वि० कू० मुखे ४ तृ० कू० दक्षांसे ४ प्र० कू० वामांसे ४ द्वि० कू० पृष्ठे ४ [redacted]:।
टेती० कू० दक्षजानुनि ४ प्र० कू० वामजानुनि ४ द्विती० कू० नाभौ ४ तृ० कू० नमः। इति मूल
विद्याकूटन्यासः॥ मूर्द्ध्नि ४ कं नमः। गुह्ये ४ ऐं नमः। हृदये ४ ईं दक्षनेत्रे लं० ४ वामनेत्रे ४ ह्रीं नमः।
भालनेत्रे ४ हं नमः॥ दक्षकर्णे ४ सं नमः वामकर्णे ४ कं नमः। मुखे ४ हं नमः। दक्षभुजे ४ लं नमः।
वामभुजे ४ ह्रीं नमः। पृष्ठे ४ सं नमः। दक्षजानुनि ४ कं नमः। वामजानुनी ४ लं नमः। नाभौ ४ ह्रीं नमः।
इत्यक्षरन्यासः। समस्तमूलविद्यां प्रणवतारादि नमोंतां मूर्द्धादि नाभ्यंत पंचदशपूर्वोक्तेषु प्र
स्से करं न्यसेदिति त्रिविधः। पादयोः ४ ऐं आं सौः नमः। जंघयोः ४ ऐं क्लीं सौः नमः। जान्वोः ४
ह्रीं क्लीं सौः नमः। ऊर्वोः ४ हैं हस्क्लीं हसौः नमः। स्फिचोः ४ हसैं हस्क्लीं हसौः नमः। लिंगाग्रे ४ ह्रीं क्लीं
ब्लूं नमः। मूलाधारे ४ ह्रीं श्रीं सौः नमः। इति मूर्तिविद्यां विन्यस्य। हूं क्लीं + अनाहते वा हस्रैं हस्क्लीं
हस्रौः नमः इत्यावाहनीविद्यां विन्य ४ हसकलरडैं हसकलरडीं हसकलरडौः नमः। ब्रह्मरंध्रे
ततो ४ मूलविद्यया मूर्द्धादिपादांतं पादादिहृदयांतं च व्यापकं न्यसेत्॥ ततो मूलाधारे ४ ऐं क्लीं सौः॥८८॥

सर्वाशापरिपूरकचक्राय नमः स्वाधिष्ठाने ४ ह्रीं क्लीं सौः । सर्वसंक्षोभणचक्राय नमः ॥ मणि
पूरके ४ ४ हैं हक्लीं हसौः सर्वसौभाग्यदायकचक्राय नमः ॥ अनाहते ४ हसैं हस्क्लीं हसौः सर्वार्थसा
धकचक्राय नमः ॥ विशुद्धिचक्रे ४ ह्रीं क्लीं ब्लें सर्वरक्षाकरचक्राय नमः । लंबिकाग्रे ४ ह्रीं श्रीं सौः स
र्वरोगहरचक्राय नमः । आज्ञायां ४ हस्रैं हस्क्लीं हस्रौः सर्वसिद्धिप्रदचक्राय नमः । बिंदौ ४ मूल
पंचदशाक्षरीमुच्चार्य सर्वानंदमयश्रीमहाचक्राय नमः ॥ इति नवचक्राणि विन्यस्य नवचक्रे
श्वरीन्यासं कुर्यात् ॥ तत्र मूलाधाराधः प्राक् न्यस्तत्रैलोक्यमोहनचक्रे ४ अं आं सौः त्रिपुराचक्रे
श्वर्यै नमः । मूलाधारस्थसर्वाशापरिपूरकचक्रे ४ ऐं क्लीं सौः त्रिपुरेश्वरीचक्रेश्वर्यै नमः । स्वाधि
ष्ठानस्थितसर्वसंक्षोभणचक्रे ४ ह्रीं क्लीं सौः । त्रिपुरसुंदरीचक्रेश्वर्यै नमः । मणिपूरस्थितसर्व
सौभाग्यदायकचक्रे ४ हैं हक्लीं हसौः । त्रिपुरवासिनीचक्रेश्वर्यै नमः ॥ अनाहतस्थसर्वार्थसाधक
चक्रे ४ हसैं हस्क्लीं हसौः त्रिपुराश्रीचक्रेश्वर्यै नमः । विशुद्धिस्थितसर्वरक्षाकरचक्रे ४ ह्रीं क्लीं

॥८४॥ ब्लूं त्रिपुरमालिनीचक्रेश्वर्यै नमः॥ लंबिकाग्रस्थितसर्वरोगहरचक्रे४ ह्रीं श्रीं सौः त्रिपुरा
सिद्धाचक्रेश्वर्यै नमः॥ आज्ञाचक्रस्य सर्वसिद्धिप्रदचक्रे४ हस्रैं हसकलरीं हस्रौः त्रिपुराम्बि
काचक्रेश्वर्यै नमः। महाबिंदुस्थ बिंदुचक्रे४ मूलपंचदशाक्षरीमुच्चार्य महात्रिपुरसुंदरीम
हाचक्रेश्वरीश्रीपादुकायै नमः॥ इति विन्यतत्तच्चक्रं परस्परसंलग्ने तत्तच्चक्रेश्वर्यधिष्ठितं
सम्यक् ध्यात्वा पुनः करशुद्धिं विधाय त्रिपुरसुंदर्यात्मरक्षां कृत्वा पूर्वोक्तषडंगं विन्यस्य४ वाग्भवं
मूलाधारे४ कामराजं हृदये४ तृतीयं भ्रूमध्ये४ तुरीयविद्यां ब्रह्मरंध्रे च विन्यस्य४ समस्तप्रकट
गुप्तगुप्ततरसंप्रदायकुलकौलनिगर्भरहस्यपरापररहस्यपरापरातिरहस्य श्रीचक्रयोगिनी
श्रीपादुकाभ्यो नमः इति स्वशरीरं श्रीचक्ररूपं ध्यायन् व्यापकं कुर्यात्॥ इति श्रीस्थितिश्रीचक्रन्या
सः॥ अथ श्रीचक्रन्यासफलं॥ तत्रेश्वरः॥ यामले॥ य एवं विन्यसेद्देहे साधकः स्थिरमानसः। वि
मुच्य मानुषं भावं स सद्यः शिवतां व्रजेत्॥१॥ त्रिकालं धारयेद्यस्तु तेस्य सर्वांगसंगतं॥ सततं ॥८१॥

८१

भासते देवि समस्तं योगिनीपदं ॥२॥ धरणी क्षेत्रतां याति यावद् द्वादशयोजनं ॥ एतत्ते कथितं
भद्रे न्यासं त्रैलोक्यदुर्लभं ॥३॥ शिष्याय भक्तियुक्ताय साधकाय प्रकाशयेत् ॥ भ्रष्टेभ्यः साधके-
भ्यो वा बांधवेभ्यो न दर्शयेत् ॥४॥ दत्ते चेत् सिद्धिहानिः स्यादिसालाशीकरी मता ॥ मंत्राः पराङ्मु-
खा यांति क्रुद्धा भवति सुंदरी ॥५॥ अयं तु मे च भवेत्तस्य तस्माद्यत्नेन गोपयेत् ॥ इति त्रिविधश्री-
चक्रन्यासः ॥ ॥ श्रीविद्यानंदनाथेन शिवयोः प्रियसूनुना ॥ कृते सौभाग्यरत्नाख्ये तरंगः
सप्तमो गमत् ॥१॥ इति श्रीसच्चिदानंदनाथचरणारविंदद्वंद्वांतेवासिना श्रीविद्या-
नंदनाथेन विरचिते सौभाग्यरत्नाकरे सप्तमस्तरंगः ॥१॥ अथ करशुद्ध्यादिन्यासः
तत्र प्रथमं श्रीगुरूक्तं प्रथमचक्रेश्वरीविद्यया प्राग्वत् करयोः स्थितिक्रमेण मध्यमादितलां-
ते विन्यस्यासनन्यासं कुर्यात् ॥ स च द्विविधः ॥ चतुरासनन्यासः षडासनन्यासश्चेति ॥ तत्रा-
दौ चतुरासनन्यासः ॥ स यथा ॥ पादयोः ४ ह्रीं क्लीं सौः त्रिपुरसुंदरीदेव्यात्मासनाय नमः ।

॥९०॥ जंघयोः ४ हैं हक्लीं हसौः त्रिपुरावासिनी सर्वचक्रासनाय नमः ॥ जान्वोः ४ हसैं हसकलीं हसौः
त्रिपुरा सर्वमंत्रासनाय नमः ॥ मूलाधारे ४ ह्रीं क्लीं ब्लें त्रिपुरमालिनी साध्यसिद्धासनाय नमः ॥
इति चतुरासनन्यासः ॥ अथ षडासनन्यासः ॥ तत्र पादयोः ४ आं ऐं सौः त्रिपुरासुधार्ण
वासनाय नमः । जान्वोः ४ ऐं क्लीं सौः त्रिपुरेश्वरी पोतांबुजासनाय नमः ॥ ऊर्वोः ४ ह्रीं क्लीं सौः
त्रिपुरसुंदरी देव्यात्मासनाय नमः ॥ स्फिच्योः ४ हैं हक्लीं हसौः त्रिपुरवासिनी सर्वचक्रासनाय
नमः ॥ गुदे ४ हसैं हसक्लीं हसौः त्रिपुराश्री सर्वमंत्रासनाय नमः ॥ मूलाधारे ४ ह्रीं क्लीं ब्लें त्रिपुर
90 मालिनी साध्यसिद्धासनाय नमः ॥ इति षडासनन्यासः । अथ षडंगन्यासः ॥ स च त्रिविधः । र
क्षाषडंगन्यासो मूलविद्याषडंगन्यासः षडंगयुवतीन्यासश्चेति ॥ तत्रादौ रक्षाषडंगन्यासः ॥
स यथा ॥ ४ ऐं क्लीं सौः नमस्त्रिपुरसुंदरी मां रक्ष रक्ष हृदयाय नमः । एवं षडंगेषु तत्तन्मुद्रया सह त
त्तन्मंत्रेण सहन्यसेत् ॥ अथ मूलषडंगन्यासः ॥ स च मूलकूटत्रयस्याद्विरावृत्त्या षडंगस्थानेषु

॥९०॥

प्राग्वन्यासो ज्ञेयः॥ षोडशात्तोपासकैस्तु आद्यबीजपंचकेन हृदयं। तदुत्तरबीजत्रयेण शिरः।
तदूर्ध्वगतकूटत्रयेण शिखादिनेत्रांतमंगत्रयं॥ अंतिमबीजपंचकेनास्त्रमिति मूलषडंगन्यासः
कार्यः॥ अथ षडंगयुवतीन्यासः॥ स च द्विविधः। बालीमूलविद्यायोर्योगभेदात्॥ तत्रादौ बालीयोग
न्यासः। तत्र ४ ऐं सर्वज्ञायै हृदयाय नमः। ४ क्लीं नित्यतृप्तायै शिरसे स्वाहा॥ ४ सौः अनादिबोधायै शि
खायै वषट्। ४ ऐं स्वतंत्रायै कवचाय हुं॥ ४ क्लीं नित्यमलुप्तायै नेत्रत्रयाय वौषट्॥ ४ सौः अनं
तायै अस्त्राय फट्। अथ मूलषडंगयुवतीन्यासः॥ तत्र ४ प्रथमकूटं श्रीमहात्रिपुरसुंदरि सर्व
ज्ञताशक्तिधाम्ने हृदयाय नमः। ४ द्वितीयकूटं श्रीमहात्रिपुरसुंदरि नित्यतृप्तिशक्तिधाम्ने शि
रसे स्वाहा॥ ४ तृतीयकूटं श्रीमहात्रिपुरसुंदरि अनादिबोधशक्तिधाम्ने शिखायै वषट्। ४ पुनरा
द्यंकूटं श्रीमहात्रिपुरसुंदरी स्वतंत्रशक्तिधाम्ने कवचाय हुं॥ ४ द्वितीयकूटं। श्रीमहात्रिपुरसुंदरि नि
त्यमलुप्तशक्तिधाम्ने नेत्रत्रयाय वौषट् ४ तृतीयकूटं श्रीमहात्रिपुरसुंदरि अनंतशक्तिधाम्ने अस्त्रा
य फट्॥

इति षडंगयुवतीन्यासः ॥ अथ कामकलापारंपर्यन्यासः ॥ तत्र प्रथमं प्राग्वत् स्वशिरसि गुरु
पादुकां ध्यात्वा संपूज्य प्रणम्य दक्षांसे ४ प्रथमकूटे हंसः प्रकाशचरणाभ्यां नमः ॥ [illegible] वामां
से ४ द्वितीयकूटे सोहं विमर्शचरणाभ्यां नमः ॥ हृदये ४ तृतीयकूटे हंसः सोहं प्रकाशविमर्शचरणाभ्यां
नमः ॥ मूर्ध्नि ४ तुरीयविद्यामुच्चार्य हंसः शिवः सोहं निर्वाणचरणाभ्यां नमः ॥ इति कृताञ्जलिश्चरण
चतुष्टये प्रणम्य ॥ कामकलापारंपर्यन्यासस्य ४ कामेश्वर ऋषिः ४ पंक्तिश्छन्दः ४ परसंवित्कला
श्रीमहात्रिपुरसुन्दरी देवता श्रीपरदेवताप्रसादसिद्ध्यर्थे विनियोगः ॥ इति ऋष्यादिकं स्मृत्वा विन्य
स्य ४ आमित्यादि षट्दीर्घस्वरैः करषडंगन्यासं कृत्वा प्रणवसंपुटितया कामकलारूपया श्री
मूलविद्यव्यापकं विन्यस्य ध्यानं कुर्यात् ॥ तद्यथा ॥ प्रकाशमध्यस्थितविश्वरूपां वराभये संद
धतीं त्रिनेत्रां ॥ सिंदूरवर्णामतिकोमलांगीं मायामयीं तत्त्वमयीमुपासे ॥१॥ इति ध्यात्वा मूलादि
ब्रह्मरंध्रांतं श्रीमूलपंचदशाक्षरीं प्रागुक्तरूपां ध्यात्वा तस्या एकैकाक्षरलयेन तुर्यस्वरूपामति

प्रथमकूटे हंसः प्रकाशचरणाभ्यां नमः। वामकोणे ४ ई द्वितीयकूटे सोहं विमर्शचरणा ५
भ्यां नमः। दक्षिणकोणे ४ ५

मकलां भ्रमरं ध्वगतामवशेषयेत्। ततस्तामेव पंचदशाक्षरगर्भां स्वात्मानुभवरूपसच्चि
दानंदरूपिणीं तुर्यस्वरूपेन परिणतां कामकलां नाभौ ध्या न्यसेत्॥ तत्र नाभौ ४ ई नमः॥
रसं गुष्ठतर्जनीमध्यमानामाभिर्न्यसेत्। ततो नाभेर्वक्षिदार्ध्वं ४ सच्चिदानंदपरमसंवित् ई नमः।
नाभेदक्षे ४ सच्चिदानंदपरमसंवित् ई नमः। रसेत द्वयं मध्यमानामांगुष्ठैर्न्यसेत्॥ ततश्चरण
चतुष्टयंन्यासः। तत्र शिरसि त्रिकोणस्याग्रकोणे ४ ई तृतीयकूटे हंसः सोहं प्रकाशविमर्श
चरणाभ्यां नमः। मध्ये ४ तुर्यविद्यामुच्चार्य हंसः शिवः सोहं निर्वाणचरणाभ्यां नमः॥
इति चरणचतुष्टयं शिवशक्त्यात्मकं दक्षिणवामकरध्वतसंघटमुद्रया विन्यसेत्। ततस्त्रि
कोणपृष्ठरेखायां ४ सकलानंदनाथ श्रीपादुकां पूजयामि नमः। ४ निष्कलानंदनाथश्री
पादुकां पूजयामि नमः। ४ नवात्मानंदनाथश्रीपादुकां पूजयामि ४ अकूरानंदनाथश्रीपा
दुकां पू०। इति गुरुचतुष्टयं पंक्तिक्रमेण स्वदक्षिणादिवामांतं विन्यस्य। शिरस्त्रिकोण
मध्ये ४ ई परमसंवित्कलाश्रीमहात्रिपुरसुंदरीश्रीपादुकां पू०। मुखमंडले ४ ई सपरार्द्धकला

नंदनाथोर्ध्वबिंदुवक्त्रायनमः। स्तनद्वये ४ ईं सपरार्द्धकलानंदनाथाधोबिंदुद्वयस्तनायनमः॥
इत्येतद्द्वयमंगुष्ठमध्यमानामिकाभिर्विन्यस्य। योनिस्थाने ४ ईं सपरार्द्धकलानंदनाथ ~~विं~~ विं
~~तुष्प~~ स्वरव्यंजितरेखायोनये नमः॥ इति योनिमुद्रया न्यसेत्॥ ततः प्रागुक्तक्रमेष्वान्यासानु
षडंगकरन्यासादिक्रमेणावैपरीत्येन प्रथमे षडंगन्यासः पश्चात्करन्यासः पश्चाद्दृष्ट्यादि
रितिविन्यस्य पूरोक्तभगवतीरूपं स्वात्मानं ध्यात्वा यथाशक्ति वामकलाविद्यां जपेदिति का
मकलापारंपर्यन्यासः॥ अथातः कामकलान्यासः॥ स च परापश्यंतीमध्यमावैखरीभेदा
च्चतुर्विधः। तत्रादौ परान्यासः॥ स यथा॥ ब्रह्मरंध्रे अरुणाधोमुखसहस्रदलकमल
कर्णिकायामरुणपूर्णचंद्रमंडले विभाव्य तन्मध्ये उद्यदादित्यसंकाशं स्वशिखामूलाग्रं
शृंगाटं ध्यात्वा तदंतर्गतमकथादिक्रमेण समस्ताक्षरमयमकुलासने बीजत्रयं ध्यात्वा
तन्मध्ये हक्षपार्श्वमादिवर्णकदंबकं दीप्तमवर्णरूपमनुत्तरमनलकं तरहात्मकं वि
चिंत्य तन्मध्यादुद्यंतीं बिसतंतुनिभां सितां हार्द्धकलारूपिणीमकुलकुंडलिनीं मूलशृंगा

92

टकमध्यपर्यंतमच्छिन्नांमहाकामकलाममृतकुंडलिनीं ध्यात्वा मूलाधारे चतुर्दलकमल
कर्णिकायामपि वह्निमंडले त्रिकोणस्याग्रकोणाग्रं पूर्ववत्तदष्टगोटं ध्यात्वा तदंतः पूर्व
वद्वाग्भवं कुलासने विभाव्य तत्र पूर्वोक्तमनत्कं विविंय तन्मध्यादुद्यंतीं सपरार्द्ध कला
मयीमग्निकुंडलिनीं कामकलां ज्वलद्दग्निनिभां मध्यमार्गं प्रविश्य ग्रंथिसंचयं भित्वा त
दकुलपदावध्यूर्ध्वं प्राप्तां ध्यात्वा अकुलांबुधिमध्यगतदंडाकारतरदंडलीगे नप्रवेशयि
त्वा तयोरमृतानले कुंडलिन्योर्योनिलिंगरूपयोर्मध्यनसंभवैर्निरंतरनिबिडस्रवद्रू
पामृतपूरैरात्मानं सिक्तं ध्यात्वा पूरयित्वा तयोः सामरस्यादेकनादरूपिणीं परां शक्तिं
आत्मानं चेभावयेत्॥ इति परान्यासः॥ तरलक्षणं तु भैरवयामले॥ तरस्थं तरमध्यस्थं तर
स्थं तरमध्यगं॥ तरं तरंडमध्यस्थं यो जानाति स कैलिकः॥१॥ शीर्षपापिचरलोविवर्जि
तं त्यक्षरं भवरुजापहं परं॥ यस्य हृत्कुहरगं सुवर्तते तेन मृत्युरपि भस्मसात्कृतः॥२॥

॥९३॥ शैवं चैव तथा शाक्तं सामरस्यं तु मध्यमं ॥ एकीभूतं यदा काले तदा तद्वर्णमुत्तमं ३ अन्यात्प्र
सरमुत्पन्ने प्रसरोत्थमकालकं ॥ अकालात्तत्समुत्पन्नं विश्वं यत्पंचधा स्थितं ॥४ ध्यान
स्थानविहीनो यो रूपोच्चार विवर्जितः ॥ अनाहतो नदस्तं मुखान्मुखपदे स्थितः ॥५॥
धाम त्रया[illegible]द्विरहितो योगो गीनां मुखे स्थितः । स एव तु कथितं ताभिः स्वयमुच्चरते
तु सः ॥६॥ अन्याश्च मुस्तात्तः शक्तिः शीक्ते धामत्रयात्मकं ॥ प्रभवेच्च ततः सर्वमादिवर्ण
93 कदेवकं ॥७॥ अनुत्तरं तदेवोक्तं सद्यः कौलिकसिद्धिदं ॥ तरहं च तदेव स्याच्चंद्रभास्करमध्य
गं ॥८॥ तकारः सोमधामस्याद्धकारः सतु भास्करः । द्वंद्वमते वह्निरेकीभूतं तदात्मकं
॥९॥ इति ॥ अथ पश्यंतीन्यासः ॥ तत्र प्रागुक्ता कुलपद्मे ब्रह्मरंध्रे ब्रह्मरसभरितमाद्य
वर्णकदंबकं ध्यात्वा तत्सामरस्यादेकादशरूपं पश्यंतीरसभरितं स्मृत्वा न्यसेत् ॥ तत्र
शिरसि स्वाभिमुखाग्रे त्रिकोणं विभाव्य तस्य अग्रादि वामावर्तेन वामरेखाग्रादि ॥९३॥

क्षिणरेखाग्रपर्यंतं त्रिकं पंचकं ॥ इति क्रमेण वामाद्येकादशीकलां न्यसेत् ॥ तद्यथा ॥ ४
वामायै नमः ॥ ४ ज्येष्ठायै नमः ॥ ४ रौद्र्यै नमः ॥ इति वामरेखायां ॥ ४ अंबिकायै नमः ॥ ४ इच्छायै
नमः ॥ ४ ज्ञानायै नमः ॥ ४ क्रियायै नमः ॥ ४ शांतायै नमः ॥ इति पृष्ठरेखायां ॥ ४ अकारात्मिकायै
नमः ॥ हकारात्मिकायै नमः ॥ अहंरसात्मिकायै नमः ॥ इति दक्षिणरेखायां न्यसेत् ॥ इति पश्यंती
न्यासः ॥ अथ मध्यमान्यासः ॥ स च द्विविधः ॥ सूक्ष्मस्थूलभेदात् ॥ तत्र ब्रह्मरंध्रे ४ अन
कात्मने अविकृतनादाय नमः ॥ ललाटे ४ अकारात्मने शून्यनादाय नमः ॥ भ्रूमध्ये ४ अं
बिंदुहयात्मने स्पर्शनादाय नमः ॥ लंबिकाग्रे ४ षट्कोणात्मने नादनादाय नमः ॥ विशुद्धौ ४
अर्धचंद्रात्मने स्वध्वनिनादाय नमः ॥ हृदये ४ वृत्तात्मने बिंदुनादाय नमः ॥ नाभौ ४ एकारा
त्मने शक्तिनादाय नमः ॥ स्वाधिष्ठाने ४ ईकारात्मने बीजनादाय नमः ॥ मूलाधारे ४ हंसात्मने अक्षर
नादाय नमः ॥ इति सूक्ष्ममध्यमान्यासः ॥ अथ स्थूलमध्यमान्यासः ॥ तत्र ब्रह्मरंध्रे ४ अं इं उं
ऋं लृं नमः ॥ ललाटे ४ एं ऐं ओं औं नमः ॥ भ्रूमध्ये ४ हं यं रं वं लं नमः ॥ लंबिकाग्रे ४ उं अं तां नं मं नमः ॥

ऽपाश्च
कै
मतिपुस्के

॥९४॥ विशुद्धौ ४ कं चं टं तं पं नमः। हृदि ४ खं छं ठं थं फं नमः। नाभौ ४ घं सं ढं धं भं नमः। स्वाधिष्ठाने ४ गं जं
डं दं बं नमः। मूलाधारे ४ शं षं सं नमः। इति मध्यमान्यासः। अथ वैखरीन्यासः। तत्र षडाधारं
गुणत्रयेण त्रिधा विभज्य त्रिबीजसंगतं कुर्यात्॥ तद्यथा॥ यथोत्तरूपाणि मूलाधारादीनाज्ञान्तानि
षट्चक्राणि ध्यात्वा। तत्र वसवलाख्ये योर्मूलविद्याया वाग्भवं विद्युत्प्रभं विचिंत्य तद्दलेषु स्वा
ग्रादि प्रादक्षिण्येन तद्वर्णान् शिवशक्तियोगेन न्यसेत्॥ तद्यथा॥ ४ वहसैं नमः। ४ शहैं
सैं नमः ४ षहैं सैं नमः। ४ सहसैं नमः। इति [redacted] मूलाधारे॥ ततः ४ बहसैं नमः। ४ महसैं
नमः ४ महसैं नमः। ४ यहसैं नमः॥ ४ रहसैं नमः। ४ लहसैं नमः॥ इति स्वाधिष्ठाने॥ ततो डफ
कटाख्ययोः कामराजकूटं रक्तवर्णं ध्यात्वा तद्दलेषु तद्वर्णान् पूर्ववत् न्यसेत्॥ तद्यथा॥ मणि
पूरे दशदलेषु पूर्वादि प्रादक्षिण्येन ४ डहसैं नमः। ४ ढहसैं नमः। ४ णहसैं नमः। ४ तहसैं नमः॥ ४
थहसैं नमः। ४ दहसैं नमः। ४ धहसैं नमः। ४ नहसैं नमः। ४ पहसैं नमः। ४ फहसैं नमः इति मणि
पूरे ॥९४॥

ततो ऽनाहते द्वादशदलेषु स्वाग्रादि प्राग्दक्षिणायेन ४ कहसौं नमः ॥४ खहसौं नमः ॥४ गहसौं नमः ॥४
घहसौं नमः ॥४ ङहसौं नमः ॥४ चहसौं नमः ॥४ छहसौं नमः ॥४ जहसौं नमः ॥४ झहसौं नमः ॥४ ञहसौं नमः ॥४
टहसौं नमः ॥४ ठहसौं नमः ॥ ततो ऽथ वर्गं हृक्षाभ्यां योस्तातीयकूटभुक्तं वर्णध्यानात् तद्दलेषु न्यसेत् ॥
तद्यथा ॥४ अहसौः नमः ॥४ आहसौः नमः ॥४ इहसौः नमः ॥४ ईहसौः ॥४ उहसौः नमः ॥७ ऊहसौः नमः ॥४
ऋहसौः नमः ॥४ ॠहसौः नमः ॥४ ऌहसौः नमः ॥४ ॡहसौः नमः ॥४ एहसौः नमः ॥४ ऐहसौः नमः ॥४
ओहसौः नमः ॥४ औहसौः नमः ॥४ अंहसौः नमः ॥४ अःहसौः नमः ॥ इति विशुद्धौ ततोऽक्ष मध्ये आज्ञा
ख्यस्य दक्षवामदलयोः ४ हहसौः नमः ॥४ क्षहसौः नमः ॥ इति वैखरन्यासं विधायांतः सुधासिक्तं
पद्मरागप्रभं वर्तिकं देवकं ध्यायेत् ॥ इति वैखरीन्यासः ॥ अथ अंतकामकलान्यासः ॥४
हस्त्रैं हसक्लीं हस्रौः इति पंचकूटविद्यया त्रिखंडा मुद्रां बध्वा विन्यस्य चित्सुधावृष्टिसेकादुज्ज्व
लितप्रभान् वर्णान् ध्यात्वा षडाधारेष्वेतेरंतस्तमोरहन्रसावाह्य कामकलारूपां देवीमात्मनि

॥९५॥ भावयेत्॥ इति ततः कामकलान्यासः। अथ बहिः कामकलान्यासः॥ तत्र कामकलामूर्त्तस्य सबिंदु
तुर्यस्वरस्यादिबिंदुदेवीरूपस्यात्मनः केशान्तेत्रकर्णनासिकाद्यवयवसमेतं वक्त्रं परिकल्
प्य तस्याधोबिंदुद्वये बाहुचतुष्टयाद्यवयवसमेतं स्तनद्वयं ध्यात्वा तस्य हार्द्धकलां पादद्वया
द्यवयवसमेतं योनिं विचिंतयेत्॥ वाग्भवकूटमुच्चार्य ईकारस्योर्ध्वबिंद्वात्मने श्रीमहात्रिपुर
सुंदर्याः केशाद्यवयवसहितं(स्तनद्वयायनमः) वक्त्रायनमः॥४ कामराजकूटमुच्चार्य ईकार
स्याधोबिंदुद्वयात्मने श्रीमहात्रिपुरसुंदर्याः बाहुचतुष्टयाद्यवयवसहितस्तनद्वयायनमः॥४
तार्त्तीयकूटमुच्चार्य ईकारस्य हार्द्धकलात्मने श्रीमहात्रिपुरसुंदर्याः बाहुचतुष्टयाद्यव
यवसहितस्तनद्वयायनमः॥४ तार्तीयकूटमुच्चार्य ईकारस्य हार्द्धकलात्मने श्रीमहासुंदर्याः त्रिपुर॰
पादद्वयाद्यवयवसहितयोनये नमः॥४ इति मूर्द्धादिकंठपर्यंतं कंठादिनाभ्यंतं नाभ्यादि ॥९५॥
पादाग्रपर्यंतं च व्यापकत्वेन विन्यसेत्॥ मूलविद्यामुच्चार्य समस्तकामकलात्मकश्रीमहा

सौं

त्रिपुरसुंदर्याः सर्वावयवेभ्यो नमः। इति सर्वांगे व्यापकं कृत्वा॥ नासां ललाटं चक्षुषी कर्णौ विद
वैनं च मुखबिंदौ॥ भुजचतुष्टयं वक्षो हृदयं स्तनबिंदौ॥ चरणद्वयं योनिबिंदौ ध्यात्वा सम
३ म ष्टिकौ कलामृतपरमाक्षरमयं सर्वावयवसंपूर्णां परमह्लादयंतीं कामेश्वरांकनिलयां
सर्वाभरणसंपन्नां देवीं स्वात्मानं ध्यायेत्॥ इति बैंदिः कामकलान्यासः॥ अथायुधन्यासः॥
तत्र स्वरक्षार्थं करे ४ द्रां द्रीं क्लीं ब्लूं सः यां रां लां वां सां जंभनेभ्यः कामेश्वरकामेश्वरीबाणेभ्यो नमः।
स्ववामाधः करे ४ धं थं मोहनाभ्यां कामेश्वरकामेश्वरीचापाभ्यां नमः। स्ववामोर्ध्वहस्ते ४
आं ह्रीं वशीकरणाभ्यां कामेश्वरकामेश्वरीपाशाभ्यां नमः। स्वदक्षोर्ध्वहस्ते ४ क्रों क्रों स्तंभ
नाभ्यां कामेश्वरकामेश्वर्यंकुशाभ्यां नमः॥ इत्ययं न्यासस्तत्तन्मुद्रया कार्यः॥ इत्यायुधन्यासः॥
अथाभूषणन्यासः। तत्र तत्तदंगभूषणाधिया मातृकावर्णान् वक्ष्यमाणस्थानेषु न्यसेत्॥
तद्यथा॥ शिरसि ४ अं नमः। ललाटे ४ आं नमः। दक्षभ्रुवि ४ इं नमः। वामभ्रुवि ४ ईं नमः।

॥९६॥ दक्षकर्णे ४ उं॰ वामकर्णे ४ ऊं॰ दक्षनेत्रे ४ ऋं॰ वामनेत्रे ४ ॠं॰ नासायां ४ लृं" दक्षगंडे ४ लॄं" वामगंडे ४ गं
एं" ओष्ठे ४ ऐं" अधरे ४ ओं" ऊर्ध्वदंते ४ औं" अधोदंते ४ अं" जिह्वायां ४ अः" चिबुके ४ कं" गले ४ खं॥
कंठे ४ गं" दक्षपार्श्वे ४ घं" वामपार्श्वे ४ ङं" दक्षस्तने ४ चं। वामस्तने ४ छं दक्षांसे ४ जं" वामांसे ४ झं" द
क्षकूर्परे ४ ञं" वामकूर्परे ४ टं" करतलयोः ४ ठं" करपृष्ठयोः ४ डं" (दक्षस्तने ४ चं। वामस्तने) नाभौ ४
ढं" लिंगे ४ णं" दक्षोरौ ४ तं। वामोरौ ४ थं। दक्षजानुनि ४ दं। वामजानुनि ४ धं" दक्षजंघायां ४ नं। वा
मजंघायां ४ पं" दक्षस्फिचि ४ फं" वामस्फिचि ४ बं। दक्षपादतले ४ भं" वामपादतले ४ मं" दक्षपा
दांगुष्ठे ४ यं" वामपादांगुष्ठे ४ रं" कक्ष्यां ४ लं" ग्रैवेयके ४ वं। वलये ४ शं गुदे ४ ळं हृदि ४ क्षं दक्षकुंडले ४
षं वामकुंडले ४ सं मुकुटे ४ हं नमः॥ इ साभूषणन्यासः॥ अथ कामरतिन्यासः॥ तत्र ध्यानं कुर्यात्॥
अथ कामान्स्मरेद्देवि दाडिमीकुसुमोपमान्॥ वामांकशक्तिसहितान्पुष्पबाणेक्षुकार्मुकान्॥१॥ ॥९६॥
शक्तयः कुंकुमनिभाः सर्वाभरणभूषिताः॥ नीलोत्पलकरा ध्येयास्त्रैलोक्याकर्षणक्षमाः॥२॥

96

इति ध्यात्वान्यसेत्॥ तद्यथा॥ अस्याः कामरतिमातृकायाः ब्रह्मा ऋषिः गायत्री छंदः परमात्मा देवता न्यासे विनियोगः॥ बालयाषडंगं विधाय॥ अं कामाय रत्यै नमः॥ क्लीं आं कामदाय प्रीत्यै न॥ इं कांताय कामिन्यै नमः॥ ईं कांतिमते मोहिन्यै नमः॥ उं कामगाय कमलायै॥ ऊं कामचाराय विलासिन्यै॥ ऋं कामिने कल्पलतायै॥ ॠं कामुकाय श्यामायै॥ लृं कामवर्द्धनाय शुचिस्मितायै॥ ॡं वामाय विस्मितायै॥ एं रामाय विशालाक्ष्यै॥ ऐं रमणाय लेलिहानायै॥ ओं रतिनाथाय दिगंबरायै॥ औं रतिप्रियाय वामायै॥ अं रात्रिनाथाय कुब्जिकायै॥ अः रमाकांताय कांतायै॥ कं रममाणाय नित्यायै॥ खं निशाचराय कल्याण्यै॥ गं नंदकाय भोगिन्यै॥ घं नंदनाय कामदायै॥ ङं नंदिने सुलोचनायै॥ चं नंदयित्रे सुलाप्रियै॥ छं पंचबाणाय मर्दिन्यै॥ जं रतिसखाय कलहप्रियायै॥ झं पुष्पधन्वने वराक्ष्यै॥ ञं महाधनुषे सुमुख्यै॥ टं भ्रामणाय नलिन्यै नमः॥ ठं भ्रमणाय जटिन्यै॥ डं भ्रमभ्रामणाय पालिन्यै॥ ढं भ्रमाय शिवायै॥ णं भ्रांताय मुग्धायै॥ तं भ्रामकाय रमायै॥ थं भृंगाय भ्रमायै॥

॥९७॥ दं भ्रांतचाराय लोलायै ।४ धं भ्रमवहाय चंचलायै ।४ नं मोहनाय दीर्घजिह्वायै ।४ पं मोहका
य रतिप्रियायै नमः ।४ फं मोहाय लोलाक्ष्यै नमः ।४ बं मोहवर्द्धनाय मृगीक्ष्यै ।४ भं मदनाय
पाटलायै ।४ मं मन्मथाय मदनायै ।४ यं मातंगाय मालायै नमः ।४ रं भृंगनायकाय हंसिन्यै ।४
लं गायकाय विश्वतोमुख्यै ।४ वं गीतिज्ञाय जगदानंदिन्यै ।४ शं नर्तकाय रमण्यै ।४ षं खेल
काय कांत्यै ।४ सं उन्मत्ताय कलकंठ्यै ।४ हं मत्तकाय शुकोद्यै ।४ लं विलासिने मेघश्यामायै ।४
क्षं लोमवर्द्धनाय सस्योत्तमायै नमः ॥ इत्येकपंचाशन्मिथुनानि मातृकास्थानेषु न्यसेत् ॥
इति कामरतिन्यासः ॥ अथ पंचाशत्त्रिपुरान्यासः । तत्र ४ अं कामिनीत्रिपुरायै नमः ।४ आं
मोदिनीत्रिपुरायै नमः ।४ इं मदनात्रि ।४ ईं उन्मादिनीत्रि ।४ उं द्राविणीत्रि ।४ ऊं खेचरी
त्रि ।४ ऋं घंटिकात्रि ।४ ॠं कलावतीत्रि ।४ लृं क्लेदिनीत्रि ।४ लॄं शिवदूतीत्रि ।४ एं सुभगा
त्रि ।४ ऐं भगात्रि ।४ ओं विघ्नेशीत्रि ।४ औं महालक्ष्मीत्रि ।४ अं कौलिनीत्रि ।४ अः सुखेश्वरी
त्रि ।४ ॥९७॥

97

कं कुलमालिनीत्रि०।४ खं व्यापिनीत्रि०।४ गं भगानंदात्रि०।४ घं वागीश्वरीत्रि०।४ ङं० वषट्का
रीत्रि०।४ चं पिंगलात्रि०।४ छं भगसर्पिणीत्रि०।४ जं सुंदरीत्रि०।४ झं नीलपताकात्रि०।४ ञं त्रिपुरा
त्रि०।४ टं सिद्धेश्वरीत्रि०।४ ठं अमोघात्रि०।४ डं रत्नमालिनीत्रि०।४ ढं मंगलात्रि०।४ णं भगमालि
नीत्रि०।४ तं निसात्रि०।४ थं रौद्रीत्रि०।४ दं व्योमेश्वरीत्रि०।४ धं अंबिकात्रि०।४ नं अट्टहासात्रि०।४ पं आ
प्यायिनीत्रि०।४ फं वज्रेश्वरीत्रि०।४ बं क्षोभिणीत्रि०।४ भं शांभवीत्रि०।४ मं स्तंभिनीत्रि०।४ यं अनामा
त्रि०।४ रं रक्तात्रि०।४ लं शुक्लात्रि०।४ वं अपराजितात्रि०।४ शं संवर्तकात्रि०।४ षं विमलात्रि०।४ सं घोरा
त्रि०।४ हं अघोरात्रि०।४ लं बिंदुभैरवीत्रि०।४ क्षं सर्वाकर्षणीत्रिपुरायै नमः॥१ इति तामातृकास्था
नेषु न्यस्तव्याः॥ इति पंचाशत्त्रिपुरान्यासः॥ अथ षोडशकामकलान्यासः॥ तत्र दक्षपादे ४
क्लीं अं सिद्धाकलायै नमः। दक्षजंघायां ४ क्लीं आं प्रीतिकलायै०। दक्षजानुनि ४ क्लीं इं रतिकलायै०।
दक्षोरौ ४ क्लीं ईं धृतिकलायै०। दक्षवक्षसि ४ क्लीं उं कांतिकलायै०। दक्षबाहुमूले ४ क्लीं ऊं मनोरमा
कलायै०। मुखदक्षे ४ क्लीं ऋं मनोहराकलायै०। दक्षमूर्ध्नि ४ क्लीं ॠं मनोभवाकलायै०। वामशिरोभागे ४

 क्लीं लं मदनोन्मादिनी कलायै ०।मुखवामे ४ क्लीं लृं मोहिनी कलायै ०।वामबाहुमूले ४ क्लीं एं दीपिनीक
लायै ०।वामवक्षसि ४ क्लीं ऐं शोषिणी कलायै ०।वामोरौ ४ क्लीं ओं वशंकरी कलायै ०।वामजानुनि ४
क्लीं औं रंजिनी कलायै ०।वामजंघायां ४ क्लीं अं सुभगा कलायै ०।वामपादे ४ क्लीं अः प्रियदर्शिनी कला
यै नमः। इति विन्यस्य एताः शुक्लवर्णाः सोत्पलकरा ध्येयाः॥ इति षोडश कामकला न्यासः॥ अथ
 षोडश सोमकलान्यासः। तत्र पृष्ठदक्षभागे ४ सं अं पूषा कलायै नमः॥ दक्षांसपृष्ठे ४ सां आं वशा
कलायै ०।दक्षग्रीपृष्ठे ४ सिं इं सुमना कलायै ०।दक्षकर्णे ४ सीं ईं रति कलायै नमः॥ दक्षनेत्रे ४ सु
उं प्रीति कलायै ०।दक्षनासायां ४ सूं ऊं धृति कलायै ०।दक्षललाटे ४ सृं ऋं ऋद्धि कलायै ०।दक्षमू
र्द्ध्नि ४ सॄं ॠं सौम्या कलायै ०।वाममूर्द्ध्नि ४ सॢं लृं मरीचि कलायै ०।वामललाटे ४ सॣं ॡं अंशुमा
लिनी कलायै ०॥ वामनासायां ४ सें ऐं अंगिरा कलायै ०।वामनेत्रे ४ सैं ऐं शशिनी कलायै ०।वामकर्णे ४
सों ओं छाया कलायै ०।वामग्रीवायै पृष्ठे ४ सौं औं संपूर्णमंडला कलायै ०।वामांसपृष्ठे ४ सं अं तु
ष्टि कलायै ०।पृष्ठवामभागे सः अः अमृता कलायै नमः॥ एताः शुभ्राः सोत्पलाकरा ध्येयाः इति

षोडशसोमकलान्यासः॥ अथ वशिन्यादिवाग्देवताष्टकन्यासः॥ तत्र शिरसि ४ अं १६ ब्लूं व
शिनीवाग्देवतायै नमः॥ ललाटे ४ कं ४ कलह्रीं कामेश्वरीवाग्देवतायै॥ भ्रूमध्ये ४ चं ४ न्व्लीं मो
दिनीवाग्देवतायै॥ कण्ठे ४ टं ४ य्लूं विमलावाग्देवतायै॥ हृदये ४ तं ४ ज्म्रीं अरुणावाग्देवतायै न०॥
नाभौ ४ पं ४ हसलव्यूं जयिनीवाग्देवतायै॥ मूलाधारे ४ यं ३ झमरयूं सर्वेश्वरीवाग्देवतायै॥
मूलाधारादिपादद्वयान्ते ४ शं ५ क्ष्म्रीं कौलिनीवाग्देवतायै नमः॥ इति वाग्देवतान्यासः॥ अथ च
तुःपीठन्यासः॥ तत्र मूलाधारे ४ प्रथमकूटमुच्चार्य अग्निचक्रे कामगिरीपीठे मित्रीशनाथात्मि
के जाग्रद्दशाधिष्ठायके इच्छाशक्त्यात्मके रुद्रात्मशक्ति श्रीकामेश्वरीदेव्यै नमः॥ हृदये ४ द्वितीय
कूटमुच्चार्य सूर्यचक्रे जालंधरपीठे षष्ठीशनाथात्मके स्वप्नदशाधिष्ठायके ज्ञानशक्त्यात्मके
विष्णवात्मकशक्ति श्रीवज्रेश्वरीदेव्यै नमः॥ भ्रूमध्ये ४ तृतीयकूटमुच्चार्य सोमचक्रे पूर्णगिरिपीठे
उड्डीशनाथात्मके सुषुप्तिदशाधिष्ठायके क्रियाशक्त्यात्मक ब्रह्मात्मशक्ति श्रीभगमालिनी
देव्यै नमः॥ ब्रह्मरन्ध्रे ४ तुर्यविद्यामुच्चार्य ब्रह्मचक्रे उड्याणपीठे श्रीचर्यानाथात्मके तुर्यातीत

॥९९॥ दशाधिष्ठायके परब्रह्मात्मशक्तिश्रीमहात्रिपुरसुंदरीदेव्यै नमः॥ इति चतुःपीठन्यासः॥
अथ कामेश्वर्यादिन्यासः। तत्र वामपादांगुष्ठादिनाभिपर्यंतं ४ ऐं प्रथमकूटे कामेश्वर्यै नमः।
नाभेः कंठपर्यंतं क्लीं द्वितीकूटं वज्रेश्वर्यै नमः। कंठात् शिरःपर्यंतं ४ सौः तृतीयकूटं भगमालि
न्यै नमः॥ इति वामभागे विन्यस्य दक्षपादांगुष्ठान्नाभिपर्यंतं ४ ह्सैं आत्मतत्त्वाधिपतये ब्र
ह्मणे नमः। नाभेः कंठपर्यंतं ४ ह्स्क्लीं विद्यातत्त्वाधिपतये विष्णवे नमः। कंठादि शिरोंतं ४
ह्सौः शिवतत्त्वाधिपतये रुद्राय नमः॥ इति तत्त्वदेवतान्यासः। अथ चतुस्तत्त्वन्यासः॥ ना
भ्यादिपादांतं प्रथमकूटं ४ आत्मतत्त्वात्मने श्रीमहात्रिपुरसुंदर्यै नमः॥ कंठादि नाभ्यंतं ४
द्वितीयकूटं विद्यातत्त्वात्मने श्रीमहात्रिपुरसुंदर्यै नमः। मूर्द्धादि कंठांतं ४ तृतीयकूटं शिव
तत्त्वात्मने श्रीमहात्रिपुरसुंदर्यै नमः। मूर्द्धादि पादपर्यंतं ४ तुरीयविद्यामुच्चार्य ४ सर्वतत्त्वात्मने
श्रीमहात्रिपुरसुंदर्यै नमः। इति व्यापकं कुर्यात्। इति चतुस्तत्त्वन्यासः॥ अथ मूलविद्यान्यासः
मूलाधारे॥ ४ प्रथमकूटं। हृदि ४ द्वितीयकूटं नमः। भ्रूमध्ये ४ तृतीयकूटं नमः॥ ब्रह्मरंध्रे ४ ॥९९॥

त्तरीयविद्यां च विन्यस्य प्राग्वत्समस्तविद्यां व्यापकत्वेन न्यसेत्॥ इति मूलविद्यान्यासः॥ स च बाल
याएव कर्तव्यः॥ तद्यथा॥ वामकर्णे ऐं नमः। दक्षकर्णे क्लीं नमः। चिबुके ४ सौः नमः। एवं वामशंखे
दक्षशंखे मुखे च द्वितीया योनिः। वामदक्षनेत्रयोर्नासायां च तृतीया वामदक्षांसहृदयेषु चतु
र्थी। वामदक्षकूर्परनाभिषु पंचमी। वामदक्षजानुलिंगेषु षष्ठी। वामदक्षपादांगुष्ठेषु सप्तमी।
वामदक्षपार्श्ववक्षसि अष्टमी। वामदक्षस्तनकंठेषु नवमी॥ इति बहिर्नवयोनिन्यासः॥ अथां
तर्नवयोनिन्यासः॥ तत्र मूलाधारादिषट्चक्रललाटसीमंतब्रह्मरंध्रेषु नवस्थानेषु चतुर
स्रवेष्टिता नवयोनीः परिकल्प्य तासु स्वाग्रायप्रादक्षिण्यक्रमेण प्रागुक्तबीजत्रयं मन
सा ध्यायन्न्यसेत्॥ इत्यंतर्नवयोनिन्यासः॥ अथ स्थलीन्यासः॥ तत्र शिखायां ४ प्रथमकूटं
नमः। एवं चिबुके ४ द्वितीयं। मुखे ४ तृतीयं। पुनर्मुखे ४ प्रथमं। कंठे ४ द्वितीयं। चिबुके ४ तृतीयं।
पुनश्चिबुके ४ प्रथमं। हृदये ४ द्वितीयं। कंठे ४ तृतीयं कूटं। पुनः कंठे ४ प्रथमकूटं। नाभौ ४
द्वितीयं। हृदये ४ तृतीयं। पुनर्हृदये ४ प्रथमं। स्वाधिष्ठाने ४ द्वितीयं। नाभौ ४ तृतीयं। पुनर्नाभौ ४

॥१००॥ प्रथमं मूलाधारे४ द्वितीयं स्वाधिष्ठाने तृतीयं पुनः स्वाधिष्ठाने४ प्रथमं उर्व्वो४ द्वितीयं मूला
धारे४ तृतीयं॥ इति षट्स्थलीन्यासः॥ अथ प्रकटादिन्यासः। तत्र च मूलाधारे४ अं त्रीं सौः त्रैलोक्य
मोहनचक्रस्वामिभ्यः प्रकटयोगिनीभ्यो नमः। स्वाधिष्ठाने४ ऐं क्लीं सौः सर्वाशापरिपूरकचक्रस्वा
मिभ्यो गुप्तयोगिनीभ्यो नमः। मणिपूरके४ ह्रीं क्लीं सौः सर्वसंक्षोभणचक्रस्वामिभ्यो गुप्ततरयोगिनीभ्यो
नमः। हृदये४ हैं हक्लीं ह्सौः सर्वसौभाग्यदायकचक्रस्वामिभ्यः संप्रदाययोगिनीभ्यो नमः। वि
शुद्धौ४ ह्सैं ह्सक्लीं ह्सौः सर्वार्थसाधकचक्रस्वामिभ्यः कुलकौलयोगिनीभ्यो नमः। आज्ञायां४
ह्रीं क्लीं ब्लें सर्वरक्षाकरचक्रस्वामिभ्यो निगर्भयोगिनीभ्यो नमः। ललाटे४ ह्रीं श्रीं सौः सर्वरोगहरच
क्रस्वामिभ्यो रहस्ययोगिनीभ्यो नमः। शिरसि४ ह्सैं ह्सकलरीं ह्सौः सर्वसिद्धिप्रदचक्रस्वामिभ्यः
परापररहस्ययोगिनीभ्यो नमः। ब्रह्मरंध्रे४ मूलपंचदशी मुद्रार्थ सर्वानंदमयचक्रस्वामिभ्यः
परापरातिरहस्ययोगिनीभ्यो नमः। इति विन्यस्य४ समस्तप्रकटसादि योगिनीसमष्टिवि ॥१००॥

द्यायास र्वांगे व्यापकं विन्यसेत् इति प्रकटादिन्यासः। अथ अमठन्यासः। तत्र शिरसि ४ ओं
सरस्वत्यै नमः। ललाटे ४ ह्रीं पार्वत्यै नमः। दक्षनेत्रे ४ अं सवित्र्यै नमः। वामनेत्रे ४ अं अग्नये नमः।
मुखवृत्ते ४ ठं चन्द्रमसे नमः। मुखे ४ श्रीं श्रियै नमः। कपोलयोः ४ स्वां ह्रां दंतिने नमः। इत्यमठ
न्यासः। अथैतन्न्यासफलं॥ त्रिकाले यस्त्रिवारं वा पंचवारं च सप्तधा॥ कुर्याद्वा दशधा वा
य शृणु तस्य फलं शिवे॥१॥ कांतिर्मेधा यशः सौख्यं सुखं श्रीस्तस्य जायते इति॥ श्रीविद्या
नंदनाथेन शिवयोः प्रियसूनुना॥ कृते सौभाग्यरत्नाख्योत्तरंगे गमदष्टमः॥१॥ इति
श्रीसच्चिदानंदनाथचरणारविंदद्वंद्वांतेवासिना श्रीश्रीविद्यानंदनाथेन विरचिते सौ
भाग्यरत्नाकरे ऽष्टमस्तरंगः॥८॥ ॥ अथ फणान्यासः। आधारे चतुर्दलकमलकर्णिका
यां स्वराद्यों अवर्गांकितं चिंतयित्वा तत्र कुंडलिनीं च फणान्वितां विचिंत्य तेषु फणेषु ४ प्रथम
कूटं पंचवर्णं मनसा विन्यस्य॥ ततोऽनाहते द्वादशदलेकमलकर्णिकायां तथैवानुक

॥१०१॥ वर्गान्वितं विभाव्य तत्र तां कुण्डलिनीं विचिंत्य तेषु पूर्णरत्नेषु ४ द्वितीयकूटाक्षराणि विन्यस्य।
ततो हृदम्बुजे तथैवाष्टदलं चवर्गान्वितं विचिंत्य तत्र तां वेदपूर्णान्वितां ध्यात्वा ४ तत्र शक्तिकूटाक्षराणि वि-
न्यस्य। ततः सहस्रदलकमलकर्णिकायां वर्णरविंदं ध्यात्वा तत्र तां पंचदशफणान्वितां वि-
(10) चिंत्य तत्र मूलाक्षराणि विन्यसेदिति फणान्यासः॥ अथ सर्वसंमोहनन्यासः॥ शिरसि ४ ऐं क्लीं सौः
ह्रीं श्रीं नादनादाय नमः। ललाटे ४ ह्रीं श्रीं क्लीं हसकलह्रीं अनन्यनादाय नमः। भ्रूमध्ये ४ ह्रीं श्रीं कएईलह्रीं
अविकृतनादाय नमः। नासायां ४ ह्रीं श्रीं हसौं सकलह्रीं स्पर्शनादाय नमः॥ मुखे ४ त्सीं ह्रीं श्रीं ध्व ॥१०१॥
नि नादाय नमः। हृदि ४ ऐं ग्लौं स्त्रौं ऐं त्स्रौं ह्रीं श्रीं नादनादाय नमः। जठरे ४ ईहसकलह्रीं कएईल-
ह्रीं ऐं क्लीं सौं ह्रीं श्रीं बिंदुनादाय नमः। नाभौ ४ ईहसकलह्रीं श्रीं विकृतिनादाय नमः। मूले ४ त्सीं सौं सकल-
ह्रीं ह्रीं श्रीं बीजनादाय नमः। मूलाधारे ४ ग्लौं हसः ह्रीं श्रीं अक्षरनादाय नमः। ४ मूलेन सर्वशरीरे व्या-
पकं न्यसेदिति सर्वसंमोहनन्यासः॥ अथ गुरुप्रबोधन्यासः॥ तद्यथा॥ श्रीकर उवाच॥ कलौ मे ज्ञान

सिध्यंति विना येन तदुच्यते॥ अनेन मंत्र तंत्राणि सिध्यंति स्फटति ध्रुवं ॥१॥ पूर्वस्मासं ततो
बीजे स्तुते रावणराक्षसैः॥ न्यासोऽयं विक्रमादेवं साधनानो क्रमादपि ॥२॥ किंतु विद्यामहा
विद्यागणेशी मनवस्तथा॥ हयग्रीवमनुश्चैव बीजमुक्तं महीतले ॥३॥ ओं अस्य श्रीगु
ह्यषोढा श्रीमहाचक्रेश्वरीन्यासस्य दक्षिणामूर्तिऋषिः अनुष्टुप्छंदः श्रीमहात्रिपुर
सुंदरी देवता॥ सांख्यायनगोत्रं ऐं बीजं ह्रीं शक्तिः क्लीं कीलकं श्रीगुरुदेवताप्रसादसिध्य
र्थे गुह्यषोढान्यासे विनियोगः॥ ऐं मध्यमाभ्यां नमः॥ ह्रीं अनामिकाभ्यां नमः॥ श्रीं कनि
ष्ठिकाभ्यां नमः॥ ऐं अंगुष्ठाभ्यां॥ ह्रीं तर्जनीभ्यां॥ श्रीं करतलकरपृष्ठाभ्यां। एवं हृदयादि
षडंगं विधाय॥ ऐं ह्रीं श्रीं ह्स्लैं हसकली ह्सौः त्रिपुरायै नमः। इति शिखायां॥ ऐं क्लीं सौः बाला
त्रिपुरायै नमः मुखे॥ ऐं शारदात्रिपुरायै नमः कंठे॥ ह्सौं श्रीं ह्सौः सिद्धेश्वर्यै नमः ललाटे॥
हस्रैं हस्क्लीं ह्स्रौः त्रिपुराक्षिद्धायै नमः भ्रूमध्ये॥ ह्स्रैं स्क्लीं स्सौः त्रिपुरापरमेश्वर्यै नमो गले॥

॥१०२॥ कामराज विद्या१५राजराजेश्वर्यै नमो हृदये॥४ नफक्ष्मलवयंमालिनी त्रिपुरायै नमो हृदयोपरि॥४
लोपामुद्रा विद्या१५ देवी त्रिपुरसुंदर्यै नमो गुह्योपरि॥४ हसैरीं हसैरीं श्रृं सुखदा त्रिपुरायै नमो मेढ्रे॥४
ह्रीं कामेश्वर्यै नमो गुह्ये॥४ ह्रीं त्रिपुरभुवनेश्वर्यै नमो सर्वांगे॥४ हंसः निर्वाणसुंदर्यै नमो नासा
102 रंध्रे॥४ ह्रीं स्त्रीं स्हौं हरिप्रियावरमायै नमो ब्रह्मरंध्रे॥४ ऐं १५ पंचदशीनक्षत्रवल्लभायै नमो
ललाटे॥४ कामराजकूटं क्लीं रतिप्रियायै नमो श्रोत्रयोः॥४ ह्रीं श्रीं क्लीं शक्रप्रियायै नमो
घ्राणे॥४ शक्ति ह्रैं सौं श्रीं गुरुप्रियायै नमः ओष्ठे॥४ लोपामुद्रा पंचकूटं ऐं प्राणेश्वर्यै नमः दंतपंक्त्योः॥४
ऐं ह्रीं श्रीं सौं जीवेश्वर्यै नमः रसनायां॥४ ह्रीं श्रीं ब्रह्मण्यै नमः कूर्परयोः॥४ हंसः ओं ऐं ह्रीं श्रीं ह्रीं
हूं सोहं परमात्मस्वरूपायै नमः पृष्ठे॥ ओं ३ ओं सं हूं सौः पृथ्वीरूपायै नमः सर्वांगे॥४ ओं ३ श्री
मृत्युंजयं ह्रीं हस्क्लें स्वाहायै नमः हृदये॥ ओं ३ सौः क्लीं ३ गुरुप्रियायै नमः स्तनयोः॥४ क्रोधरूपायै नमः
कुक्षौ॥४ श्रीं ह्रीं ऐं सः॥ वितानकादेव्यै नमः लिंगे॥४ ह्रीं क्लीं भुवनेश्वर्यै नमः॥ शीर्षादि पादपर्यंतं॥४ ॥१०२॥

ऐं वाग्भैरव्यै नमः मूलाधारे ॥४ क्लीं कामरूपायै नमः हृदयाधः ॥४ सौः शाक्तिरायै नमः ज्वलके ॥
ओं ३ समस्तमूलविद्यामुख्यार्यश्रीमन्महात्रिपुरसुंदर्यै नमः सर्वांगे व्यापकं ॥ पुनः पूर्ववत्करषडं
गानि कुर्यात् ॥ इमं न्यासं महेशानि यः करोति दिवानिशं ॥ स नु सिद्धिमवाप्नोति मोक्षस्तस्य वि
निश्चिते ॥१॥ न जरा न च मृत्युश्च न च राजभयादिकं ॥ परमेन्यसतिन्यासं समुक्तो नात्र संशया
॥२॥ द्वात्रिंशच्च महाविद्या उक्तस्थानेषु विन्यसेत् ॥ महाचक्रेश्वरीन्यासो देवानामपि दुर्लभः ॥३॥
॥इति गुह्यषोढा महाचक्रेश्वरीन्यासः ॥ ॥ ततो गणेशपंचमी दुर्गा बटुक क्षेत्रपालान् पूर्ण
अश्वारूढ बाला कालसंकर्पण्यादिस्मरेत् ॥ तद्यथा ॥ ओं वक्रतुंडाय हुं ॥१॥ ओं ह्रीं नमो भग
वति वाराहि घोरे स्वप्नं ठः ठः स्वाहा ॥२॥ ऐं ह्रीं क्लीं चामुंडायै विच्चे ॥३॥ ओं ऐं क्लीं क्लीं क्लूं ह्रां ह्रीं ह्रूं सः
बां आपदुद्धारणाय अजामलवद्धाय लोकेश्वराय स्वर्णाकर्षणभैरवाय मम दारिद्र्यविद्वे
षणाय ओं श्रीं महाभैरवाय नमः ॥४ ओं क्षेत्रपालाय स्वाहा ॥ ह्रीं सौः श्रीं क्लीं ओं नमो भगवति अं

॥१०३॥ न्नैपूर्णे मम माभिलषितं अन्नं देहि स्वाहा ॥ ६ ॥ ओं ह्रीं फ्रें फ्रें सर्ववशंकरि स्वाहा ॥ ७ ॥ ऐं क्लीं सौः ॥ ८ ॥
रक्ष मां महाचण्डयोगेश्वरी ॥ ९ ॥ इति मन्त्रनवकं स्मृत्वा ॥ मूलवाग्भवमुच्चार्याति रस्थितं विषयं ब
हिर्भावयन् पूरयेत् ॥ कामराजेन उपसंहरन् संभावयन् कुंभयेत् शक्तिबीजेन रेचयेत् ॥ इति
103 प्राणायाममूलिंगन्यासं कुर्यात् ॥ स यथा ॥ ४ ऐं स्वयंभूलिंगाय नमो मूलाधारे ॥ ४ ईं बाणलिं
गाय नमो हृदये ॥ ४ औः इतरलिंगाय नमो भ्रूमध्ये ॥ ४ ऐं ईं ओः परलिंगाय नमो ब्रह्मरंध्रे ॥
कनककपाटलसितं तत्समष्टिरूपे तेजो विचिन्त्य नासामार्गेण स्वकरांजलौ संक्रम्य ध्यायेत् त्रों सौः ॥
इति बीजमन्त्रये मध्यमादितलौ तं विन्यस्य करशुद्धिं विधाय ऐं नाभ्यन्तरापादं क्लीं हृदो नाभि
पर्यन्तं ॥ सौः शिरसो हृत्पर्यन्तं ॥ ऐं क्लीं सौः ॥ त्रिवर्णं कं सर्वांगे च ॥ ह्रीं क्लीं सौः त्रिपुरसुंदरि मम आत्मानं
रक्ष रक्ष हृदये इत्यात्मरक्षान्यासः ॥ ततः मूलाधारे दशदलमंडले विभाव्य कृप वह्निमंड
लाय नमः ॥ हृदये द्वादशदले हं सूर्यमंडलाय नमः ॥ भ्रूमध्ये षोडशदले विभाव्य सः ४ सौं १०३

ममं उलायनमः॥ ब्रह्मरंध्रे क॰१५ परमं उलायनमः। क॰५ करमूले। ह॰६ करमध्ये। स॰४ कराग्रे॥
एवं वामेकरे। क॰५ मूलाधारे। हृदि ह॰६। स॰४ बिंदौ क॰ मध्ये॥ क॰१५ ब्रह्मरंध्रे॥ द्वादशांते इंदुबिलस
त्पीयूषेणाम्लनमस्तनुं॥ संपूज्य तन्मयो भूत्वा न्यसेत्पश्चात्त्रवासनं॥१॥ अथ मूविधानवासनन्यासः॥
अंआंसौः त्रिपुरामृतार्णवासनायनमः पादयोः॥ ऐं क्लीं सौः त्रिपुरेश्वरी पोताम्बुजासनायनमो जा
नुनि॥ ह्रींक्लीं सौः त्रिपुरसुंदरी देव्यासनायनम ऊरौ॥ हैं ह्क्लीं सौः त्रिपुरवासिनी सर्वचक्रास
नायनमो जंघने॥ सौं ह्क्लीं हसौः त्रिपुराश्रीसर्वमंत्रासनायनमो गुदे॥ ह्रीं क्लीं ब्लें त्रिपुरमालि
नी साध्यसिद्धासनायनमो लिंगे॥ ह्रीं श्रीं सौः त्रिपुरासिद्धे सिद्धौ कृतासनायनमो ना॰ नाभौ॥
ह्सैं ह्स्क्लीं ह्सौः त्रिपुरांबपर्यंकपीठासनायनमो हृदये॥ हसकलरडैं हसलरडीं हसकलरडौः
त्रिपुरभैरवीसदाशिवमहाप्रेतपद्मासनायनमो ब्रह्मरंध्रे॥ इति नवासनन्यासः॥ पा
अथ महाशाक्तिन्यासः॥ तत्र प्रथमं जगच्छून्याकारं निरालंबं ध्यात्वा ४ हृं पृथिव्यै नमः।

॥१०४॥ इतिस्वासनाधः पृथिवीं संपूज्य। स्वासनं वा महस्तेन स्पृशेत्। भुवनेश्वरीबीजं सप्त
वारं जपित्वा॥ ओं ३ जयायै नमः।४ विजयायै ४। जयंत्यै नमः।४ अजितायै।४ अपराजिता
यै नमः।४ संगमायै।४ रंभायै। इति स्वासने सप्त सप्तशक्तीः संपूज्य मूलविद्यया प्राणायामत्रयं
104 कृत्वा॥ अस्य श्रीमहाराज्ञीकिन्यासस्य ४ परमशिव ऋषिः ४ अतिजगती छंदः ४ श्रीपराशा
क्तिर्देवता ४ ऐं बीजं ४ श्रीं शक्तिः ४ सौः कीलकं श्रीविद्यांगत्वेन महाराज्ञीकिन्यासे विनियोगः।
इति ऋष्यादिकं स्मृत्वा यथाविधि विन्यस्य त्रितारैर्द्विरावृत्त्या करषडंगन्यासं विधाय न्या
सं कुर्यात्॥ तत्र योनौ॥ ओं ३ ह्रां ह्रीं ह्रूं नमः [illegible]टे ४ सां सीं सूं नमः कर्णयोः ४ ह्रां ह्रीं ह्रूं नमः।
ध्वज[illegible]ले ४ द्रां द्रीं द्रूं नमः चिबुकाग्रे ४ सौः श्रीं सौः नमः ब्रह्मरंध्रे ४ ऐं ह्रीं सौः [illegible] नमः
इति विन्यस्य अकारादिक्षकारांतानां सर्वेषां वर्णानां मूलभूतमकारं सर्वेषु वर्णेषु बिंदुरूप
स्य सर्पिवत् सूक्ष्मरूपेणास्थितं विभावयन् तन्मयानन्यवर्णान्विक्ष्य मातृकेषु स्थानेषु न्यसेत्॥ ॥१०४॥

ब्रह्मरंध्रे ऐं ईं सौः ॐ नमः तन्त्रे तालु४ ऐं ईं सौः आँ नमः। नासाग्रे४ ऐं ईं सौः ईं नमः। पश्चिमलिंगे
शीवन्यां मूलाधारगतज्योतिर्लिंगे॥ ४ ऐं ईं सौः ईं नमः। गुदे ४।३ उं नमः।४ पृष्ठमध्ये ४।३ ऊं नमः॥
कटिसंधौ ४।३ ऋं नमः। वृषणान्ते ४।३ ॠं नमः। पृष्ठमध्ये ४।३ लृं नमः। लेबिकास्थाने ४।३ लॄं
नमः। सर्वांगे ४।३ एं नमः। पुनर्बिंदुपदे गतत्रिरेखायां योनौ न्यासभावनया सर्वांगे ४।३
ऐं नमः। इति विन्यस्य॥ योनिरित्युच्यते शक्तिरेषा ब्रह्माण्डमेदिनी॥ लयं चिन्ता लयं देहे
रेतो बिंदुरिति स्मृतः॥ १॥ द्वासप्ततिसहस्रेषु नाडीभेदेषु पंजरे॥ व्याप्य मा नाम महाशक्तिः
कामिनीनां क्रमेण क्रमेश॥ नाडिचक्रागतेरक्तं योनिमार्गे निपातयेत्॥ पुष्पीभूते मगे पुष्पं
मासपक्षादिषु क्रमात्॥ ३॥ ऐंकारोपि स्वयं योनिर्नात्र कार्या विचारणा॥ न्यस्तं चाप्यत्र देवि
मां त्रैलोक्यं सचराचरं॥ ४॥ इत्यंतः श्लोकसमुदायस्यार्थं चिंतयन् महाकामकलायालयं
भावयित्वा। ब्रह्मरंध्रे ४।३ ओं नमः। नादमध्ये ४।३ औं नमः। नादान्ते ४।३ अं नमः। कंठे ४।३ अः नमः।

॥१०५॥ हृदि ४।३ कं नमः। मस्तके ४।३ खं नमः॥ जंघयोः ४।३ गं नमः। स्तनयोः ४।३ घं नमः। नासिकांते ४।३
ङं नमः। आतात्यां ४।३ चं नमः। वामकुक्षौ ४।३ छं नमः। दक्षकुक्षौ ४।३ जं नमः। कुसमूले ४।३
झं नमः। दंतपंक्तौ ४।३ ञं नमः। जिह्वाग्रे ४।३ टं नमः। मुखे ४।३ ठं नमः। कक्षयोः ४।३ डं नमः।
105 अस्थिसंधिषु ४।३ ढं नमः। चित्ते ४।३ णं नमः। नाभौ ४।३ तं नमः। ललाटे ४।३ थं नमः। कर्णरंध्र
योः ४।३ दं नमः। कपोलमूलयोः ४।३ धं नमः। नयनयोः ४।३ नं नमः। श्वेतसहस्रदलकमले ४।३
पं नमः। हृत्पद्मे ४।३ फं नमः। स्कंधयोः ४।३ बं नमः। हृदये ४।३ भं नमः। हनुमूले ४।३ मं नमः।
तालुमूले ४।३ यं नमः। लिंगगुदयोर्मध्ये ४।३ रं [illegible] नमः। जिह्वायां ४।३ लं नमः। सर्वांगे ४।३ वं नमः।
वामादिदक्षिणाशिरःपर्यंतमापादतलवेष्टकत्वेन ४।३ शं नमः। तालुमूले ४।३ षं नमः। सर्वांगे ४।३
सं नमः। ब्रह्मरंध्रे ४।३ हं नमः॥ हस्तपादयोः सर्वांगुलिषु ॐ ऐं ह्रीं श्रीं ऐं ईं सौः क्षं नमः॥ आगुत्ते १०५
मूलाधारस्थितकुंडलिन्यां ॐ ऐं ह्रीं श्रीं ऐं ईं सौः ॐ नमः॥ इति विन्यस्य। ॐ ऐं ह्रीं श्रीं ऐं ईं सौः समस्त

मातृकामुच्चरन्तीं कुंडलिनीं सुषुम्णावर्त्मनाषट्चक्रमेदक्रमेण ब्रह्मरंध्रं नीत्वा तत्रस्था
कुलसहस्रदलकमलकर्णिकामध्यस्थितपरमात्मनि शिवे विलीनां विभाव्य ओं ऐं ह्रीं श्रीं
ऐं ह्रीं सौः। रक्ष रक्ष श्रृङ्खलिनि हिते त्रैलोक्यानंददायिनी॥ रक्ष मां त्रिपुरे देवि रक्ष मां त्रिपुरेश्वरि ॥१॥
रक्ष रक्ष महादेवि अस्मदीयमिदं वपुः ॥४ ऐं ह्रीं श्रीं हस्क्लौं हसौः हस्रौः हस्क्रें श्रीं ह्रीं ऐं श्रीसम
यिनि मदिरानंदसुंदरि समस्तसुरासुरवंदिते भुजंगभूपालमालालंकृतचरणकमले
विकटदंतघंटाटोपनिवारिणि मदीयं शरीरं रक्ष रक्ष परमेश्वरि हुं फट् स्वाहा॥ ओं भूः स्वाहा।
ओं भुवः स्वाहा। ओं स्वः स्वाहा। ओं भूर्भुवः स्वः स्वाहा। नरांत्रमालाभरणभूषिते महाकौलि
नि महाब्रह्मवादिनि महाधनोन्मादनकारिणि महाभोगप्रदे अस्मदीयं शरीरं वज्रमयं
कुरु कुरु दुर्जनान् हन हन दुष्टमहीपालान् भक्षय भक्षय परचक्रं भंजय भंजय जयंकरि
गगनगामिनि त्रैलोक्यस्वामिनि यमलवरयूं रमलवरयूं लमलवरयूं वमलवरयूं शमलवरयूं

॥१०६॥ श्रीभैरवि प्रसादय स्वाहा ॥ कुलांगनाकुले सर्वं मदीयं त्रिपुरेश्वरि ॥ देवी रक्षतु दिव्यांगी दिव्या
त्माभोगदायिनी ॥१॥ रक्ष रक्ष महादेवि शारीरं परमेश्वरि ॥ मदीयं मदिरानन्दे आपादतल
मस्तकं ॥२॥ त्रिपुराख्या महादेवी भुक्तिमुक्तिफलप्रदा ॥ न गुरोः सदृशं वस्तु न देवः शंकरो
106
पमः ॥३॥ न च कौलात्परो योगो न विद्या त्रैपुरी समा ॥ दर्शनेषु समस्तेषु पार्वते देवि शोभनः
॥४॥ जयति कुलशक्तिर्महीतलपातालनिवासिनी कुलकौलविभेदिनि ॥ सकलजनमन
आनन्दकारिणी करोतु मम चिंतितं कार्यशतमेकं पुनातु परमेश्वरी मदनमंडलालंबिनी
सप्तकोटिसहस्राणां मंत्राणां परमेश्वरि ॥ इति मंत्रं सकृज्जपित्वा ॥४॥ ओं ऐं नमो भगवति त्रि
कोणत्रिधावर्त्ते महालिंगालंकृते वद वद वाग्वादिनि श्रीं भ्रष्टमहीपालराज्यप्रदे ऐं वरदाश्रि
तहस्ते समस्तजनानन्दकारिणि क्लीं क्लीं कामराजबीजाश्रये ह्रां ह्रीं क्लीं ब्लूं सः क्षोभय रक्षोभिणि
ह्सौः ह्स्सः ह्सौः मथ रक्ष भयप्रदायिनि चतुर्भुजे त्रिनेत्रे प्रेतासनोच्चारिणि महाकपालमाला ॥१०६॥
त्रैलोक्योत्पत्तिस्थितिप्रलयकारिणि सहलहीं कंदर्पानन्ददायिनि सहक्ली ब्लूं देउरे रखे सहहौं
स्थित्स्वरूपे पाशांकुशालंकृते

ले कृते चंड्कृतशेखरे त्रिपुरे भुक्तिमुक्तिफलप्रदे ओं ऐं ओं नमः सिद्धं अकारादिपञ्चाशन्मित्यादि
विलोमेन अकारान्ते पञ्चाशद्धं सिमः नओं ऐं ओं सर्वबीजमातः श्री समयिनि मम मनोरथं देहि स्वाहा॥
एवं जपित्वा ऐं ईं सौः श्रीमन्त्रराजाय नमः॥ इति त्रैपुरमन्त्रस्य पूजां विधाय त्रिपुराद्य महाना
म्नात्रये दशमहाविद्याः पूजयेत्॥ तद्यथा॥ ओं ३ ऐं स्हौः सहलह्रीं स्ह्रौं ऐं सहह्रीं सहहूं का
मत्रिपुरायै नमः। ओं ३ ऐं ह्रीं क्लीं हसौः त्रिपुरभैरव्यै नमः॥ ओं ३ ऐं ह्रीं सः वाक्त्रिपुरायै नमः। ओं ३
ऐं ह्रीं श्रीं सौः महालक्ष्म्यै त्रिपुरायै नमः॥ ओं ३ ऐं ह्रीं सौः वह्नित्रिपुरायै नमः। ओं ३ ऐं क्लीं मोहि
न्यै त्रिपुरायै नमः। ओं ३ ऐं क्लीं ब्लूं स्त्रीं भ्रामरी त्रिपुरायै नमः। ओं ३ ऐं ह्रीं श्रीं फ्रें हसौः त्रैलोक्या
स्वामिन्यै त्रिपुरायै नमः। ओं ३ ऐं ओं ओं ऊं हैं ओं ङः हं स्यै त्रिपुरायै नमः।४ ऐं ऐं सौः कौलिकायै त्रिपुरा
यै नमः॥४ ऐं ऐं सौः चण्डिकायै त्रिपुरायै नमः।४ ऐं ऐं सौः तालुमध्यमायै त्रिपुरायै नमः।४ ऐं ऐं सौः
कपालांकुरवासिन्यै त्रिपुरायै ठः ठः नमः ५३ यथाशक्ति जपं विधाय रक्तपुष्पैः स्वशिरसि ऐं ईं सौः

॥१०७॥ आत्मदेहायनमः॥ इति गंधाक्षतैश्च सम्यग्धा संपूज्य कपर्दीपौ निवेद्य तस्मिन्त्रैपुरे देहे
ऐं ईं सौः इति वनिता क्षोभकरीं महाकामकलां ध्यायेत्॥ ततः श्लोकशोन्यासानुसंधानेन
पठेत्॥ तत्र॥ शक्तिरूपमयं देहं मदीयं त्रिपुरे कुरु॥ देहि मे देवदेवेशि नित्यं निस्समं सितं श्री१
॥१॥ मस्तकं मंगलादेवि ललाटं कुलसुंदरी॥ नेत्रयुग्मं महाकाली कर्णौ रक्षतु कुंड
107 ली॥२॥ कपालीकर्णगर्भं तु कपोलौ कमलावती॥ दंतान् रक्षतु चामुंडा चिबुकं मेरुवा
सिनी॥३॥ श्रीमध्यं कंठदेशं च रक्षेन्मे भुवनेश्वरी॥ जिह्वां सरस्वती रक्षेत्तालुके तालु
वासिनी॥४॥ स्थाणु मे कपिला स्कंधे स्कंधौ तु कुलमालिनी॥ कुक्षौ विवीनायकी स्यात्तु ज
यानंदा स्तनद्वये॥५॥ कंठकूपे महालक्ष्मी हृदये चंडभैरवी॥ ब्रह्माणी नाभिदेशे तु स्था
णुज्वालीवली गुदे॥६॥ लिंगे लिंगप्रभा चैव मुंडिनी मेदमंडले॥ नाडीचक्रे महावेगा ड ॥१०८॥
मटा दक्षिणे तोकरे॥७॥ वामहस्ते महामाया विद्या हस्तांगुलीषु च॥ वैष्णवी वामपादे च स्यात्तु

चक्रायुधान्विता ॥८॥ तथा दक्षिणपादांते एकपादा सुरेश्वरी ॥ पादांगुल्लेषु कौबेरी रोमकूपे

महोद्भवा ॥९॥ मंडली नखमूलेषु वाराही मेदमंडले । जलं धरी जलस्थाने कामाक्षी कोम

मध्यगा ॥१०॥ ऊर्द्ध्वा नाभिलिंगाते नासाग्रे पूर्णपीठगा ॥ पृष्ठवंशे जयादेवी अस्थिसंधिषु

चर्चिका ॥११॥ चर्मधारी त्वचायां तु स्यात् नित्यं महापशाः ॥ रक्तमध्ये मनोंते च स्यात्तु मे हं

सिनी शुभा ॥१२॥ महेश्वरी च कौमारी हृद्ये तेस्यात्तु चीगयोः ॥ वामदक्षिणयोश्चैव यीगालि

कटिसंधिषु ॥१३॥ देवी रक्षतु मे गात्रं मस्तकं कुलकामिनी ॥ पृथिव्याप स्तथा तेजो वायुराका

शमेव च ॥१४॥ पंचभूतेषु भूतेशी सदा रक्षतु मे कुलं ॥ राज्ये रक्षतु मे चैंद्री प्रजां चैव प्रजाव

ती ॥१५॥ मायादधातु मे नित्यं धनं धान्यं यशस्तथा ॥ रणे राजकुले चैव शत्रुमध्ये महावने

॥१६॥ रक्षेन्नेत्रा महादेवी करोतु मम चिंतितं ॥ समया समयं रक्षेद्दिव्यां विद्याकुलागमे ॥१७॥

साधकानां जगन्नाथा भुक्तिमुक्तिफलप्रदा ॥ प्राणा करोतु मे सिद्धिं त्रैलोक्यविजयासुखं ॥१८॥

॥११०८॥ घंटाली या महाविद्या सा मे यछतु मंगलं ॥ समकोटिसहस्राणां मंत्राणां नायका तु या ॥१९॥
सा मे सुरेश्वरी देवी ससिद्धिं च प्रयछतु ॥ उल्कामुखी मुखे स्यात् मार्जारी देहसंधिषु ॥२०॥
मध्ये कालीतु या विद्या सा मे स्यात् शिखामय ॥ त्रिकोणं च त्रिधावर्त्तं त्रैपुरं चक्रमुत्तमं ॥२१॥
मस्तके स्यात्तु मे नित्यं तत्स्थाने बहुरूपिणी ॥ पूर्वोक्ता त्रैपुरी शक्तिः स्यात्तु मे मन्मथोत्थिता ॥२२॥
108 क्षोभयंती जगत्सर्वं मदिरानंदविह्वला ॥ निवासं कुरु मे देहे सा प्रवृत्ते दिव्ययोगिनी ॥२३॥
एह्येहि त्वं महादेवी सिद्धियोगिनि मे कुले ॥ शत्रूणां घातनार्थाय जंतूनां भोगदायिनी ॥२४॥
महायोगिनि देहे स्मिन् सर्वदा निलयं कुरु ॥ माहेशी च शिखा स्यात् योनिमध्ये गणेश्वरी ॥२५॥
प्रेतासना सुविख्याता करोतु कुशलं मम ॥ डाकिनी पूर्वभागे च मम सौख्यं प्रयछतु ॥२६॥ ॥११०८॥
साकिनी पश्चिमांगेषु दक्षिणे चापि राक्षसी ॥ वामभागे महामाया करोतु कुशलं मम ॥२७॥
सास्मदीयं शिरः स्यात् सदा तिष्ठतु भैरवी ॥ या विशाला विशालाक्षी निर्मला मलवर्जिता ॥२८॥

सायोगिनी महायोगास्था तु श्री मस्तके मम॥ याकाल कल्पिता काली कालरात्रीति कथ्यते॥ सा
योगिनी महायोगास्था तु श्री मस्तके मम॥२९॥ या निशाचर राजन्य पूजिता च निशाचरी॥
सा योगिनी॥३०॥ या चोर्ध्व केशिका नाम्नी मुक्तकेशी महाभया॥ सा योगिनी॥३१॥ या वीरेति स
माख्याता वीराणां जयदायिनी॥ सा योगिनी॥३२॥ या मालिनि समाख्याता नासाग्रे बिंदु मालि
नी॥ सा योगिनी॥३३॥ या कंकालकराली गीचेउ कंकालेकुंडली॥ सा योगिनी॥३४॥ प्रचंडा
च विरूपाक्षी विरूपा विश्वरूपिणी॥ सा योगिनी॥३५॥ खट्वांगी कथ्यते या चैत्फेत्कारोत्कटा ग(
र्जिताः॥ सा॥३६॥) रौद्री रुद्रेण पूजिता॥ सा योगिनी॥३६॥ कलियोगि प्रसिद्धा च या लो
के श्रूयते कलौ॥ सा॥३७॥ प्रेताक्षी कथ्यते या च फेत्कारोत्कटा गर्जिताः॥ सा॥३८॥ धुम्रा
क्षी या समाख्याता शास्त्रे स्मिन् योगिनीमते॥ सा॥३९॥ घोररूपा महादेवी कथ्यते या कु
लागमे॥ सा॥४०॥ विश्वरूपा विशेषेण करोति च जगत्त्रयं॥ सा॥४१॥ भयंकरी समा

॥१०९॥ दिष्टा या चोक्ता वै कुलागमे ॥ सा० ॥४२॥ कपालमालिका प्रोक्ता या देवी मुंडधारिणी ॥ सा० ॥४३॥
भीषणा भैरवी नाम या देवी भीमविक्रमा ॥ सा० ॥४४॥ न्यग्रोधवासिनी या च कथ्यते च सुरा
र्चिता ॥ सा० ॥४५॥ भैरवी भीवया च भैरवाष्टकवंदिता ॥ सा० ॥४६॥ प्रोच्यते दीर्घलंबोष्ठी म
हामया महाबला ॥ सा० ॥४७॥ खड्गांगी या महाशक्तिः संसारार्णवतारिणी ॥ सा० ॥४८॥
या समस्तेषु मंत्रेषु प्रोच्यते मंत्रवादिनी ॥ सा० ॥४९॥ कालघ्नी कथ्यते या च युगांते पर
मेश्वरी ॥ सा० ॥५०॥ ग्राहिणीति समाख्याता सुरासुरमहोरगैः ॥ सा० ॥५१॥ चक्रिणी
गद्यते या च एकपादा त्रिलोचना ॥ सा० ॥५२॥ या विश्वबाहुका देवी विश्वच्चना स्तुविया स
दा ॥ सा० ॥५३॥ दर्शनेषु समस्तेषु विदिता भुवनेश्वरी ॥ सा० ॥५४॥ कंटकोद्धेदनार्थ
य शास्त्रे या कंटकी स्मृता ॥ सा० ॥५५॥ कल्की कथ्यते या च सप्तहस्ता महाबला ॥
सा० ॥५६॥ संग्रामे या महादेवी महामारीति कथ्यते ॥ सा० ॥५७॥ यमदूतीति विख्या

तायासुरासुरपूजिता॥सा०॥५८॥करालिनीतियादेवीमहामयामहाबली॥सा०॥५९॥
ललिताम्बामहाराज्ञीसर्वेचक्रैकनायकी॥सा०॥६०॥नासाग्रेकोलिनीस्थातुमदनाक्षी
तथामुखे॥व्योमजंघेकपालेचतालुकेचापिहारिता॥६१॥द्राविणीक्षोभिणीचैवस्तंभिनी
मोहिनीतथा॥रौद्रकर्मामहाघोराडामरिश्वरितामति॥६२॥देवीरक्षतुमेगात्रंमस्तकेकुल
नायकी॥भूमिरापस्तथातेजोवायुराकाशमेवच॥६३॥पंचभूतेषुभूतेशीसदारक्षतुमेकु
ले॥राज्यंददातुमेचेंद्रीप्रजांचैवप्रजावती॥६४॥मायाददातुमेनित्येधनंधान्यंयशस्तथा॥
रणेराजकुलेचैवशत्रुमध्येमहार्णवे॥६५॥रक्तनेत्रामहादेवीकरोतुममचिंतितं॥समयासम
येरक्षेद्विद्याविद्याकुलागमे॥६६॥साधकानांजगन्नाथभुक्तिमुक्तिफलप्रदा॥द्विजटीत्रिजटाटी
प्रोक्ताकंदलादवितास्विला॥६७॥गायत्रीचांबिकातारापार्वतीकमलीप्रभा॥मादिनीमदनो
द्रावामंदाशीमदनातुरा॥६८॥भीषणाभीषणीनामप्रेतसिद्धाविभीषणा॥क्षुधार्त्तास्तथा

॥११०॥ निशाकांतिर्वह्निस्तथा द्युतिः ॥ ६९ ॥ संध्या धृती रतिः क्षांतिर्ह्यनिशं परिपठ्यते ॥ सुरनाथे
ति विख्याता नगरे नरदेवता ॥ ७० ॥ ग्रा देवी ह्यधिष्ठात्री पीठे पीठेश्वरीं विदुः ॥ कावेरी नर्मदा चैव गंगे
ति यमुनोच्यते ॥ ७१ ॥ गोदावरी महापुण्या प्रोच्यते चाप्यरुंधती ॥ त्रैलोक्येपि महादेवी स्त्रीना
म्नी या प्रकाशिता ॥ ७२ ॥ सा देवी रूपलक्षे तु स्यात्तु श्री हृदये मम ॥ सुवर्णरेखिनी प्रोक्ता विद्या
110 सा प्रोच्यते किल ॥ ७३ ॥ निर्मूलिनी भुजंगानां सा करोतु सुखं मम ॥ कुरुकुल्लेति विख्याता ताप
क्षिराजमुखोद्भवा ॥ ७४ ॥ या विद्या सा महारूपा जिह्वाग्रे स्यात्तु मे सदा ॥ प्रोंकारिणीति विख्या
ता देहे स्यात्तु सदा मम ॥ ७५ ॥ विघ्नापहारिणी नाम कलिरूपविदारिणी ॥ मेतंडा स्यात्तु मे कंठे
नोतला स्यात्तु मस्तके ॥ ७६ ॥ यथा मूले रेखापि मूले स्यात्तु सदा मम ॥ जांगली विषनाशाय
वाचां सिद्धिं करोतु मे ॥ ७७ ॥ सर्वसिद्धिकरी विद्या भुक्तिमुक्तिफलप्रदा ॥ ७७ ॥ अहं ब्रह्मा अहं
विष्णुरहं देवो महेश्वरः ॥ सर्वभूतनिवासोहं लोके श्रीशक्तिचिंतकः ॥ ७८ ॥ शक्तिन्यासे ॥११०॥

नपूतेनशरीरेण सुरासुराः ॥ प्रदत्तो देशमात्रेण आज्ञां कुर्वंतु मे सदा ॥ ७९ ॥ यत्किंचिद्योगि
नीरूपं त्रैलोक्ये चापि शंकर ॥ तत्सर्वं तिष्ठते देहे शक्तिन्यासे उपासिते ॥ ८० ॥ कामिनी कुरुते
चापि यान्यासं शक्तिनिर्मितं ॥ तां देवीं दिव्यरूपस्थां संसारे त्रिपुरां विदुः ॥ ८१ ॥ नमोस्तु ते जन्मा
तर्नमोस्तु भुवनेश्वरी ॥ नमो भोगप्रदे देवि नमो देवि महेश्वरि ॥ ८२ ॥ प्रकटा गोपिता सर्वा नि
र्वाणा भैरवी शिवा ॥ संभ्रमा विजया हंसा शुभा सा जलदेवता ॥ ८३ ॥ यक्षिणी च डाकन्या च तथा
चाकाशगामिनी ॥ भूचरी चरिता कुंभिः सर्वागमनिवासिनी ॥ ८४ ॥ रंगिणी देवमैत्री च प्रसिद्धा
मदिरालिका ॥ पूजिता सर्वसिध्यर्थं शास्त्रेऽस्मिन्योगिनीमते ॥ ८५ ॥ स्थापिनी कथ्यते सद्भिः
सानंदा वनवासिनी ॥ चतुषष्ठ्या भ्रयादेवी योगिन्यो येन चिंतिताः ॥ ८६ ॥ आधारे लीयमाना सुस
योगी योगविद्भवेत्ता ललाटे मंडलास्थानु विरजास्थानु मस्तके ॥ ८७ ॥ यकाक्षी दक्षिणे स्कंधे वामे
चैव त्रिलोचना ॥ जयंती स्थानु मे कुक्षौ कर्ण्यां कंदर्पकुंडली ॥ ८८ ॥ मालिनी लिंगसंधौ च हृदि स्था

॥१११॥ तुसमाधिनी ॥ अंबिका पृष्ठवंशे च पार्श्वयोस्स्यातु मेदिनी ॥ ८९ ॥ दिग्गजोंतीतरागेश्च नागेंद्री
नखसंधिषु ॥ व्याघ्री च कौ च जंघायां स्यातु पादतले मही ॥ ९० ॥ उपमृताशोखिनी रंध्रे लोचने
च विलासिनी ॥ कालिंदी मूलजिह्वांच रक्तौ रक्षतु रक्तिनी ॥ ९१ ॥ लोगलीजो गले रक्षेदस्थि
नीचास्थिसंधिषु ॥ मज्जिनी देहमज्जां तु शुक्रे शुक्रेश्वरी तथा ॥ ९२ ॥ त्वंच रक्षतु वेताली मम रोग
प्रनाशिनी ॥ उड्डया कुरुते शांतिं सदैव मम विग्रहे ॥ ९३ ॥ पादापादतले स्यातु पार्थि रक्षतु पंचपिह
नी ॥ चौराग्निराजसर्पेभ्यो भयं रक्षतु भैरवी ॥ ९४ ॥ दुष्टानां दृष्टिबंधं तु करोतु बंधिनी सदा ॥
चापेटी नाम या विद्या सा मे करोतु मंगलं ॥ ९५ ॥ [illegible]म मर्कटी घंटकर्णी च हनुमंती चरावणी ॥
घुर्घुरी कीर्तिविख्याता वंदे विद्याचतुष्टयं ॥ ९६ ॥ चेटकाख्यानदा विद्या कौमारी चरणे वली ॥
विघ्नराजस्तु तानामच तुष्टा संतानरूपिणी ॥ ९७ ॥ मूलीकाशास्थिता हंसी पातकी दलनोद्धता ॥
दशौता मंत्रविद्यास्तु तिष्ठंतु मम मस्तके ॥ ९८ ॥ श्रुभामे ग्रतः स्यातु लोहिता स्यातु दक्षिणे ॥ ॥१११॥

वामांगे रतिकाले च पश्चिमे स्यात्तु शंखली ॥९९॥ शिखायां शंखिनी रक्षेद्धस्त्रे वस्त्रवती शुभा ॥
कवचे कवचांगी च नेत्रे नेत्रकृतोत्सवा ॥१००॥ तिष्ठंति योगिनीरूपास्त्रैलोक्ये सचराचरे ॥
योगिन्यो यास्तु ताः सर्वांगे हि कुर्वंतु मे वपुः ॥१०१॥ पुत्राणां च तथा देयं भक्तानां च विशेषतः ॥
शक्तिन्यासमिदं देयं न देयं यस्य कस्यचित् ॥१०२॥ मनुष्याणां महीलोके चिंतितार्थफलप्रदं ॥
यः करोति महान्यासं षोढान्यासादिकं प्रभो ॥१०३॥ स जीवन्न् शक्तिरूपो वै त्रैलोक्योन्मूल
नक्षमः ॥ शक्तिन्यासकृते जीवे यः कश्चिद्भेदको भवेत् ॥१०४॥ कर्मणा मनसा वाचा तस्य
तापो भविष्यति ॥ शक्तिन्यासमिदं प्रोक्तं तुभ्यं शंकर मे प्रिये ॥१०५॥ येन देहनियुक्तेन शक्ति
तुल्यो नरो भवेत् ॥ कुपितः कुरुते योगी त्रैलोक्यस्यापि पातनं ॥१०६॥ शक्तिन्यासयुतो वी
रो नमस्कारेण शंकर ॥ स्फोटनं कुरुते साक्षात्पाषाणप्रतिमादिषु ॥१०७॥ ॥ इति शक्तिन्यासः ॥
अथ श्रीषोडशार्णमूलविद्यान्यासः ॥ तत्र मंत्रवर्णैर्न्योऽमृते स्रवंती तेनामृतेन नि
जशरीरमाप्लावयंतीं दीपाकारां ब्रह्मरंध्रस्थां महासौभाग्यदां श्रीविद्यां ध्यात्वा

॥११२॥ दक्षहस्तस्य मध्यमानामिकाभ्यां ब्रह्मरंध्रे प्रणववित्तारादिनमोंतां मूलविद्यां न्यसेत् ॥१॥
पुनस्तां मुद्रामुच्चार्य वामहस्तेन सौभाग्यदण्डिनीमुद्रां बध्वा वामकर्णप्रदेशे ओं आमथित्वा
महत्सौभाग्यं मे देहि परसौभाग्यं दण्डयामीति वामांगदेशे मूर्द्धादिपादांतं विद्यां तथै
वन्यसेत् ॥२॥ वामे मुष्टिं दृढं बध्वा तर्जनीं प्रविसारयेत् ॥ अंगमध्ये वामकर्णं तं मुद्रा
112 सौभाग्यदण्डिनी ॥१॥ तथैव पुनस्तां मुद्रामुच्चार्य ममशत्रून्निगृह्णामीति मन्त्रं रिपुजिह्वा
ग्रहां मुद्रां दर्शयन् पादमूले न्यसेत् ॥३॥ अंगु[redacted]गर्भितं मुष्टिं बध्नीयाद्दक्षपाणिना ॥
रिपुजिह्वाग्रहाख्येयं मुद्रा शत्रुनाशिनी ॥१॥ तथैव तां मुद्रामुच्चार्य त्रैलोक्यस्याहं कर्त्ते
ति ध्यायंस्त्रिखंडामुद्रया ललाटे तिलकेह्वेनन्यसेत् ॥४॥ तथैव तां मुद्रामुच्चार्य वदने
वेष्टनत्वेन विन्यसेत् ॥५॥ तथैव तां ॐ दक्षिणकर्णादि वामकर्णांतं वेष्टनत्वेन मुखे
विन्यसेत् ॥६॥ पुनस्तथैव तां ॐ कंठादि मुखांतं विन्यसेत् ॥७॥ पुनस्तथैव तां ॐ ॥ ॥११२॥

वामपाणिना ५

प्रणवसंपुटितामापांतलं ॥८॥ मस्तकात्पादादिहृदयांतं च विन्यसेत् ॥९॥ योनिमुद्रां ब
द्ध्वा मूलविद्यया मुखे क्षिप्त्वा ॥१०॥ तथैव प्रणमेत् ॥११॥ इति श्रीविद्यापूर्णजगद्वशी
करन्यासः ॥ अथ संमोहनन्यासः ॥ तत्र श्रीबोउशार्णां स्मरन् देवीकां सात्रैलोक्यम
रुणवर्तां ध्यायन् अनामिकां मूर्द्धानं परितो भ्रामयित्वा विन्यसेत् ॥१॥ श्रीबोउशार्णां तारादि
नमोंतामंगुष्ठानामिकाभ्यां ब्रह्मरंध्रे विन्यसेत् ॥२॥ मणिबंधयद्ये पृथक् ॥ विन्यसेत् ॥४॥
ललाटे च अनामिकेन विन्यसेत् ॥५॥ इति संमोहनन्यासः ॥ अथ श्रीबोउशार्णाव तोः
संहारन्यासः ॥ तत्र पादयोः ४ प्रथमबीजेन नमः ॥ जंघयोः ४ द्वितीयेन नमः ॥ जान्वोः ४ तृतीयं
नमः ॥ कट्योः ४ चतुर्थेन नमः ॥ लिंगे ४ पंचमं नमः ॥ पृष्ठे ४ षष्ठं नमः ॥ नाभौ ४ सप्तमं ॥ पार्श्वयोः ४
अष्टमं ॥ स्तनयोः ४ नवमं ॥ अंसयोः ४ दशमं ॥ कर्णयोः ४ एकादशं ॥ ब्रह्मरंध्रे ४ द्वादशं ॥
वदने ४ त्रयोदशं ॥ लिंगे ४ चतुर्दशं ॥ कर्णशष्कुल्योः समिपे ४ पंचदशं ॥ कर्णवेष्टनयोः ४

॥११३॥ षोडशं बीजं नमः॥ इति षोडशार्णैः संहारन्यासः॥ अथ षोडशार्णैः सृष्टिन्यासः॥ तत्र ब्रह्मरंध्रे ४
प्रथमं बीजं नमः॥ ललाटे ४ द्वितीयं॥ नेत्रयोः ४ तृतीयं॥ कर्णयोः ४ चतुर्थं॥ घ्राणयोः ४ पंचमं॥
ओष्ठयोः ४ षष्ठं॥ दंतांतरयोः ४ सप्तमं॥ दंतोर्ध्वे ४ अष्टमं॥ जिह्वायां ४ नवमं॥ मुखांतरे ४ दशमं॥
पृष्ठे ४ एकादशं॥ सर्वांगे ४ द्वादशं॥ हृदये ४ त्रयोदशं॥ स्तनयोः ४ चतुर्दशं॥ कुक्षौ ४ पंचदशं॥ लिंगे ४
113 षोडशं बीजं नमः॥ इति वर्णान्विन्यस्य समस्तषोडशार्णविद्यया व्यापकं विन्यसेत्॥ इति सृष्टि
स्थि न्यासः॥ अथ स्थितिन्यासस्तदर्णैः॥ तत्र करद्वयांगुष्ठयोः ४ प्रथमं बीजं नमः॥ एवं तर्जन्योः ४
द्वितीयं॥ मध्यमयोः ४ तृतीयं॥ अनामिकयोः ४ चतुर्थं॥ कनिष्ठयोः ४ पंचमं॥ ब्रह्मरंध्रे ४ षष्ठं॥ मुखे ४
सप्तमं॥ हृदि ४ अष्टमं॥ नाभ्यादिपादांतं ४ नवमं॥ केशादिनाभ्यंतं ४ दशमं॥ ब्रह्मरंध्रादिकंठांतं ४
एकादशं॥ पादांगुष्ठयोः ४ द्वादशं॥ तर्जन्योः ४ त्रयोदशं॥ तन्मध्यमयोः ४ चतुर्दशं॥ तदनामयोः ४
पंचदशं॥ तत्कनिष्ठयोः ४ षोडशं बीजं नमः॥ इति स्थितिन्यासः॥ अथ श्रीषोडशार्णायाः
पंचविधवर्णन्यासः॥ ११३

त्रशिरसि४प्रथमंबीजंनमः॥एवंमुखे४द्वितीयंनमः॥दक्षनेत्रे४तृतीयं।वामनेत्रे४चतुर्थं
दक्षकर्णे४पंचमं।वामकर्णे४षष्ठं।दक्षनासापुटे४सप्तमं।वामनासापुटे४अष्टमं।दक्षगंडे४
नवमं।वामगंडे४दशमं।ओष्ठे४एकादशं।अधरे४द्वादशं।मुखाभ्यंतरे४त्रयोदशं।ऊर्ध्वदंते४
चतुर्दशं।अधोदंते४पंचदशं।वदने४षोडशंबीजंनमः॥इत्येकःप्रकारः॥तत्रसिरसि४प्रथमं
बीजंनमः।सीमंते४द्वितीयं।भाले४तृतीयं।हृदये४चतुर्थं।नासायां४पंचमं।वदने४षष्ठं।
दक्षबाहुमूले४सप्तमं।तन्मध्यसंधौ४अष्टमं।तन्मणिबंधे४नवमं।तदंगुलिमूले४दशमं।
तदग्रे४एकादशं।वामबाहुमूले४द्वादशमं॥तन्मध्ये४त्रयोदशं।तन्मणिबंधे४चतुर्दशं।तदं
गुलिमूले४पंचदशं।तदग्रे४षोडशंबीजंनमः॥इतिद्वितीयःप्रकारः।ततः।शिरसि४प्रथमं।एवं
ललाटे४द्वितीयं।दक्षनेत्रे४तृतीयं।वामने४चतुर्थं।मुखे४पंचमं।जिह्वाग्रे४षष्ठं।दक्षोरुमूले४
सप्तमं।जानुनि४अष्टमं॥तद्गुल्फे४नवमं।तदंगुलिमूले४दशमंतदंगुल्यग्रे४एकादशं॥वामो

स्मूले ४ द्वादशं। तज्जानुनि ४ त्रयोदशं। तद्गुल्फे ४ चतुर्दशं। तदंगुलिमूले ४ पंचदशं। तदंगुल्य
ग्रे षोडशं बीजं नमः॥ इति तृतीयप्रकारः॥ तत्र शिरसि ४ प्रथमं। मुखवृत्ते द्वितीयं। दक्षनेत्रे ४
तृतीयं। वामे ४ चतुर्थं। दक्षकर्णे ४ पंचमं। वामकर्णे ४ षष्ठं। दक्षघ्राणे ४ सप्तमं। वामघ्राणे ४
अष्टमं। दक्षगंडे ४ नवमं। वामगंडे ४ दशमं। ओष्ठे ४ एकादशं। अधरे ४ द्वादशं। ऊर्ध्वदंते ४ त्रयो
दशं। अधोदंते ४ चतुर्दशं। मूर्ध्नि ४ पंचदशं। जिह्वायां ४ षोडशं नमः॥ इति चतुर्थप्रकारः॥ अथ
ललाटे ४ प्रथमं। गले ४ द्वितीयं। हृदि ४ तृतीयं। नाभौ ४ चतुर्थं। मूलाधारे ४ पंचमं। ब्रह्मरंध्रे ४
षष्ठं। हृदि ४ सप्तमं। मूलाधारे ४ अष्टमं। पुनर्मूलाधारे नवमं॥ हृदि ४ दशमं। ब्रह्मरंध्रे ४ एका
दशं। दक्षकरतले ४ द्वादशं। वामकरतले ४ त्रयोदशं। दक्षपादे चतुर्दशं। वामपादे ४ पंचदशं।
हृदये ४ षोडशं नमः॥ इति पंचमप्रकारः॥ इत्थं न्यासं विधायेत्र ताव संपुटितां श्रीषोडशार्णां
सर्वांगे व्यापकत्वेन विन्यस्य पुनस्तथाविधां तां विद्यां हृदये न्यसेत्॥ एते न्यासाः षोडशार्णो

114

पासकै रेवकार्यः। नान्यैरिति गुरुशासनं॥ इति करशुध्यादयो न्यासाः॥ श्रीविद्यानंद
नाथेन शिवयोः प्रियसूनुना॥ कृते सौभाग्यरत्नाब्धौ तरंगो नवमोऽगमत्॥१॥ ॥इति
श्रीसच्चिदानंदनाथचरणारविंदद्वंद्वांतेवासिना श्रीश्रीविद्यानंदनाथेन विरचिते सौ
भाग्यरत्नाकरे नवमस्तरंगः॥९॥ ॥अथोर्ध्वाम्नायन्यासः॥ सच त्रिविधाः॥ महा
षोढान्यासः। शांभवचरणादिषोडशमूलविद्याषडाधारमूलविद्यान्यासः। षडन्वयशांभव
न्यासश्चेति॥ तत्र परप्रासादेनोर्ध्वाम्नायदीक्षितानां महाषोढान्यासमात्रेऽप्यधिकारः॥
चरणादिविद्यादीक्षितानां तदादिन्यासेष्वेवाधिकारः। न तु माहाषोढान्यासे। उभयवि
धदीक्षितानां सर्वत्रैवाधिकार इति॥ तत्रादौ महाषोढान्यासः तत्र अस्य श्रीमहाषो
ढान्यासस्य ब्रह्माऋषिः जगतीछंदः। श्रीमदर्द्धनारीश्वरदेवता श्रीविद्यांगत्वेन न्यासे वि
नियोगः। इति ऋष्यादिकं स्वस्वस्थानमूर्द्धादिषु विन्यस्य। अंगन्यासं कुर्यात्॥ अंगन्यासात्तु

मुखे ४।२ हैं तत्पुरुषाय ०। हृदये ४।२ हुं अघोराय नमः। गुह्ये ४।२ हिं वामदेवाय नमः।
पादयोः ४।२ हं सद्योजाताय नमः ॥२॥

॥११५॥ अंगुली देह वक्त्रात्मकः॥ तत्रादावंगुलिन्यासः। तत्रांगुष्ठयोः। ओं ऐं ह्रीं श्रीं हसौः स्हौः हों
ईशानाय नमः॥ तर्जन्योः ४।२ हैं तत्पुरुषाय नमः। मध्यमयोः ४।२ हुं अघोराय नमः। अ-
नामिकयोः ४।२ हीं वामदेवाय नमः। कनिष्ठिकयोः ४।२ हं सद्योजाताय नमः॥१॥ मूर्ध्नि ४।२
हों ईशानाय नमः॥ मूर्ध्नि ४।२ हों ईशानाय ऊर्ध्ववक्त्राय नमः। मुखे ४।२ हैं तत्पुरुषाय
पूर्ववक्त्राय नमः दक्षकर्णे ४।२ हुं अघोराय दक्षिणवक्त्राय ०। वामकर्णे ४।२ हीं वामदेवा-
योत्तरवक्त्राय नमः। चोरकूपे ४।२ हं सद्योजाताय पश्चिमवक्त्राय नमः। इति अंगन्यासः॥
पुनः पतः ५ ह्स्क्लीं टां इत्यादि प्राग्वत् करषडंग वक्त्रन्यासान् कृत्वा ब्रह्मरंध्रे पुनर्देवदेव्यौ ध्यात्वा

N १४०॥ सिरश्चितेपरितःषट्कोणं विभाव्य तस्य पश्चिमकोणोरश्मि मिथुनचतुष्कं पीतवर्णं ध्यात्वा प
लं संसानंदनाथ निवृत्तिपराम्बा लं प श्री०॥ लं वामानंदनाथ श्रीपराम्बा लं प श्री०॥५ लं अ
घोरानंदनाथ पद्मापराम्बा लं प श्री०॥५ लं पुरुषानंदनाथ अंबिकापराम्बा लं प श्री०॥ ततः वाय
व्यकोणोरश्मि मिथुनचतुष्कं श्यामवर्णं ध्यात्वा प वं अनंतानंदनाथ निवृत्तिपराम्बा वं प श्री०॥५
वं अनाथानंदनाथ प्रतिष्ठापराम्बा वं प श्री०॥५ वं अनाश्रितानंदनाथ विद्यापराम्बा वं श्री०॥५
१५० वं अचिंत्यानंदनाथ शांतिपराम्बा वं प श्री०॥ ततईशानकोणे मिथुनषट्कं रक्तवर्णं ध्यात्वा प
रं खेचरानंदनाथ क्षमापराम्बा प श्री०॥५ रं तीव्रानंदनाथ गंगापराम्बा रं प श्री०॥५ रं महिषवाहा
नंदनाथ सरस्वतीपराम्बा रं प श्री०॥५ रं ज्वालेश्वरानंदनाथ यमुनापराम्बा रं प श्री०॥५ रं च्यवबु
वाहानंदनाथ कमलीपराम्बा रं प श्री०॥५ रं तेजीशानंदनाथ पार्वतीपराम्बा रं प श्री०॥ ततः पूर्वकोणे
वि मिथुनचतुष्कं शुभ्रवर्णं ध्यात्वा प यं घोरवागीश्वरानंदनाथ चित्रापराम्बा यं प श्री०॥५ यं चेतुर्वि
घ्नेश्वरानंदनाथ कमलापराम्बा यं प श्री०॥५ यं उमागंगेश्वरानंदनाथ मन्मथवेगापराम्बा यं प श्री०॥५

यं श्रीक्षेमेश्वरानंदनाथ रसापरांबा यं पश्री०॥ ततः आग्नेयकोणे मिथुनपंचकं शुक्लवर्णं ध्यात्वा ५
हं श्रीकंठानंदनाथ लेयापरांबा हं पश्री०॥५ हं अनंतानंदनाथ वसंतापरांबा हं पश्री०॥५ हं शंकरा
नंदनाथ रत्नमेखलापरांबा हं पश्री०॥५ हं पिंगलानंदनाथ यशोवतीपरांबा हं पश्री०॥५ हं सदाख्या
नंदनाथ हंसापरांबा हं पश्री०॥ ततो नैरृत्यकोणे मिथुनत्रयं रक्तवर्णं ध्यात्वा ५ सं परदिव्यौघा
नंदनाथ वामापरांबा सं पश्री०॥५ सं परदिव्यौघानंदनाथ ज्येष्ठापरांबा सं पश्री०॥५ सं पीठौघा
नंदनाथ रौद्रीपरांबा सं पश्री०॥ ततः मध्ये देवदेव्योरेकं विग्रहं तौ मानसैरुपचारैः संपूज्य
तन्मयं स्वात्मानं ध्यायेदित्यापद्वीपेश्वरक्रमः॥ अथ पार्थिवनवात्मेश्वरक्रमः॥ तत्र मूलाधारे
ह स क्ष म ल व र यूं इति नवात्मेश्वरकूटं रक्तवर्णं ध्यात्वा तदुद्भवं देवं भिन्नांजनचयप्रभं पंचव
क्त्रं त्रिनेत्रं दशचरणं दशभुजं शूलचक्रध्वजवरब्रह्मकपालीनि पारिजातपुष्पजपमालापु
स्तकाभयटंकाश्व दक्षवामयोर्दधानं दंष्ट्राकरालं वेषविशेषाय बद्धोर्ध्वकेशं षोडशवार्षिकं
रत्नेन सर्पास्थिभूषितं ब्रह्मप्रेतासनस्थं नवात्मेश्वरं स्वात्मेदेन ध्यात्वा तद्बीजाक्षरैः स्वांगन्यासं

॥१४१॥ कुर्यात्॥तद्यथा॥कनिष्ठयोः५ ह्सं५हृदयाय नमः॥अनामयोः५ ह्रैं मं५शिरसे स्वाहा॥मध्यमयोः५
लं वं५शिखायै वषट्॥तर्जन्योः५ रं यं५कवचाय हुं॥अंगुष्ठयोः५ क्षं५नेत्राय वौषट्॥करतलकर
पृष्ठयोः५ अं५अस्त्राय फट्॥इति करन्यासः॥एतैरेव मंत्रैः प्राग्वत् षडंगवक्त्रन्यासौ कुर्यात्॥ततो
देवीमंत्रस्य सप्तमबीजं ह्स्क्रौं इति चतुर्थप्रणवात्मकं कूटं मूलाधारे रक्तवर्णां ध्यात्वा तदुद्भूतां
141 देवीं नीलवर्णां कुब्जरूपां पश्चिमोत्तरदक्षिणपूर्वेशानोर्ध्वगत पीतशुक्ल[illegible]धूम्ररक्त
वर्णषडाननां द्वादशभुजां शूलचक्रवज्रांकुशशरकर्त्तरीः सपंकजनीलोत्पलं समुण्डखड्गं घंटां
पुस्तकं धनुः कपालं च दक्षवामेषु करेषु दधानां प्रतिमुखं दंष्ट्राकरालां सर्पास्थिरत्नभूषितां
मुण्डमालाधरां रौद्ररूपामष्टाविंशतिवर्षीयां बद्धोर्ध्वकेशीं व्याघ्रचर्मपरीधानां सिंहचर्मोत्तरीयां
दिव्याभरणभूषितां महादृहासां ब्रह्मप्रेतासनस्थां देवीं स्वाभेदेन ध्यात्वा कनिष्ठयोः५ ह्स्क्रौं नमो भ
गवती कमलायै ह्सफ्रां५हृदयाय नमः॥अनामिकयोः५ ह्स्फ्रीं कुब्जिकायै कुलदीपिकायै ह्स्फ्रीं५
सिरसे स्वाहा॥मध्यमयोः५ ह्स्फ्रूं ह्रां ह्रूं ह्रीं बर्बरायै ह्स्क्रूं५शिखायै वषट्॥तर्जन्योः५ ह्स्क्रैं उं अत

नमेऽअघोरमुखीबहुरूपायैह्स्रैं पकवचायहुं ॥ अं गुष्ठयोः ५ ह्स्रौं घ्रां छ्रूं क्लीं महातारायैह्स्रौं ५ नेत्रायवौषट् ॥ करतलपृष्ठयोः ५ ह्स्रः किलि किलि विलि विलि विच्चे ह्स्रः ५ अस्त्रायफट् ॥ एवंप्राग्वत्षडंगवज्रन्यासौ कृत्वा देवीतेजोरूपां मूलादिब्रह्मरंध्रांते ध्यात्वा देवेन संयोज्य देवदेवीरूपमात्मानं ध्यायन् पंचप्रेतवपुष्टितेहं सक्षमलवरयां ह्स्रौं इत्यादि षट्दीर्घजनितैर्बीजहृदयस्यषड्भिर्मंत्रैः करषडंगवज्रन्यासान्विधाय मूलाधारे देवदेव्यौ ध्यात्वा ५ [illegible] शिरःपीठे च रत्नाह्वयमध्ये पि पुनर्देवदेव्यौ ध्यात्वा तौ परितः षट्कोणं विभाव्य तस्य वायव्यकोणे मिथुनचतुष्कं पीतवर्णं ध्यात्वा ५ लमयरूं ओड्याणमहापीठ उड्डेश्वरानंदनाथ उड्डेश्वरीपरांबा लमयरूं ५ श्री ॥ वमयरूं जालंधरमहापीठ जालेश्वरानंदनाथ जालेश्वरीपरांबा वमयरूं ५ श्री ॥ ५ रमयरूं पूर्णगिरिमाहापीठ पूर्णेश्वरानंदनाथ पूर्णेश्वरीपरांबा रमयरूं ५ श्री ॥ ५ यमयरूं कामरूपमहापीठ कामेश्वरानंदनाथ कामेश्वरीपरांबा यमयरूं ५ श्री ॥ ततईशानकोणे मिथुनपंचकं श्यामं ध्यात्वा ५ ग्लूं श्रीकंठानंदनाथ गगनापरांबा ग्लूं ५ श्री ॥ ५ स्लूं अनंतानंदनाथ

142

॥१४२॥ स्वर्गापरांबा स्लूं प श्री० ॥ प म्लूं शोकरानंदनाथ मर्त्यापरांबा म्लूं प श्री० ॥ प प्लूं पिंगलानंदनाथ पाताल
परांबा प्लूं प श्री० ॥ प न्लूं सद्योजातानंदनाथ नागापरांबा न्लूं प श्री० ॥ अथ पूर्वकोणे मिथुनषट्कं
हृत्स्थवर्ति ध्यात्वा प डं मयरूं आनंदानंदनाथ डाकिनीपरांबा डं मयरूं प श्री० ॥ प रं मयरूं आव
ल्यानंदनाथ राकिनीपरांबा रं मयरूं प श्री० ॥ प लं मयरूं प्रज्ञानंदनाथ लाकिनीपरांबा लं मय
रूं प श्री० ॥ प कं मयरूं योगानंदनाथ काकिनीपरांबा कं मयरूं प श्री० प सं मयरूं अतीतानंद
नाथ साकिनीपरांबा सं मयरूं प श्री० ॥ प हं मयरूं पादानंदनाथ हाकिनीपरांबा हं मयरूं प श्री० ॥
ततो ग्निकोणे मिथुनचतुष्कं रक्तवर्ति ध्यात्वा प लं आधाराशीशानंदनाथ रक्तापरांबा लं प
श्री० ॥ प वं चक्रीशानंदनाथ चेडीपरांबा वं प श्री० ॥ रं कुरंगीशानंदनाथ करालापरांबा रं प श्री० ॥ प
यं मदं घ्रीशानंदनाथ महोच्छुष्मापरांबा यं प श्री० ॥ ततो नैर्ऋतिकोणे मिथुनपंचकं कृष्णवर्ति
ध्यात्वा प गं विमलानंदनाथ मातंगीपरांबा गं प श्री० ॥ प सं सर्वज्ञविमलानंदनाथ पुलिंदीपरांबा
सं प श्री० ॥ प मं योगविमलानंदनाथ शबरीपरांबा मं प श्री० ॥ प पं सिद्धविमलानंदनाथ

चंपकपरांबापं पश्रीपा॥५ नेत्रमया विमलानंदनाथकुलाक्किकापरांबानं पश्रीपा॥ ततः प
श्चिमकोणे मिथुनचतुष्कं सूर्यपत्रं मे ध्यात्वा प लेमयरूं मित्रीशानंदनाथकुलक्लिकापरांबाल
मयरूं पश्रीपा॥५ वमयरूं उड्डीशानंदनाथलेखीपरांबां वमयरूं पश्रीपा॥५ रमयरूं षष्ठीशा
नंदनाथकुलेश्वरीपरांबां रमयरूं पश्रीपा॥५ यमयरूं चर्यानंदनाथकुलेश्वरीपरांबा यमय
रूं पश्रीपा॥ इति षडन्वयशांभवरश्मिक्रमः॥ ॥अत्र षडन्वयरश्मयः सर्वे वराभयकरा
मदाघूर्णितलोचना ध्येयाः॥ ततो मध्ये देवदेव्योरेकविधयातो मानसैरूपचारैः संपूज्य
तदात्मानं मात्मानं ध्यात्वा षडन्वयशांभवाधिदेवता श्रीमहात्रिपुरसुंदरीरूपं निजवपु
ज्योतिर्मयं ध्यायेदिति शांभवाख्योर्ध्वाम्नायन्यासः॥ ॥श्रीविद्यानंदनाथेन शिवयोः
प्रियसूनुना॥ कृते सौभाग्यरत्नाकरे द्वादशे स्तरंगे॥१२॥ द्वादशोगमत्॥१॥ ॥इति श्री
सच्चिदानंदनाथचरणारविंदद्वंद्वान्तेवासिना श्रीश्रीविद्यानंदनाथेन विरचिते सौभाग्य
रत्नाकरे द्वादशस्तरंगः॥१२॥

॥१४३॥ इत्थं षट्सु तर त्रिंशतशोभवरश्मीन्विन्यस्य मूलाधाराद्याज्ञापर्यंतेषु पृथिव्यादिमानसांते
षु षट्सु चक्रेषु शांभवादिभ्यः स्फारतरायाः श्रीविद्यायाः षट्सुत्तरं त्रिंशतं रश्मीन्मनसाभा
वयन्न्यसेत्॥ तत्र मूलाधारे पार्थिवचक्रे मूलविद्यां तेजोरूपां विभाव्य पुनर्मूलादि ब्रह्म
रंध्रांतं तथैव ध्यात्वा ब्रह्मरंध्रे चरणद्वयमध्ये लयं नीत्वा चरणद्वयसामरस्यरूपनि
143 र्वाणचरणोद्भवानंदतेजोमयीं ध्यानोक्तरूपां श्रीमहात्रिपुरसुंदरीं ध्यात्वा आज्ञाचक्रे स
मानीय तत्र मानसदेवतापरेश्वरपरेश्वरीरूपत्वेन ध्यात्वा पंचतारसंपुटितमूलवि
द्यामुच्चार्य परेश्वरपरेश्वरीरूपं श्रीमहात्रिपुरसुंदरीश्रीपादुकां पूजयामीति मंत्रेण मा १४३
नसैरुपचारैः संपूज्य पुनस्तन्मिथुनमेव सकामेश्वरश्रीमहात्रिपुरसुंदरीरूपेण ध्या
त्वा केवलमूलविद्यया संपूज्य पुनः कंठविशुद्धिचक्रे मानीय तत्र तद्देवतात्मकत्वेन ध्यात्वा
पूर्ववत्संपूज्य अनाहतचक्रे नीत्वा तत्रापि तद्देवतारूपेण ध्यात्वा मानसैरुपचारैः संपूज्य॥

ध्यात्वा मानसैरुपचारैः संपूज्य॥ ततः स्वाधिष्ठानचक्रं नित्वा तत्रापि तथैव ध्यात्वा संपूज्य
पुनर्मणिपूरकचक्रं नीत्वा तत्रापि तथैव ध्यात्वा संपूज्य ततो मूलाधारचक्रं नीत्वा तत्रापि
तथैव ध्यात्वा संपूज्य पार्थिवचक्राधिदेवतायाः श्रीमहात्रिपुरसुंदर्याः स्तनुसंभवाः षट्
पंचाशद्देवताः पार्थिवचक्रे मनसा भावयन् न्यसेत्॥ तद्यथा॥ मूलाधारे चतुरस्रं पीत
वर्तं लं बीजयुक्तं अष्टवज्रोपेतं पृथिवीमंडलं ध्यात्वा तत्र षट्पंचाशद्दलमंडितं सरोरुहं
विचिंत्य तन्मध्ये देवीं ध्यायन् पूर्वदलादि प्रादक्षिण्येनो वाममेणिभूषितान् मूलदेवीवर्ण
न् चतुर्भुजां स्त्रिपुरसुंदर्यादि चर्यानाथांतान् षट्पंचाशद्रश्मीन् भावयन् न्यसेत्॥ ऐं ह्रीं
श्रीं त्रिपुरसुंदरी श्रीपादुकां पूजयामि नमः॥४ त्रिपुरसुंदर श्री०॥४ हृदये देवी श्री०॥४ हृदयदेव
श्री०॥४ शिरो देवी श्री०॥४ शिरो देव श्री०॥४ शिखा देवी श्री०॥४ शिखा देव श्री०॥४ कवच देवी
श्री०॥४ कवच देव श्री०॥४ नेत्र देवी श्री०॥४ नेत्र देव श्री०॥४ अस्त्र देवी श्री०॥४ अस्त्र देव श्री०॥४

॥१४४॥ कामेश्वरीश्री०॥४ कामेश्वरश्री०॥४ भगमालिनीश्री०४ भगमालीश्री०॥४ नित्यक्लि-
न्नाश्री०४ नित्यक्लिन्नश्री०४ भेरुण्डाश्री०४ भेरुण्डश्री०॥४ वह्निवासिनीश्री०४ वह्निवासी
श्री०॥४ महावज्रेश्वरीश्री०४ महावज्रेश्वरश्री०॥४ शिवदूतीश्री०॥४ शिवदूतश्री०॥४
त्वरिताश्री०॥४ त्वरितश्री०॥४ कुलसुंदरीश्री०॥४ सर्वमंगलेश्री०॥४ ज्वालामालिनीश्री०॥४
ज्वालामालीश्री०॥४ चित्राश्री०॥४ चित्रश्री०॥४ महानित्याश्री०॥४ महानित्यश्री०॥४ परेश्वरीश्री०॥४
परेश्वरश्री०॥४ मित्रीशमयीश्री०॥४ मित्रीशमयश्री०॥४ षष्ठीशमयीश्री०॥४ षष्ठीशमयश्री०॥४ उड्डीशमयी
श्री०॥४ उड्डीशमयश्री०॥४ चर्यानाथमयीश्री०॥४ चर्यानाथमयश्री०॥ इति पार्थिवरश्मीन्मनसा विस्य
मणिपूरकचक्रे जलमंडले शुक्लवर्णे त्र्यर्द्धचंद्राकारं वं बीजयुक्तं पद्मलांछितं ध्यात्वा तन्मध्ये द्विपंचा
शद्दलमंडितं पद्मं विभाव्य तत्कर्णिकायां श्रीमहात्रिपुरसुंदरीं ध्यायन् जलचक्रेश्वर्यात्तिस्या देहो
द्भूतास्तत्समानरूपाश्चतुर्भुजा लोपामुद्रामय्यादि महेश्वरांतां द्विपंचाशद्देवता पूर्वदलादि प्रादक्षि
ण्येन मनसान्यसेत् ॥ तद्यथा ॥४ लोपामुद्रामयीश्री०॥४ लोपामुद्रमयश्री०॥४ अगस्त्यमयीश्री०॥४
१४४

अगस्त्यमयश्री॥१॥४कालतापनमयीश्री॥१॥४कालतापनमयश्री॥१॥४धर्माचार्यमयीश्री॥१॥४धर्मा
चार्यमयश्री॥१॥४मुक्तकेशीश्वरमयीश्री॥१॥४मुक्तकेशीश्वरमयश्री॥१॥४दीपकलानाथमयीश्री॥१॥४
दीपकलानाथमयश्री॥१॥४विष्णुदेवमयीश्री॥१॥४विष्णुदेवमयश्री॥१॥४प्रभाकरदेवमयीश्री॥१॥४
प्रभाकरदेवमयश्री॥१॥४तेजोदेवमयीश्री॥१॥४तेजोदेवमयश्री॥१॥४मनोजदेवमयीश्री॥१॥४मनोज
देवमयश्री॥१॥४कल्याणदेवमयीश्री॥१॥४कल्याणदेवमयश्री॥१॥४श्री॥१॥४रत्नदेवमयीश्री॥१॥४
रत्नदेवमयश्री॥१॥वासुदेवमयीश्री॥१॥४वासुदेवमयश्री॥१॥४श्रीरामानंदमयीश्री॥१॥४
श्रीरामानंदमयश्री॥१॥४अणिमासिद्धिश्री॥१॥४अणिमासिद्धश्री॥१॥४लघिमासिद्धिश्री॥१॥४लघिमा
सिद्धश्री॥१॥४महिमासिद्धिश्री॥१॥४महिमासिद्धश्री॥१॥ईशत्वसिद्धिश्री॥१॥४ईशित्वसिद्धश्री॥१॥४
वशित्वसिद्धिश्री॥१॥४वशित्वसिद्धश्री॥१॥४प्राकाम्यसिद्धिश्री॥१॥४प्राकाम्यसिद्धश्री॥१॥४मुक्तिसिद्धि
श्री॥१॥४मुक्तिसिद्धश्री॥१॥४इच्छासिद्धिश्री॥१॥४इच्छासिद्धश्री॥१॥४प्राप्तिसिद्धिश्री॥१॥४प्राप्तिसिद्धश्री॥१॥४

॥१४५॥ सर्वकामसिद्धिश्री०॥४ सर्वकामसिद्धश्री०॥४ ब्राह्मीश्री०॥४ ब्राह्मश्री०॥४ माहेश्वरीश्री०॥४
माहेश्वरश्री०॥ इति जलरश्मिक्रमः॥ ॥अथ स्वाधिष्ठानचक्रे वह्निचक्रे त्रिकोणं स्वस्तिकलां
छितं रँबीजयुक्तं कालाग्निकोटिसदृशं विभाव्य तन्मध्ये षाबष्टिदलमंडितं सरोरुहं ध्यात्वा
तत्कर्णिकायां यथोक्तरूपां देवीं विभाव्य तां परितः पूर्वादिप्रादक्षिण्येन दलेषु तदंगसंभवाः
कौमार्यादिबीजाकर्षणपर्यंता षाबष्टिदेवताः न्यसेत्॥ तद्यथा॥४ कौमारीश्री०॥४ कौमारश्री०॥४
वैष्णवीश्री०॥४ वैष्णवश्री०॥४ वाराहीश्री०॥४ वाराहश्री०॥४ माहेन्द्रीश्री०॥४ माहेन्द्रश्री०॥४ चामुंडा
श्री०॥४ चामुंडश्री०॥४ महालक्ष्मीश्री०॥४ महालक्ष्मश्री०॥४ सर्वसंक्षोभिणीश्री०॥४ सर्वसंक्षो
भणश्री०॥ सर्वविद्राविणीश्री०॥४ सर्वविद्रावणश्री०॥ सर्वाकर्षिणीश्री०॥४ सर्वाकर्षणश्री०॥४
सर्ववशीकरणीश्री०॥४ सर्ववशीकरणश्री०॥४ सर्वोन्मोदिनीश्री०॥४ सर्वोन्मादनश्री०॥४ सर्व न
महांकुशाश्री०॥ सर्वमहांकुशश्री०॥४ सर्वखेचरीश्री०॥४ सर्वखेचरश्री०॥४ सर्वबीजा १४५

श्री०॥४ सर्वबीज श्री०॥४ सर्वयोनि श्री०॥४ सर्वयोनि श्री०॥४ सर्वत्रिखंडा श्री०॥४ सर्वत्रिखंड
श्री०॥४ त्रैलोक्यमोहनचक्रस्वामिनी श्री०॥४ त्रैलोक्यमोहनचक्रस्वामी श्री०॥४ प्रकटयोगिनी
श्री०॥४ प्रकटकयोगी श्री०॥४ कामाकर्षिणी श्री०॥४ कामाकर्षणा श्री०॥४ बुध्याकर्षिणी श्री०॥४
बुध्याकर्षणा श्री०॥४ अहंकाराकर्षिणी श्री०॥४ अहंकाराकर्षणा श्री०॥४ शब्दाकर्षिणी श्री०॥४
शब्दाकर्षणा श्री०॥४ स्पर्शाकर्षिणी श्री०॥४ स्पर्शाकर्षणा श्री०॥४ रूपाकर्षिणी श्री०॥४ रूपाकर्षणा
श्री०॥४ रसाकर्षिणी श्री०॥४ रसाकर्षणा श्री०॥४ गंधाकर्षिणी श्री०॥४ गंधाकर्षणा श्री०॥४ चित्ता
कर्षिणी श्री०॥४ चित्ताकर्षणा श्री०॥४ धैर्याकर्षिणी श्री०॥४ धैर्याकर्षणा श्री०॥४ स्मृत्याकर्षि
णी श्री०॥४ स्मृत्याकर्षणा श्री०॥४ नामाकर्षिणी श्री०॥४ नामाकर्षणा श्री०॥ बीजाकर्षिणी श्री०॥४
बिजाकर्षणा श्री०॥४ ॥ इति वह्निचक्रे द्वाषष्ठिरश्मिक्रमन्यासः॥ ॥ ततोऽनाहते वायुचक्रे
धूम्रवर्णषट्कोणाकारं यंबीजाधिष्ठितं ध्यात्वा तन्मध्ये चतुःपंचाशद्दलमंडितं कमलं विचिंत्य
तत्कर्णिकायां देवीं ध्यात्वा तां परितः पूर्वादि प्रादक्षिण्येन देवीसमानरूपा आत्माकर्षिण्यादि

॥१४६॥ सर्वसंपत्तिपूरणापर्यंताः चतुःपंचाशदेवताः प्रसेत्यातयथा॥४॥ आत्माकर्षिणीश्री॥४॥ आ
त्माकर्षणाश्री॥४॥ अमृताकर्षिणीश्री॥४॥ अमृताकर्षणश्री॥४॥ शरीराकर्षिणीश्री॥४॥ शरीराक
र्षणाश्री॥४॥ सर्वाशापरिपूरकचक्रस्वामिनीश्री॥४॥ सर्वाशापरिपूरकचक्रस्वामीश्री॥४॥ गुप्त
योगिनीश्री॥४॥ गुप्तयोगीश्री॥४॥ अनंगकुसुमाश्री॥४॥ अनंगकुसुमश्री॥४॥ अनंगमेख
लाश्री॥४॥ अनंगमेखलश्री॥४॥ अनंगमदनाश्री॥४॥ अनंगमदनश्री॥४॥ अनंगांकुशाश्री॥४॥
अनंगांकुशश्री॥४॥ अनंगमालिनीश्री॥४॥ अनंगमालीश्री॥४॥ सर्वसंक्षोभणचक्रस्वामिनी
श्री॥४॥ सर्वसंक्षोभणचक्रस्वामीश्री॥४॥ गुप्ततरयोगिनीश्री॥४॥ गुप्ततरयोगीश्री॥४॥ सर्वसं
क्षोभिणीश्री॥४॥ सर्वसंक्षोभणश्री॥४॥ सर्वविद्राविणीश्री॥४॥ सर्वविद्रावणश्री॥४॥ सर्वा
कर्षिणीश्री॥४॥ सर्वाकर्षणश्री॥४॥ सर्वाह्लादिनीश्री॥४॥ सर्वाह्लादीश्री॥४॥ सर्वसंमोहनी
श्री॥४॥ सर्वसंमोहनश्री॥४॥ सर्वस्तंभिनीश्री॥४॥ सर्वस्तंभश्री॥४॥ सर्वजृंभिनीश्री॥४॥ सर्व
जृंभनश्री॥४॥ श्री॥४॥ सर्ववशंकरीश्री॥४॥ सर्ववशंकरश्री॥४॥ सर्वरंजनीश्री॥४॥ सर्वसंपत्ति
पूरणीश्री॥४॥

146 १४६

सर्वसंपत्तिपुरणश्री०॥ इतिवायुचक्रेचतुःपंचाशद्रश्मिन्यासः॥ ॥अथविशुद्धिचक्रेकंठदेशे
श्रीत्ताकारस्वच्छहंबीजाधिष्ठितं आकाशमंडलेविचिंत्यतन्मध्येद्वासप्ततिदलेकमलेविभाव्य
तत्कर्णिकायांशाम्भवदेवीध्यात्वातद्दलेषुप्राग्गादिपरितःसर्वमित्यादिकौलिपर्यंताःद्वासप्तति
देवताःमूलदेव्याकाराःध्यायन्न्यसेत्॥ तद्यथा॥४ सर्वमंत्रमयीश्री०॥४ सर्वमंत्रमयश्री०॥४
सर्वद्वंद्वक्षयंकरीश्री०॥४ सर्वद्वंद्वक्षयंकरश्री०॥४ सर्वसौभाग्यदायकचक्रस्वामिनीश्री०॥४ सर्व
सौभाग्यदायकचक्रस्वामीश्री०॥४ संप्रदाययोगिनीश्री०॥४ संप्रदाययोगीश्री०॥४ सर्वसि
द्धिप्रदाश्री०॥४ सर्वसिद्धिप्रदश्री०॥४ सर्वसंपत्प्रदाश्री०॥४ सर्वसंपत्प्रदाश्री०॥४ सर्वसंपत्प्रद
श्री०॥४ सर्वप्रियंकरीश्री०॥४ सर्वप्रियंकरश्री०॥४ सर्वमंगलकारिणीश्री०॥४ सर्वमंगलकारी
श्री०॥ सर्वकामप्रदाश्री०॥४ सर्वकामप्रदश्री०॥ सर्वदुःखविमोचनश्री०॥४ सर्वमृत्युप्रश
मनीश्री०॥४ सर्वमृत्युप्रशमनश्री०॥ सर्वविघ्ननिवारिणीश्री०॥४ सर्वविघ्ननिवारणश्री०॥४

॥१४७॥ सर्वांगसुंदरी श्री०॥४ सर्वांगसुंदर श्री०॥४ सर्वसौभाग्यदायिनी श्री०॥४ सर्वसौभाग्यदायी श्री०॥४
सर्वार्थसाधकचक्रस्वामिनी श्री०॥४ सर्वार्थसाधकचक्रस्वामी श्री०॥४ कुलोत्तीर्णयोगिनी श्री०॥४
कुलोत्तीर्णयोगी श्री०॥४ सर्वज्ञा श्री०॥४ सर्वज्ञ श्री०॥४ सर्वशक्ति श्री०॥४ सर्वशक्त श्री०॥४ सर्वैश्वर्य
प्रदा श्री०॥४ सर्वैश्वर्यप्रद श्री०॥४ सर्वज्ञानमयी श्री०॥४ सर्वज्ञानमय श्री०॥४ सर्वव्याधिविनाशि
147 नी श्री०॥४ सर्वव्याधिविनाशन श्री०॥४ सर्वाधारस्वरूपा श्री०॥४ सर्वाधारस्वरूप श्री०॥४ सर्वपाप
हरा श्री०॥४ सर्वपापहर श्री०॥४ सर्वानंदमयी श्री०॥४ सर्वानंदमय श्री०॥४ सर्वरक्षास्वरूपिणी
श्री०॥४ सर्वरक्षास्वरूपी श्री०॥४ सर्वेप्सितफलप्रदा श्री०॥४ सर्वेप्सितफलप्रद श्री०॥४ सर्वर
क्षाकरचक्रस्वामिनी श्री०॥४ सर्वरक्षाकरचक्रस्वामी श्री०॥४ निगर्भयोगिनी श्री०॥४ निगर्भयोगी
श्री०॥४ वशिनी श्री०॥४ वशी श्री०॥४ कामेश्वरी श्री०॥४ कामेश्वर श्री०॥४ मोदिनी श्री०॥ मोदी श्री०॥४
विमला श्री०॥४ विमल श्री०॥४ अरुणा श्री०॥४ अरुण श्री०॥४ जयिनी श्री०॥४ जयी श्री०॥४

सर्वेश्वरीश्री०॥४ सर्वेश्वरश्री०॥४ कौलिनीश्री०॥४ कौलीश्री०॥ इत्याकाराश्चक्रे द्वासप्ततिरश्मिन्यासः॥
ततो भ्रूमध्ये मानसं चक्रं बिंदुरूपं तडित्कोटिसमप्रभं ध्यात्वा तत्र चतुःषष्टिदलमंडितं कमलं ध्यात्वा
तत्कर्णिकायां श्रीपरदेवतां परितस्तद्दलेषु प्रागादिप्रादक्षिण्येन तदंगसंभूतास्तत्समाकाराः सर्व
रोगहरचक्रस्वामिन्यादिमहामहाशयांताः चतुःषष्टिदेवताः न्यसेत्॥ तद्यथा॥४ सर्वरोगहरचक्र
स्वामिनीश्री०॥४ सर्वरोगहरचक्रस्वामीश्री०॥४ रहस्ययोगिनीश्री०॥४ रहस्ययोगीश्री०॥४ बाणिनी
श्री०॥४ बाणीश्री०॥४ चापिनीश्री०॥४ चापीश्री०॥४ पाशिनीश्री०॥४ पाशीश्री०॥४ अंकुशिनीश्री०॥४
अंकुशीश्री०॥४ महाकामेश्वरीश्री०॥४ महाकामेश्वरश्री०॥४ महावज्रेश्वरीश्री०॥४ महावज्रेश्वर
श्री०॥४ महाभगमालिनीश्री०॥४ महाभगमालीश्री०॥४ महात्रिपुरसुंदरीश्री०॥४ महात्रिपुरसुंदर
श्री०॥४ सर्वसिद्धिप्रदचक्रस्वामिनीश्री०॥४ सर्वसिद्धिप्रदचक्रस्वामीश्री०॥४ अतिरहस्ययोगिनी
श्री०॥४ अतिरहस्ययोगीश्री०॥४ श्रीश्रीमहामहारिकाश्री०॥४ श्रीश्रीमहामहारकश्री०॥४ सर्वा
नंदमयचक्रस्वामिनीश्री०॥४ सर्वानंदमयचक्रस्वामीश्री०॥४ परापररहस्ययोगिनीश्री०॥४ परापर

॥१४८॥ रहस्ययोगीश्री०॥४ त्रिपुराश्री०॥४ त्रिपुरश्री०॥४ त्रिपुरेश्वरीश्री०॥४ त्रिपुरेश्वरश्री०॥४ त्रिपुर
सुंदरीश्री०॥४ त्रिपुरसुंदरश्री०॥४ त्रिपुरवासिनीश्री०॥४ त्रिपुरवासीश्री०॥४ त्रिपुराश्रीश्री०॥४ त्रिपुर
श्रीश्री०॥४ त्रिपुरश्रीश्री०॥४ त्रिपुरमालिनीश्री०॥४ त्रिपुरमालीश्री०॥४ त्रिपुरासिद्धाश्री०॥४ त्रिपुर
सिद्धश्री०॥४ त्रिपुरांबाश्री०॥४ त्रिपुरांबश्री०॥४ महात्रिपुरसुंदरीश्री०॥४ महात्रिपुरसुंदरश्री०॥४
महामहामहेश्वरीश्री०॥४ महामहामहेश्वरश्री०॥४ महामहाराज्ञीश्री०॥४ महामहाराजश्री०॥४
महामहाशक्तिश्री०॥४ महामहाशक्तश्री०॥४ महामहागुप्ताश्री०॥४ महामहागुप्तश्री०॥४ महा
महानंदाश्री०॥४ महामहानंदश्री०॥४ महामहास्कंदाश्री०॥४ महामहास्कंदश्री०॥४ महामहा
शयाश्री०॥४ महामहाशयश्री०॥ ॥इति श्रीआज्ञायां चतुःषष्टिरश्मिन्यासः॥ ॥इत्येवं षष्ठ्युत्तरं
त्रिशतं मयूखजाले विन्यस्य तेजोंसं सर्वेषामुपरि द्वादशांते च चरणाद्ये न्यसेत्॥ तत्र ब्रह्मरंध्र
स्थसहस्रदलकमलकर्णिकायां श्रीपरदेवतां ध्यात्वा तस्या मे व श्रीश्री मन्महाश्रीचक्रनगर १४८

रसाम्राशीरक्तं श्रीपादुकां पूजयामि नमः इति ब्रह्मरंध्रस्य दक्षिणभागे विन्यस्य वामभागे ४ श्रीश्री
म महाश्रीचक्रनगरसम्राट् शुक्ल श्रीपादुकां पूजयामि नमः इति पादांबुजयुगं न्यसेत्॥ ॥इति
श्रीश्रीविद्यासंभवषष्युत्तरे त्रिशतरश्मिक्रमन्यासः॥ अत्र न्यासे सप्ताक्षर्यै ते नमो नता॥ मानस
पूजायां तु सप्ताक्षरीमात्रमेव अत्र केचित्॥ न्यासे प्रोक्त रश्मीनां तत्तन्नाम चतुर्थीनिमो नतेत्याहुः॥
यथा गुरूपदेशं कार्यमिति॥ एवं रश्मिक्रमं कुर्वन् साधको विजितेंद्रियः॥ धनधान्यायुरारोग्य
भोगमोक्षफलं भवेत्॥ १॥ अथ षडंग्यादिकरषडंगन्यासान् विधाय शिवोऽहमिति भावयन्न्व
क्ष्यमाणसंक्षोभणादिनवमुद्राः पाशादिचतुर्मुद्राश्च बध्वा सर्वावयवभावेन कामकलारूप
मात्मानं ध्यात्वा शक्तिमुत्थापनमुद्रां बध्वा प्रातःस्मरणप्रोक्त प्रकारेण मूलाधारात्कुंडलिनी
सुमुत्थाप्य तथैव षट्चक्रभेदनक्रमेण ध्यायन्तं तयोगं विधाय तत्तेजसा परिणतां श्रीपर
देवतां हृदयकमलगे तसिंहासने श्रीचक्रराजे कामेश्वरांकस्थां सर्वावरणयुक्तां त्रिखंडा

॥१४१॥ मुद्रामुद्रितकरो ध्यायेत्॥ ॥श्रीविद्यानंदनाथेन शिवयोः प्रियसूनुना॥ कृते सौभाग्यरत्नाकौ
तरंगो गौत्र्योदशः॥ ॥इति श्रीसच्चिदानंदनाथचरणारविंदद्वंद्वांतेवासिश्रीश्रीवि
द्यानंदनाथेन विरचिते सौभाग्यरत्नाकरे त्रयोदशस्तरंगः॥ ॥ततो ध्यानं॥ तत्र श्रीवामके
149 श्वरतंत्रे॥ उद्यच्चंद्रोदयप्रस्फुरद्रत्नपीयूषवारिधेः॥ मध्ये हेममयीं भूमिं स्मरेन्माणिक्यमं
डितां॥१॥ तन्मध्ये नंदनोद्यानं मदनोन्मादनं महत॥ त्रिसाभ्युदितपूर्णेंदुज्योत्स्नाजालविराजितं
॥२॥ सदा सह वसंतेन कामदेवेन रक्षितं॥ कदंबचूतपुन्नागनागकेसरचंपकैः॥३॥ बकुलैः
पारिजातैश्च सर्वर्तुकुसुमोज्वलैः॥ संकारमुखरैर्भृंगैः कूजद्भिः कोकिलैः शुकैः॥४॥ नानावर्णै
रथान्यैश्च द्विजसंघैर्निषेवितं॥ शाखाकारेऽहंसाद्यैर्नानापक्षिभिरावृतं॥५॥ नानापुष्पलता
कीर्णैर्मिश्रितं वृक्षखंडकैः॥ पर्यंतदीर्घिकोत्फुल्लकमलोत्पलसंभवैः॥६॥ रजोभिर्धूसरैः सम्यक् १४१
सवितमलयानिलैः॥ ध्यात्वैवं नंदनोद्याने ततः प्रांगणां स्मरेत्॥७॥ शुद्धकांचनसंकाशं वसुधा

भिरलंकृते ॥ प्रांगणां चिंतयित्वे स्थ्ये सुरसिद्धनिषेविते ॥८॥ तन्मध्ये मंडपं ध्यायेद्व्योमब्रह्मांड
मंडले ॥ सहस्रादित्यसंकाशं चतुरस्रं सुशोभनं ॥९॥ रत्नतेजःप्रभापुंजपिंजरीकृतदिङ्मुखं ॥
मध्यस्तंभविनिर्मुक्तं कोणस्तंभसमन्विते ॥१०॥ महामाणिक्यवैडूर्यरत्नकांचनभूषितं ॥ मु
क्तादामवितानाढ्यं रत्नसोपानमंडिते ॥११॥ मंदवायुसमाक्रांतं गंधधूपतरंगितं ॥ रत्न
चामरघंटादिविमानैरुपशोभिते ॥१२॥ जातीचंपकपुंनागकेतकीमल्लिकादिभिः ॥ र
क्तोत्पलैः सितांभोजमाधवीभिः सुपुष्पकैः ॥१३॥ बद्धाभिश्चित्रमालाभिः सर्वत्र समलंकृते ॥
तीर्यगूर्ध्वेल सद्रत्नपुत्तलीकोटिमंडितं ॥१४॥ नानारत्नादिभिर्दिव्यैर्निर्मितं विश्वकर्मणा ॥
तन्मध्ये विपुलां ध्यायेद्देदिकां शतयोजनां ॥ १५॥ सहस्रादित्यसंकाशां कोटिमाणिक्यमंडितां ॥
चतुर्द्वारसमोपेतां माणिक्यद्वारतोरणां ॥१६॥ प्रदीपैः पूर्णकुंभैश्च सर्वतः समलंकृतां ॥ हैमीभिः
पालिकाभिश्च सांकुराभिरलंकृतां ॥१७॥ रत्नपीठस्थितैर्दिव्यैरागमैः परिशोभितां ॥ तदे

॥१५०॥ तरांतरापोघन्नमणिदर्पणामंगलो ॥१८॥ मधुरोमारविविधगांधवस्तीत्रबृंहितां ॥ शृंगाररस्स
सनद्धैर्नवयौवनलंपटैः ॥१९॥ अमरीभिकरैर्नीनामणिभूषणभूषितैः ॥ वीणावेणुमृदंगादि
वादनेनचन्द्रसकैः ॥२०॥ प्रीणायद्भिर्महादेवीपरीतांपरितःसदा ॥ रत्नसिंहासनेतस्यावेधामम
150
ध्येस्मरेद्गुमं ॥२१॥ विरंचिविष्णुरुद्रेशारूपपादचतुष्टयं ॥ सदाशिवमयंसाक्षात्तस्मिन्पर
शिवात्मके ॥२२॥ पुष्पपर्यंकमाश्चर्यं तत्रश्रीचक्रनायकं ॥ तन्मध्ययोनिमध्यस्थेश्रीमदोघा
पीठके ॥२३॥ पर्यंकबंधविलसत्स्वस्तिकासनशालिनी ॥ ध्याये[illegible]सरशिवांकस्थांपद्मम
ध्योज्ज्वलाकृतिं ॥२४॥ ततोध्यानंप्रवक्ष्यामित्रिदशैःसेवनीयकं ॥ ततःपद्मनिभांदेवींबा
लार्ककिरणारुणां ॥२५॥ जपाकुसुमसंकाशांदाडिमीकुसुमोपमां ॥ पद्मरागप्रतीकाशांकुंकु
मोदकसन्निभां ॥२६॥ स्फुरन्मुकुटमाणिक्यकिंकिणीजालमंडितां ॥ कालालिकुलसंका
शकुटिलालकपल्लवां ॥२७॥ प्रत्यग्रारुणसंकाशवदनांभोजमंडलां ॥ किंचिदर्द्धेंदुकुटिल
राम
१५०

ललाटमृदुपट्टिकां ॥२८॥ पिनाकधनुषाकारभ्रूलतां परमेश्वरीं ॥ आनंदमुदितोल्लोल
लीलांदोलितलोचनां ॥२९॥ स्फुरन्मयूखसंघातविलसद्धेमकुंडलां ॥ सुगंडमंडलाभोगजि
तेंदुमृतमंडलां ॥३०॥ विश्वकर्मादिनिर्माणसूत्रसुस्पष्टनासिकां ॥ ताम्रविद्रुमबिंबाभरक्तोष्ठीम
मृतोपमां ॥३१॥ दाडिमीबीजवद्भासदंतपंक्तिविराजितां ॥ स्मितमाधुर्यविजितमाधुर्यरससाग
रां ॥३२॥ अनौपम्यगुणोपेतचिबुकोदेशशोभितां ॥ कंबुग्रीवां महादेवीं मृणाललललितैर्भुजैः ॥३३॥
मणिकंकणकेयूरभारखिन्नैः प्रशोभितां ॥ रक्तोत्पलदलाकाररक्तसुकुमारकरांबुजां ॥३४॥
करांबुजनखज्योतिर्वितानितनभस्तलां ॥ मुक्ताहारलतोपेतसमुन्नतपयोधरां ॥३५॥ त्रि
वलीवलनायुक्तमध्यदेशसुशोभितां ॥ लावण्यसरितावर्त्ताकारनाभिविभूषितां ॥३६॥ अ
नर्घ्यरत्नघटितकांचीयुतनितंबिनीं ॥ नितंबबिंबद्विरदरोमराजिवरांकुशां ॥ कदलीलल
लितस्तंबसुकुमारोरुमीश्वरीं ॥ लावण्यकदलीतुल्यजंघायुगलमंडितां ॥३८॥ गूढगुल्फ

॥१५१॥ पदद्वंद्वपद्मपद्माजिताकपपां ॥ ब्रह्मविष्णुशिरोरत्ननिघृष्टचरणांबुजां ॥३९॥ तनूदरीं घंगुलीमा
151 स्वच्छत्ररवचंद्रविराजितां ॥ शीतांशुशकाशास्तसतकांतिसंतां महासिनी ॥४०॥ लोहितसजितसिं
दूरजपादाडिमरागिणीं ॥ रक्तवस्त्रपरीधानांपाशांकुशकरोद्यतां ॥४१॥ रक्तपुष्पनिविष्टां
चैरत्नाभरणमंडितां ॥ चतुर्भुजां त्रिनेत्रां च पंचबाणधनुर्धरां ॥४२॥ कर्पूरशकलोन्मिश्रतां
बूलापूरितानतां ॥ महामृगमदोद्दामकुंकुमारुणविग्रहां ॥४३॥ सर्वशृंगारवेषाढ्यां सर्वालंका
रभूषितां ॥ जगदाह्लादजननीं जगद्रंजनकारिणीं ॥४४॥ जगदाकर्षणकरीं जगत्कारणरू
पिणीं ॥ सर्वमंत्रमयीं देवीं सर्वसौभाग्यसुंदरीं ॥४५॥ सर्वलक्ष्मीमयीं नित्यां परमानंदनंदितां ॥
एवं ध्यायेत्परेशानीं महात्रिपुरसुंदरीं ॥४६॥ इति स्वैक्येन ध्यात्वा मूल विद्ययास्वशिरसि पु
ष्पांजलिं दत्वा पुनर्हृदयकमले यथोक्तरूपां भगवतीं सांगावरणां ध्यात्वा वक्ष्यमाणप्रकारेण
पीठपूजादिपूर्वकं सांगां सावरणां देवीं मानसैरुपचारैः संपूज्य नैवेद्यं दत्वा भोजनावसरे तत् १५१

वैश्वदेवं कुर्यात्॥ तत्र मूलाधारे आत्मांतरात्मापरमात्मज्ञानात्मेत्यात्मचतुष्टयं कल्पितं चतुर
स्रं कुंडं त्र्यग्निसमुज्वले कुंडं ध्यात्वा तत्रश्रीपरदेवतां ध्यात्वा तन्मुखे मूलविद्यांते आहंतां
जुहोमि स्वाहा॥ इत्यादि अहंतां सप्रकैशून्यकामक्रोधलोभमोहमदमात्सर्याणि सुषुम्णा
स्रुग्युक्तमनःस्रुवेण प्रत्येकं हुत्वा पुनः हृदयकमले मुक्तवतीं देवीं ध्यात्वा उत्तरापोशनादि
सर्वोपचारैराराध्य मूलविद्यां यथाशक्ति जपित्वा प्राणायामादिपूर्वकं वक्ष्यमाणविधिना
जपं समर्प्य श्रीगुरुं प्रणम्य स्वदेहं गंधादिभिरलंकृत्य अर्घ्यादिपात्रस्थापनं कुर्यात्॥ तत्र स्व
वामाग्रे वक्ष्यमाणविशेषार्घमंडलवन्मंडं विरच्य तथैव संपूज्य तत्र वक्ष्यमाणविधिना
प्रक्षालितमाधारं संस्थाप्य तथैव संपूज्य सुवर्णादिरचितं केजश्राधूपवासितं कुंकुमालांड
चषकं यस्वाहेति वामकरेण प्रक्षालितं ऐं संदीपनि ज्वालामालिनि ह्रीं इति संदीपनीविद्य
यायोनिमुद्रया संदीपितं कवचेनावगुंठितं ॐ नमः। ह्रीं नमः। हूँ ह्सौं नमः। हं नमः। सः नमः।

न१५२॥ इतिविन्यस्तवंचमंत्रं४श्रीमहात्रिपुरसुंदर्याःमहाकलशंस्थापयामीतितत्रकलशंसंस्था
प्यतत्रवक्ष्यमाणविशेषार्घपात्रवत्पूर्यकलशंतंप्रपूज्यतत्रैववक्ष्यमाणविधिनैवकर्पूरादि
सुवासितापर्युषितपरिस्रुतपयःसमापूर्यतत्राज्यादिकंनिक्षिप्यतन्मध्येविशेषार्घ्यंव
क्ष्यमाणंमंडलंविभाव्यवक्ष्यमाणविधिनासोमकलांतंसंपूज्यतच्चतुरस्रंपरितः४हस
खफ्रेंपथिकदेवताभ्योहूंफट्स्वाहानमः४हसखफ्रेंआचेंउल्किनिहुंफट्स्वाहानमः।
हसखफ्रेंक्रोधूचंडालिनिहुंफट्स्वाहानमः।४हसखफ्रेंदृष्टिचंडालिनीहुंफट्स्वाहानमः।।४
हसखफ्रेंस्पर्शचं०।४हसखफ्रेंस्वेछचं०४हसखफ्रेंघटचं०।४हसखफ्रें०तपनवेधचं०४हसखफ्रें
निर्दयचं०।४हसखफ्रेंसर्वजनदृष्टिस्पर्शदोषचं०।४हसखफ्रेंपशुपाशाचं०।।इतिस्वाग्रादिप्रादक्षि
ण्येनसंपूजयेदितिदशदोषान्निरस्य।।४क्रांक्रींक्रूंक्रैंक्रौंक्रःविकारशोषिणिअस्यविकारान्हनहन
स्वाहाइतिहेतुमध्येसंपूज्य।।स्वादिष्ठयादिभिःपूर्वंअग्निःपंचभिरायतः।।विष्णुर्योनिंत्रयेणैव १५२

त्रिभिष्टाद्विजयेणाचं ॥ इमंमेचइति द्वाभ्यां तामं देयेकयातथा ॥ श्रीरामेकेति चैकेन शुत्रशापं वि
मोचयेत् ॥ इति कुलार्णव वचनात् ॥ उक्तं पंचदशमंत्रैः सकलैः सम्यक् दृभिमंत्रयेत् ॥ मंत्रा ऋग्वेदे यथा ॥
स्वादिष्ठया मदिष्ठया पवस्व सोम धारया ॥ इंद्राय पातवे सुतः ॥ दसाहिरहोतेन आशसः ॥ इह
तवर्गे प्रतिष्ठिता ॥ विष्णुर्योनिं कल्पयतु त्वष्टा रूपाणि पिंशतु ॥ आसिंचतु प्रजापतिर्धाता गर्भं
दधातु ते ॥ गर्भं धेहि सिनीवालि गर्भं धेहि सरस्वति ॥ गर्भं ते अश्विनौ देवावाधत्तां पुष्करस्रजा ॥
हिरण्मयी अरणी यन्निर्मंथतो अश्विना ॥ तं ते गर्भं हवामहे दशमे मासि सूतवे ॥ ३ ॥ त्रिभिष्टुं
देव सवितुर्वर्षिष्ठैः सोम धामभिः ॥ अग्ने दक्षैः पुनीहि नः ॥ पुनंतु मां देवजनाः पुनंतु वसवो
धिया ॥ विश्वे देवाः पुनीत मा जातवेदः पुनीहि मा ॥ आप्यायस्व प्रस्यंदस्व सोम विश्वेभिरंशुभिः ।
देवेभ्यः उत्तमं हविः ॥ इमं मे गंगे यमुने सरस्वति शुतुद्रि स्तोमं सचता परुष्ण्या ॥ असिक्न्या मरु
द्वृधे वितस्तया आर्जीकीये शृणुह्या सुषोमया ॥ सितासिते सरिते यत्र संगथे तत्राप्लुतासो ॥

॥१५३॥ दिवमुत्पतन्ति॥ ये वै तन्वा विसृजन्ति धीरास्तत्र नासोऽमृतत्वं भजन्ते॥ तामेदसाम्नीमनुबोद्धु

153 रोणआधत्तां रयीं सहवीरं च चस्यवे॥ कृतं तीर्थं सुप्रपाणं शुभस्पती स्थाणुं पथेष्ठामप दुर्मतिं हतं

॥३॥ श्रोणामेकउदकं गामवाजेति मांसमेकः पिंशति सूनयाकृतं॥ आनिम्रुचः शकदेको अपाभर[illegible]

किंस्वित्पुत्रेभ्यः पितरा उपावतुः॥ इत्यभिमन्त्र्य ४ ह्रां ह्रीं ह्रूं ह्रैं ह्रौं ह्रः मृतोऽप[illegible]तो देवे अमृते श्वरि

अमृतवर्षिणि अमृतस्वरूपिणि अमृतं स्रावय स्रुत्कशापात्सुधां मोचय मोचय मोचिकाये

नमः। ॐ जूं सः स्वाहा इति विधयाष्टवारं अभिमन्त्र्य ४ सिद्धायै नमः। ४ रक्तायै नमः। ४ शुक्लायै। ४

उत्पलायै। इति चतुरस्रस्य चतुर्दिक्षु प्रादक्षिण्येन स्वाग्रादितः संपूज्य तन्मध्ये त्रिकोणं वि

शेषार्घं वक्ष्यमाणरूपं विभाव्य ४ हसक्षमलवरयूं आनन्दभैरवाय वौषट्॥ आनन्दभैरवश्री

पादुकां पूजयामि तर्पयामि नमः॥ एवं सर्वत्र ४ हसक्षमलवरयूं सुरानन्दभैरवाय वौषट् सुरा

नन्दनाथश्री। ४ सहक्षमलवरयीं सुरानन्दभैरव्यै वषट् सुरानन्दभैरवी श्री। ४ हसक्षमलवरयूं

अमृतानंदभैरवायवौषट् अमृतभैरवश्री ०४ सहक्षमलवरयीं अमृतभैरव्यै वट् अमृतभैरवी
श्री ०१४ हसक्षमलवरयूं तरुणानंदभैरवायवौषट् तरुणानंदभैरवश्री ०४ सहक्षमलवरयीं
तरुणानंदभैरव्यै वट् तरुणानंदभैरवीश्री ०१४ हसक्षमलवरयूं उन्मत्तानंदभैरवायवौषट् उन्म
त्तानंदभैरवश्री ०४ सहक्षमलवरयीं उन्मत्तानंदभैरव्यै वट् उन्मत्तानंदभैरवीश्री ०१४ हसक्षमल
वरयूं ज्ञानानंदभैरवायवौषट् ज्ञानानंदभैरवश्री ०४ सहक्षमलरयीं ज्ञानानंद ज्ञानानंदभैरव्यैवषट्
ज्ञानानंदभैरवीश्री ०४ हसक्षमलवरयूं मुक्त्यानंदभैरवायवौषट् मुक्त्यानंदभैरवश्री ०४ सहक्षमल
रयीं मुक्त्यानंदभैरव्यैवषट् मुक्त्यानंदभैरवीश्री ०४ हसक्षमलवरयूं परमानंदभैरवायवौषट् पर
मानंदभैरवश्री ०४ सहक्षमलवरयीं परमानंदभैरव्यैवषट् परमानंदभैरवीश्री ०४ हसक्षमल
वरयूं कालभैरवानंदायवौषट् कालभैरवानंदश्री ०४ सहक्षमलवरयीं कालभैरव्यैवषट् कालभै
रवीपादुकां पू० तर्प० नमः ॥ रतिभैरवमिथुननवकं मध्ये अष्टदिक्षु च संपूज्य संतर्प्य मुलविद्यया

॥१५४॥ विक्षणमुद्रया संवीक्ष्य अस्त्रमंत्रेण प्रोक्ष्य अस्त्रमंत्रेण कुशैस्त्रिः संताड्य कवचमंत्रेण अभ्युक्ष्य
आघ्राय वामनासारंध्रेण प्रविश्य ब्रह्मरंध्रं गत्वा तत्रस्थचिच्चंद्रमंडलमध्यगतपरमामृतवा
रिधौ मिलित्वा तन्मयेन राजदंतविवरान्नेत्रमार्गेण विनिर्गतं जलं विभाव्य संरोधनमुद्रया सं
रुध्य कवचमंत्रेण अवगुंठनमुद्रया अवगुंठ्य वमिति धेनुमुद्रया अमृतीकृत्य परमीकरणमु
153 द्रया परमामृतीकृत्य तत्र देवीं ध्यात्वा गंधपुष्पादिभिः संपूज्य मूलविद्यामष्टवारमभिमंत्र्य ॥४
नमो भगवती आसवमहेश्वरि वारुणी जलमूर्तये ऊर्ध्वबिंदुग्राहिणि महालक्ष्मीश्वरी परम
धाम्नि परमाकाशभासुरि सोममसूर्याग्निभक्षिणि आगच्छ विश विश स्वभोगद्रव्यं ग्रह्ण ग्रह्ण स्वाहा
इति तत्कलशाद्बिंदुं वामांगुष्ठानामिकाभ्यां धृत्वा द्वितीयखंडे नादायोर्ध्वमुत्क्षिपेत् ततः कलश
वदनं पात्रांतरेण आधारद्वय उद्धरणपात्रमादाय वामकरे निधाय ॥४ अमोघायै नमः ॥४ सूक्ष्मा १५४
यै नमः ॥४ आनंदायै नमः ॥४ शांत्यै नमः । इति शक्तिचतुष्टयं करस्य मात्रोपरि संपूज्य कुंभस्याच्छादन

पात्रस्योपरि स्थापयेदिति कलशस्थापनं। विधाय ततः कलशाद्दक्षिणभागे शुद्धोदकेन चतुरस्र
वृत्त त्रिकोणात्मकं मंडलं चंदनालिप्त भूमौ वहन्नासाकारोर्ध्वपुटाभ्यां कराभ्यां त्रितारमुच्चरन्
निर्माय प्रणव त्रितारादि नमोंतया मूलविद्यया त्रिकोणमध्यं संपूज्य कूटत्रयेण त्रिषु कोणे
षु स्वाग्रादि प्रादक्षिण्येन संपूज्य चतुरस्रे अग्नीश निर्ऋति वायु कोणेषु हृदयादि अंग चतुष्ट
यं मध्ये नेत्रं प्रागादि चतुर्दिक्षु अस्त्रमिति षडंगमंत्रैः संपूज्य तत्र मूलेन क्षालितमाधारं संस्था
प्य ४ प्रथम कूट मुच्चार्य मं वह्निमंडलाय धर्मप्रद दशकलात्मने श्रीपरदेवतायाः सामान्या
र्घाधाराय नम इति संपूज्य तत्र वक्ष्यमाण प्रकारेण वह्नेर्दशकलाः पूजयित्वा तत्रास्त्रेण क्षालि
तं शंखं निधाय ४ द्वितीय कूटं अं अर्कमंडलाय अर्थप्रद द्वादशकलात्मने श्रीपरदेवतायाः सा
मान्यार्घ्यपात्राय नम इति संपूज्य तत्र वक्ष्यमाण प्रकारेण सूर्यस्य द्वादशकलाः संपूज्य गं
धादि सुवासित शुद्ध तोयेन प्रणव त्रितार मूलविद्यां तेविलोमात्मकामुच्चरन् तत्पात्रमा

॥१५५॥ पूर्य ४ तृतीयकूटं ॐ उं सोममंडलाय कामप्रदषोडशकलात्मने परदेवतायाः सामान्यार्घ्यामृ
तायनमः ॥ इति जलं संपूज्य तत्र वक्ष्यमाणप्रकारेण सोमस्य षोडशकलाः संपूज्य तत्र
प्राग्वत्सवितृमंडलात्तीर्थमावाह्य कलशामृतबिंदुं दत्वा तत्र मूलेन गंधपुष्पादिकं निक्षिप्य
प्राग्वत् षडंगैः संपूज्य ४ हसक्षमलवरयूं सहक्षमलवरयीं इति नवात्मकमिथुनमंत्रेणाभि
रभिमंत्र्य ह्सौं वररुणायनमः । स्हौं वारुणीदेव्यै नमः इति वरुणमिथुनमंत्रेण च त्रिरभिमंत्र्य मू
लेनाष्टधाभिमंत्र्य धेनुयोनिमुद्रे प्रदर्शयेदिति सामान्यार्घ्यं विधाय तत्समीपे सामान्यार्घ्यज
लेन यक्षकर्दमादिगंधमिश्रितेन भूमिं विलिख्य तत्र वह्निपुरासोर्ध्वपुटहस्ताभ्यां चतुरस्रवृ
त्तषट्कोणात्मं मंडलं विधाय तन्मंडलं श्रीखमुद्रामुद्रितवामकरेणाऽवष्टभ्य तन्मध्ये त्रि
कोणमध्ये सबिंदुतुर्यस्वररूपां कामकलां विलिख्य ४ श्रीपरदेवतायाः विशेषार्घ्याधारमंड
लायनमः । इति मंडलं संपूज्य ४ नमोंऽतमूलेन त्रिकोणमध्यं संपूज्य त्रिकोणाग्रकोणे ४ १५५

155

प्रथमकूटं नमः। वामे ४ द्वितीयं नमः। दक्षिणे ४ तृतीयं नमः। इति त्रिकोणं प्रादक्षिण्येन संपूज्य

षट्कोणेषु प्रादक्षिण्येन स्वाग्रमारभ्य मूलकूटत्रयस्य द्विरावृत्त्या पूज्य षिधा चतुरस्रे प्राग्वद्

वत्त्वंगानि संपूज्य चतुरस्रे स्वाग्रादि चतुर्दिक्षु मध्ये च प्रादक्षिण्येन ४ ग्लूं गगनरत्नाय नमः। ४

स्लूं स्वर्गरत्नाय नमः। ४ म्लूं मर्त्यरत्नाय नमः। ४ प्लूं पातालरत्नाय नमः। ४ न्लूं नागरत्नाय नमः।

इति पंचरत्नानि संपूज्य पुनः षट्कोणेषु स्वाग्रादि प्रादक्षिण्येन न्यासोक्तबेजं सनानि संपूज्य

चतुरस्रवृत्तषट्कोणत्रिकोणेषु ४ कामरूपपीठाय नमः। ४ जालंधरपीठाय नमः। ४ पूर्णगिरि

पीठाय नमः। ४ उड्याणपीठाय नमः। इति पीठचतुष्टयं संपूज्य। श्रीमद्दीक्षावांश्चेत् चतुर

स्रे स्वाग्रादि चतुर्दिक्षु मध्ये च पंचप्रणवपुटितैः प्रणवपंचकैः पूजयेत्। तत यथा॥ ऐं क्लीं श्रीं

स्फें स्रौः ऐं सौः स्फें श्रीं ह्रीं ऐं नमः॥ एवं ५ ह्रीं ५ नमः ५ श्रीं ५ नमः ५ स्फें ५ नमः स्रौः ५ नमः॥

इति संपूजयेत्। ततः ४ मूलं सर्वशक्तिमयी श्रीपरदेवतायाः पीठचतुष्टयात्मकार्घमंडलाय नमः।

सुधार्णवासनाय नमः। पोतांबुजासनाय नमः। ... सनाय नमः। सर्वचक्रासनाय नमः। सर्वमंत्रासनाय नमः। साध्यसिद्धासना

॥१५६॥ इतिसमस्तमंडले संपूज्य तत्र मूलेन क्षालितमाधारं गृहीत्वा ४ श्रीपरदेवताया विशेषार्घ्याधारं
स्थापयामीति मंडलोपरि संस्थाप्य ४ प्रथमकूटमुच्चार्य मं वह्निमंडलाय धर्मप्रददशकला
त्मने श्रीपरदेवताया विशेषार्घपात्राधाराय नमः इत्याधारं संपूज्य तदुपरि स्वाग्रादिप्रादक्षि
ण्येन वह्नेर्दशकलाः समावाह्य तासां प्राणप्रतिष्ठां कुर्यात्॥ तत्र पूर्वोक्तप्राणाप्राणप्रति
156
ष्ठामंत्रे मम पदस्थाने धूम्रार्चिरादिनामेति पदं निक्षिप्य प्राणप्रतिष्ठामंत्रं धारं स्पष्टान्
पठेदिति प्राणप्रतिष्ठां विधाय ४ यं धूम्रार्चिषे नमः ४ रं उष्मायै नमः ४ लं ज्वलिन्यै ०४ वं
ज्वालिन्यै ०४ शं विस्फुलिंगिन्यै ०४ षं सुश्रियै न ०४ सं सुरूपायै ०४ हं कपिलायै ०४ ळं हव्य
वाहायै ०४ क्षं कव्यवाहायै नमः॥ इति ताः संपूज्य स्वर्णादिरचिते पात्रमस्त्रेण प्रक्षाल्य श्री
परदेवताया विशेषार्घपात्रं संस्थापयामीति तत्र संस्थाप्य ४ द्वितीयकूटमुच्चार्य अं अर्कमं
डलायार्थप्रदद्वादशकलात्मने श्रीपरदेवतायाः विशेषार्घपात्राय नमः इति पात्रमध्ये

संपूज्य तत्र पूर्वोक्तं मंडले विभाव्य पूर्ववत्संचरत्नानि संपूज्य तथैव पंचप्राणैरभ्यर्च्य तत्र सूर्य
स्य द्वादश कलाः समावाह्य प्राग्वत् नाम पुरःसरं तासां प्राणप्रतिष्ठां विधाय वर्त्ताकारेण प्रादक्षि
क्षिण्येन ताः पूजयेत्॥ तद्यथा॥४ कं भं तपिन्यै नमः॥४ खं बं तापिन्यै०४ गं फं धूम्रायै०४ घं पं म
रीच्यै०४ ङं नं ज्वालिन्यै०४ चं धं रुच्यै०४ छं दं सुषुम्णायै०४ जं थं भोगदायै०४ झं तं विश्वायै०४
ञं णं बोधिन्यै०४ टं ढं धारिण्यै०४ ठं डं क्षमायै०॥ इति संपूज्य कलशस्थं जलं उद्धरणपात्रे
णाध्यस्य मूलविद्यां ते विलोममातृकामुच्चार्य तत्पात्रमापूर्य तत्रापि त्र्यं आदिकं निक्षिप्य
ऐं इति अंगुष्ठानामिकाभ्यां पुष्पेण तत्पात्रस्थं जलमालोड्य तत्पुष्पं निरस्य क्लीमिति चंदना
गुरुकर्पूरचोरकुंकुमरोचनाजटामांसीशिलारसात्मकगंधाष्टकपंकलोलितं चंदनादि
पंकलोलितं वा पुष्पं निक्षिप्य सौरिति गालिनिमुद्रया निरीक्ष्य४ तृतीयकूटं ङं सोममंडला
य कामप्रदषोडशकलात्मने श्रीपरदेवताया विशेषार्घामृताय नमः इति पात्रस्थहेतुमध्ये

॥१५७॥ संपूज्य तत्र पूर्वोक्तं मंडले विभाव्य पूर्ववत्पंचरत्नां ततः संपूज्य शांभवदीक्षायुक्तस्थैस्तथैव पंच
प्रणवैः पूजयेत्॥ ततस्तत्र सोमस्य षोडशकलाः समावाह्य प्राग्वत्नामपुरःसरं तासां प्राण
प्रतिष्ठां विधाय वृत्ताकारेण स्वाग्रादि प्रादक्षिण्येन ताः पूजयेत्॥ तद्यथा४ अं अमृतायै नमः४
आं मानदायै०४ इं पूषायै०४ ईं तुष्ट्यै०४ उं पुष्ट्यै न०४ ऊं रत्यै नम०४ ऋं धृत्यै०४ ॠं शशिन्यै०४
लृं चंद्रिकायै०४ लॄं कान्त्यै०४ एं ज्योत्स्नायै०४ ऐं श्रियै०४ ओं प्रीत्यै०४ औं अंगदायै०४ अं पूर्णा
येन०४ अः पूर्णामृतायै०॥ इति संपूज्य पूर्वपूजित मंडलमध्ये त्रिकोणमकथादित्रिरेखं वि
भाव्येत त्कोणत्रये मूलविद्यायाः कूटत्रयं मध्यस्य विं हों कामकलां तत्पार्श्वयोः सबिंदु हक्षौ त
त्पृष्ठे लकारं तत्पार्श्वयोर्हंसवर्णौ विभाव्य पुष्पाक्षतगर्भितां योनिमुद्रां बध्वा गुरूपदिष्ट प्रकारेण
मूलाधारात्कुंडलिनीमुत्थाप्य षट्चक्रभेदनक्रमेण सुषुम्नावर्त्मना ब्रह्मरंध्रस्थचिच्चंद्रमंडले
नीत्वा तत्रस्थित परमशिवे संयोज्य तयोः शिवशक्त्योः सामरस्यसुखानुभवगलितामृतधारां १५७

संचित्सराजदंतविवरान्तयनवर्त्मनानिःसृतां योनिमुद्रोल्लसितेन करेण तानीय ४ मुलविद्यां ते ब्रह्मांड
खंडसंभूतमशेषरससंभृतं ॥ आपूरितं महापात्रं पीयूषरसमावह ॥१॥ ऐं क्लीं सौः जूं सः अमृते अ
मृतोद्भवे अमृतेश्वरी अमृतवर्षिणी अमृतं स्रावय स्रावय स्वाहा इति तस्मिन्नर्घामृते पुष्पाक्षतप्रक्षे
पेण तदमृतधारां संयोज्य वमिति धेनुमुद्रां प्रदर्श्य ॐ ह्रीं हंसः सोहं स्वाहा इत्यात्माष्टाक्षरमंत्रेण त्रिर
भिमंत्र्य पुनरुच्चार्य आत्मशक्ति श्रीपादुकां पूजयामीति हेतुमध्ये संपूज्य पुनः प्रणवेन त्रिरभिमंत्र्य
पुनः प्रणवमुच्चार्य परं निष्कलां भवी श्री० इति हेतुमध्ये संपूज्य पुनः हंसः इति मंत्रेण त्रिरभिमंत्र्य
हंसः अजपाशक्ति श्री० इति संपूज्य मातृकया प्रसक्षरं बिंदुरहितया त्रिरभिमंत्र्य पुनस्ता
मुच्चार्य मातृका सरस्वती श्री० इति हेतुमध्ये संपूज्य मूल तार्तीय कूटेन दशधाभिमंत्र्य पुनस्ता
र्तीय कूटमुच्चार्य त्रिपुरामृतेश्वरी श्री० इति हेतुमध्ये संपूज्य ४ हसहक्षमलवरयूं सहक्षमल
वरयीं इत्यानंदभैरवमिथुनविद्याभ्यां त्रिरभिमंत्र्य हसक्षमलवरयूं आनंदभैरवाय वौषट्

आनंदभैरवश्रीपादुकां पूजयामि तर्पयामि नमः इति त्रिः संतर्प्य ४ सहस्रमलवर्यीं सुधादेव्यै
वद्रू सुधादेवीश्री० इति त्रिः संपूज्य संतर्प्य स्हौँ वरुणाय नमः । स्हौं वरुणादेव्यै नमः । इति वरुणा
मिथुनविद्याभ्यां त्रिरभिमंत्र्य ४ पुनः १ थगुर्वार्य वरुण श्री० वारुणीदेवीश्रीपादुकां पूजयामी
ति संपूज्य संतर्प्य ततो बालया वक्ष्यमाणमिथुनसाधो उरा मंत्रैश्च सहस्रदभिमंत्र्यात द्विन नि
यावि घेया तत्तिथि नित्या विद्याया च १ थकू त्रिस्त्रिरभिमंत्र्य परा प्रासादपरासादपर मंत्राभ्यां उ
र्ध्वाम्नायदीक्षितश्चेत् स्हौः स्हौं इति मंत्राभ्यां त्रिरभिमंत्र्य ततश्चरणदीक्षितश्चेत् चरणा
कुलयोगिनीविद्याभ्यां त्रिस्त्रिरभिमंत्र्य ततः सौः इत्यनुत्तरपराविद्यया दीक्षितश्चेत् तया त्रिर
भिमंत्र्य पूर्णाभिषिक्तश्चेत् कामकलाविद्यया त्रिरभिमंत्र्य षडन्वयशांभवदीक्षायुक्तश्चेत् त
द्विद्याभिस्त्रिस्त्रिरभिमंत्र्य ततो वक्ष्यमाणपांचभौतिकमंत्रैस्त्रिस्त्रिरभिमंत्र्य सख्यादि दशकला
हेतुमध्ये समावाह्य प्रागवतन्नामधुरः सरं तासां प्राणप्रतिष्ठां विधाय ओं हं सः शुचिषद्वसुरं

158

तरिक्षसद्धोतावेदिषदतिथिर्दुरोणसत्॥ नृषद्वरसदृतसद्व्योमसदब्जागोजाऋतजाअद्रिजा
ऋतंबृहत्॥ अनयाऋचासहृदभिमंत्र्यपुनरुच्चार्यब्रह्मणेनमइतिहेतुमध्येसंपूज्यकंसृष्ट्यैनम
इत्यादिप्राग्गुक्तकलामातृकान्यासोक्तप्रकारेणकचवर्गकलाःसंपूज्यततःटतवर्गोत्थजरादि
दशकलाःसमावाह्यप्राग्वत्तासांप्राणप्रतिष्ठांविधाय॥ प्रतद्विष्णुस्तवतेवीर्येणमृगोनभीमःकुच
रोगिरिष्ठाः॥ यस्योरुषुत्रिषुविक्रमणेष्वधिक्षियंतिभुवनानिविश्वा॥ अनयाऋचासहृदभि
मंत्र्यपुनरुच्चार्यविष्णवेनमइतिसंपूज्यटंजरायैनमइत्यादिताःसंपूज्यपयवर्गोत्थकलास्तीक्ष्णा
द्याःसमावाह्य॥ प्राग्वत्तासांप्राणप्रतिष्ठांविधाय॥ त्र्यंबकंयजामहेसुगंधिंपुष्टिवर्द्धनं॥ उर्वारुक
मिवबंधनान्मृत्योर्मुक्षीयमामृतात्॥ इत्यभिमंत्र्यपुनरुच्चार्यरुद्रायनमइतिसंपूज्यपंतीक्ष्णा
यैनमइत्यादिभिःसंपूज्यपुनःषकारादिक्षकारांतपंचवर्णोत्थाःपीतादिपंचकलाःसमावाह्यप्रा
ग्वत्तासांप्राणप्रतिष्ठांविधायगायत्र्याभिमंत्र्यपुनरुच्चार्यईश्वरायनमइतिसंपूज्यषंपीतायैनम

॥१५८॥ इत्यादिताः संपूज्य ततः स्वरोत्थानि निवृत्त्यादि षोडश कलाः समावाह्य प्राग्वत्तासां प्राणप्रतिष्ठां
विधाय॥ विष्णुर्योनिं कल्पयत्विति मंत्रस्य त्वष्टा गर्भकर्ता ऋषिः अनुष्टुप् छन्दः श्रीविष्णुर्देवता
श्रीसदाशिवपूजार्थे जपे विनियोगः॥ विष्णुर्योनिं कल्पयतु त्वष्टा रूपाणि पिंशतु॥ आसिंचतु प्रजा
पतिर्धाता गर्भं दधातु ते॥ इत्यभिमंत्र्य पुनरुच्चार्य सदाशिवाय नमः इति हृत्पुमध्ये सकलं संपूज्य
अंजिकृत्यै नमः इत्यादिताः संपूज्य मातृकया त्रिरभिमंत्र्य पुनरभिमंत्र्य मातृकासरस्वती श्रीं इति
संपूज्य॥ ऐं अखंडैकरसानंदकरे परसुधात्मनि॥ स्वच्छंदस्फुरणामत्र निधेहि कुलरूपिणि॥
इत्यनेन त्रिरभिमंत्र्य॥ क्लीं अकुलस्थामृताकारे सिद्धिज्ञानकरे परे॥ अमृतत्वं निधेह्यस्मि
न्वस्तुनि क्लिन्नरूपिणि॥१॥ इति च त्रिरभिमंत्र्य सौः [illegible]का सरस्वती श्रीं तद्रूपेणैकरस्यत्वं दत्त्वा
ह्येतत्स्वरूपिणि॥ भूत्वा परामृताकारा मयि चित्स्फुरणं कुरु॥ इति च त्रिरभिमंत्र्य॥ ऐं ब्लूं झ्रौं जूं सः
अमृते अमृतोद्भवे अमृतेश्वरी अमृतवर्षिणि अमृतं स्रावय स्रावय स्वाहा॥ इति अमृतेश्वरी १५९॥

159

विद्यायाश्चतुर्वारमभिमंत्र्य ॥ ऐं ... पुनस्तामुच्चार्य ॐ परमेश्वरी श्रीं ॥ इति सकृत् संपूज्य ततः
ऐं वद वद वाग्वादिनि ऐं क्लीं क्लिन्ने क्लेदिनि क्लेदय महाक्षोभं कुरु कुरु क्लीं सौः मोक्षं कुरु कुरु सौः ह्सौः ॥
इति दीपनीविद्यया वै चवारमभिमंत्र्य ततस्तत्र मूलविद्यामष्टधा जपित्वा तन्मध्ये चतुरस्रे पश्चि-
मद्वारं विचिंत्य तद्द्वारपार्श्वयोः कुलबटुकनाथ ते ह्लूं भां वां श्रीं ॥ कुलगणपतिनाथ ते ह्लूं भां
वां श्रीं ॥ इति दक्षिणवामयोः संपूज्य तदंतः प्रागवत् षडासनानि संपूज्य तन्मध्य त्रिकोणमध्यस्थ
बिंदुमध्ये कामकलीं यां वक्ष्यमाणप्रकारेण देवीमावाह्य ध्यात्वा षडंगन्यासयोगेन सकलीकृत्य
गंधादिभिः संपूज्य वक्ष्यमाणविधिना देव्यंगे लयांगं संपूज्य तिथिनित्याः षोडश नित्या गुरुपं-
क्तित्रयं षडंगयुवतीश्च संपूज्य वक्ष्यमाणसमष्टियोगिनीमंत्रेण त्रिः सकृद्वा पुष्पांजलिं दत्वा
धूपदीपौ निवेद्य योनिधेनुमहायोनित्रिशिखापद्मसंक्षोभद्रावणाकर्षवश्योन्मादमहां-
कुशखेचरीबीजयोनिपाशांकुशधनुर्बाणाख्याश्चाष्टादश मुद्राः प्रदर्शन नमस्कारमुद्रया

॥१६०॥ 160 प्रणमेत्॥ अत्र एतावत्कर्तुमशक्तश्चेत् अभिमंत्रणपूजनयोरन्यतमं कुर्यात्। तत्रापि प्रशस्त
तोऽश्चेत् आत्माष्टाक्षरपूजां तं कृत्वा आनंदभैरवमिथुनं संपूज्य संतर्प्य स्वद्वयादिकलापूजा
मारभ्य शेषं प्राग्वत्समापयेदिति॥ विशेषार्घस्थापनविधिः॥ ततस्तत्परतस्तेनैव विधिना
श्रीपात्राख्यं पात्रान्तरं स्थापयेत्। तेन मूलदेव्यतिरिक्तावरणदेवतास्तर्पयेत्॥ पूजासमर्प
णादिकं मूलदेव्यास्तर्पणं च विशेषार्घेणैव॥ तत्र अनंगकुसुमादिपर्यंतमावरणत्रयं
पूजासमर्पणमर्घदानं च सामान्यार्घजलैरेव कुर्यात्॥ इति श्रीपात्रस्थापनविधिः॥
तत्रस्तदनुक्रमेणैव तदधः पंक्त्याकारेण पाद्याचमनीयमधुपर्कार्घपात्रत्रयं सामान्या
र्घविधिनैव स्थापयेत्॥ तदशक्तौ त्रिकोणमंडलत्रये साधारं पात्रत्रयं निधाय तत्र पात्रद्व
यं शुद्धजलेनापूर्य तृतीयं मधुपर्कद्रवेणापूर्य तेषु विशेषार्घजलं किंचिद्दत्वा मूलविद्यया
पृथक्पृथक् अष्टवारमभिमंत्रयेत्॥ मधुपर्केतु कांस्यपात्रं प्रशस्तं॥ ताम्रवर्ज्जमन्यत

१६०

रं वा पात्रांतरेणाच्छादितं कुर्यात्॥ गंधपुष्पाक्षतकुशाग्रतिलसर्षपदूर्वाः सामान्यार्घे नि
क्षिपेत्॥ पाद्यपात्रे श्यामाकतंडुलदूर्वाकमलापराजितापुष्पोशीररोचेनाख्यद्रव्याष्टकं
निक्षिपेत्॥ आचमनीयपात्रे जातीफललवंगकंकोलचूर्णानि निक्षिपेत्॥ उक्तद्रव्यालाभे
तत्तद्वस्तुभावनया तंडुलान्निक्षिपेत्॥ मधुपर्कपात्रे दधिमधुघृतानि निक्षिप्य विशेषा
र्घ्यबिंदुना संस्कुर्यात्॥ दध्याद्यलाभे जले नैव तद्भावनया पूरयेत्॥ ततः स्वदक्षिणाग्रे
पाद्यादिपात्रविधानेनैव पुनराचमनीयपात्रं प्रोक्षणीपात्रं च स्थापयेत्॥ अत्राप्यशक्तौ पाद्या
दित्रयमेकस्मिन्नेव पात्रे दद्यात्॥ ततः गुरुमुखादवगतविनियोगविधौ पात्रचतुष्टयं सा
मान्यार्घविधिना प्रोक्षणीपात्रात्परतः स्थापयेत्॥ तेषां नामानि तु गुरुपात्रं शक्तिपात्रं बटुक
पात्रं आत्मपात्रं चेति। गुरुपादुकाविद्यया गुरुपात्रं। बालविद्यया शक्तिपात्रं॥ बटुकपात्रं तन्मंत्रेण
आत्मपात्रमात्माष्टाक्षरमंत्रेण चेति तत्तन्मंत्रेत तत्पात्रमष्टधाभिमंत्रयेत्॥ ततः प्रोक्षणीपात्रोद

॥१६१॥ केनपात्रांतेराद्धृतेन ओं ऐं ह्रीं श्रीं ऐं प्रथमकूटमुच्चार्य आत्मतत्त्वात्मनेनमः ।४ क्लीं द्वितीयं विद्या
तत्त्वात्मने नमः ।।४ सौः तृतीयं । शिवतत्त्वात्मने नमः । ततः ४ ऐं क्लीं सौः समस्तमुच्चार्य सर्वतत्त्वात्मने
नमः ।। इति स्वात्मानं प्रोक्ष्य पुनर्मूलेन यागभूमीयागोपकरणानि च श्रीचक्रं प्रोक्ष्य सर्ववस्तु पुष्पेनु
161 मुद्रां प्रदर्शयेत् ।। इति अर्घ्यादिस्थापनविधिः ।। अत्र श्रीपात्रस्थापनाशक्तौ विशेषार्घ्येणैव प्रोक्ष
पूजादिकं कुर्यादिति ।। अथात्मपूजा ।। तत्र स्वपुरतस्त्रिकोणमण्डले साधारं पात्रं संस्थाप्य
कलशोदकेनापूर्य विशेषार्घ्यबिंदुं दत्वा स्वदेहं चंदनादिरक्तोपचारैरलंकृत्यात्मानमिष्टदेवता
रूपं ध्यायन् गुरुगणपतिपरदेवताः प्रणम्य मूलाधारादिब्रह्मरंध्रांतं बिसतंतुतनीयसीं चंद्र
कोटिप्रभाद्रवां कुंडलिनीं मनोलयपर्यंतं ध्यात्वा परमानंदनिर्भरस्तदात्मकेन तेन मूलविद्या
मपि मूलादिब्रह्मरंध्रांतं तेजोमयीं विभाव्य तत्तेजसा परितः स्वेष्टदेवतारूपं स्वदेहं भावयन्ना
त्म[illegible]पूजां कुर्यात् ।। ततस्तत्र सोमस्य षोडश कला समावाह्य प्राग्वत् तन्नामपुरःसरं तासां प्राण) १६१

॥ तद्यथा ॥ तत्र प्रागुक्तयोगपीठन्यासप्रकरणोक्तप्रकारेण स्वदेहं सिंहासनत्वेन परिकल्प्य
प्रथमं शिरसि प्रणवत्रितारा ओं श्रीगुरुपादुकाविद्यामुच्चार्य श्री अमुकानन्दनाथ श्रीपादुकां
पूजयामि तर्पयामि नम इति संपूज्य संतर्प्य मूलाधारे गणपतिश्रीपादुकां पूः॥ त० ॥ नम इति
संपूज्य संतर्प्य प्रागुक्तयोगपीठन्यासक्रमेण मण्डूकाद्यानमूलाधारादिनु तत्स्थानेषु प्रणव
त्रितारचतुर्थ्यन्त तत्तन्नामभिर्नमोन्तैः सिंहासनान्तं संपूज्य दक्षिणांसवामांसवामोरुद
क्षिणोरुसर्वांगेषु वक्ष्यमाणपंचप्रेतासनं संपूज्य दक्षिणांसादिस्थानेषु धर्मादिचतुष्टयं
मुखादिस्थानेषु अधर्मादिचतुष्टयं च तथैव संपूज्य पुनर्हृदयकमले एवमायाविधे सं
पूज्य मध्ये पंचदशफणान्वितमनन्तं ध्यात्वा तन्मध्यफणायाम् अष्टदलकमलं कामेश्वरीपीठं
ध्यात्वानन्तपद्मादिपरतत्वान्तं संपूज्य तत्केसरेषु प्रागादि आग्नेय्यन्तं ४ मोहिनी श्री ०१४
क्षोभिणी श्री ०१४ वशिनी श्री ०१४ स्तंभिनी श्री ०१४ आकर्षणी श्री ०१४ द्रावणी श्री ०१४ आह्लाद

॥१९२॥ नी श्री पा० पू० क्लिन्ना श्री पा० पू० इति संपूज्य मध्ये पू० क्लेदिनी श्री पादुकां पूजयामि इति संपूज्य क्ली
सर्वशक्तिकमलासनाय नमः इति योगपीठत्वेन पुष्पांजलिना समस्तं देहं संपूज्य तन्म
ध्यकर्णिकायां श्रीचक्रे विभाव्य पू० समस्त प्रकटेत्यादियोगिनी समष्टिविद्यया त्रिः समस्तं
162 देहं संपूज्य प्राग्युक्त योगपीठन्यासक्रमेण षडासनपर्यंतं प्राक् न्यस्त स्थानेषु संपूज्य दक्षि
णांसपृष्ठ दक्षकर्णपृष्ठ दक्षशंख दक्षललाट दक्षनेत्र दक्षनासापुट दक्षचुबुक हृदय
त्रिकोण तन्मध्येषु पू० नादशक्ति श्री पा० पू० बिंदुशक्ति श्री पा० पू० कलाशक्ति श्री पा० पू० ज्येष्ठाश
क्ति श्री पा० पू० रौद्रीशक्ति श्री पा० पू० वामाशक्ति श्री पा० पू० विषघ्नीशक्ति श्री पा० पू० दूतशक्ति श्री पा० पू०
सर्वानंदाशक्ति श्री पा० इति संपूज्य॥ प्रे कं ३ ए ई स्रादि शिवशक्ति सदाशिवेत्यादिन्यासोक्त
समष्टिपीठमंत्रेण सर्वांगं संपूज्य हृदयैकमले यथोक्तरूपां भगवतीं ध्यायन् ततेजसा
व्याप्तं स्वदेहं श्रीभगवतीरूपं विचिंत्य मूलमुच्चार्य श्रीमहात्रिपुरसुंदरी श्री पा० त० नम १९२

इति शिरसि त्रिः पुष्पांजलिभिः संपूज्य गुरुः स्थापितपात्रोदबिंदुभिः संतर्प्य पुनः प्राग्व
न्मूलेन शिरोहृदयगुह्यपादद्वयसर्वांगेषु पंचपुष्पांजलिभिः संपूज्य संतर्प्य हृदयत्रिको
णे शिरस्त्रिकोणे वा वक्ष्यमाणप्रकारेण लयांगतिथिनित्याषोडशानित्यागुरुपंक्तित्रयष
डंगयुवतीस्तत्तत्स्थानेषु वक्ष्यमाणप्रकारेण संपूज्य संतर्प्य हृदयत्रिकोणपूजायां सं
हारश्रीचक्रोक्तन्यासप्रकारेणानवावरणशक्तिः पूजयेत् ॥ शिरस्त्रिकोणपूजा चेत्सृ
ष्टिश्रीचक्रन्यासक्रमेणानवावरणशक्तीश्चक्रेश्वरीश्च पूजयित्वा तर्पयेत् ॥ एतावत्क
र्तुमशक्तौ षडंगयुवतीपूजांते समस्तप्रकटसादि समष्टिविद्यया त्रिः संपूज्य संतर्प्य चतुः
समयचतुराम्नायषट्दर्शनदेवताश्च वक्ष्यमाणश्रीचक्रपूजाक्रमेण पूजयेत् ॥ उर्ध्वाम्ना
यदीक्षितश्चेन्महाषाढान्यासोक्तरूपं स्वात्मानं ध्यात्वा तद्विषयो वक्ष्यमाणप्रकारेण त्रिः सं
पूज्य शाक्तश्चेन्महाषोढोक्तदेवतास्तन्न्यासस्थानेष्वेव संपूज्य संतर्प्य शिरसि पदराप्रादस्य गुरु

॥१६३॥ पंक्तित्रयं पूजयेत्॥ ततश्चरणादीक्षितश्चेत्प्रागुक्तचरणादिविद्यापिस्तन्यासस्थानेषु सं
पूज्य तर्पयेत्॥ ततः पूर्णाभिषिक्तश्चेद्दक्ष्यमाणप्रकारेण शिरसि कामकलापारं पर्यैप्र
संपूज्य संतर्प्य शांभवदीक्षायुक्तश्चेत्तन्मिथुनषट्कं तदुरुक्रमं तद्रश्मिक्रमं च प्रागुक्तन्यास
स्थानेषु संपूज्य तर्पयेत्। अत्र सर्वेत्रात्मपूजायां विस्ताराशक्तौ तत्रत्र्यम्लदेवतास्तत्तदुरु
163 क्रमं च संपूज्य संतर्पयेदिति संक्षेपः॥ ततः पूर्ववत्पुष्पांजलिपंचकं स्वदेहे समस्तकादिषु
प्रागुक्तस्थानेषु विधाय धूपदीपौ निवेद्यान्तर्हवनं कुर्यात्॥ तत्र मूलाधारेऽस्ति त्रिकुंडं वि
भाव्य तन्मध्यस्थकालाग्निमेव कामाग्निं वासनारूपेंधनप्रज्वलितं प्राणादिपंचवायुभिः
संधुक्षितं कुंडलिनीरूपपरदेवताधिष्ठितं चिदग्निमंडले विभाव्य प्रणवत्रितारादि मूलविद्यां ते
धर्माधर्महविर्दीप्ते आत्माग्नौ मनसा स्रुचा। सुषुम्नावर्त्मना नित्यमक्षवृत्तिर्जुहोम्यहं इदं जु १६३
होमि स्वाहा॥ इति पुण्यपापद्वयात्मकसंकल्पविकल्पधर्म्मात्मकं हविः स्रक्सम्पाहुत्या हुत्वा

ततःप्रणवत्रितारादिमूलविद्यांते प्रकाशामर्शहस्ताभ्यामवलंब्योन्मनीस्रुचं। धर्माधर्मकलास्ने
हपूर्णवह्नौ जुहोम्यहं अधर्मं जुहोमि स्वाहेति पूर्णाहुतिं हुत्वा निरस्तनिखिलप्रपंचो निष्कलस्वा
त्मरूपः साधकः कियत्क्षणं तिष्ठेत्॥ ततो देवीरूपमात्मानं ध्यात्वा श्रीगुरुपादुकां प्रणम्य शिरसि
अन्नपूर्णां ध्यात्वा तन्मंत्रेण वक्ष्यमाणपूजाप्रकारेण तां संपूज्य संतर्प्य पूजाशिष्टं तत्पात्रस्थ
मुदकं गुरुपादुकामूलविद्याभ्यां कुंडल्यात्मके श्रीपरदेवतामुखे जुहोमीति विधाय प्राश्य श्री
परदेवतारूपमात्मानं ध्यायन् प्राणायामाकृष्यादिकरषडंगन्यासपूर्वकं मूलविद्यामष्टोत्तर
शतवारं जपित्वा पुनः प्राणायामपूर्वकं जपं समर्प्य स्तुत्वा प्रणमेदिति आत्मपूजा॥

॥श्रीविद्यानंदनाथेन शिवयोः प्रियसूनुना॥

॥१६४॥